संस्कृतपरिषद्ग्रन्थावली–१६.
अ. १३

श्रीकोदण्डपरशुरामेत्यादिविविधविरुदावलीविराजमानोन्नत-
महाराजाधिराजश्रीशक्तिसिंहात्मजमहाराजाधिराज-
श्रीमदनसिंहविरचिते

मदनरत्नप्रदीपे

दा न वि वे को द्द्यो तः

तृतीयो भागः

015,1:gxc6,1
K73

संस्कृतपरिषद्
उस्मानियाविश्वविद्यालयस्था
हैदराबाद–७.

१९६७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

015,1:gxl,1 7875
K7.3
Madan Singh
Danavivekoddyota

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

015,1:१२८,1
K7.3
7875

SHRI JAGADGURU VISHWARADHYA JNANAMANDIR
(LIBRARY)
JANGAMAWADIMATH, VARANASI

❁❁❁❁❁

Please return this volume on or before the date last stamped
Overdue volume will be charged 1/- per day.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सर्वेऽधिकाराः स्वायत्तीकृताः

हैदराबादनगरे उस्मानियाविश्वविद्यालयस्थया
संस्कृतपरिषदा प्रकाशितः

015,1192L1
K7.5

प्रथमं संस्करणम्

१९६७

SRI JAGADGURU VISHWARADHYA
NANA SIMHASAN JNANAMA
LIBRARY
Jangamawadi Math, Varana
Acc. No. 7875 मूल्यम् रु. १२.५०
16.65

हैदराबादनगरे उस्मानियाविश्वविद्यालयस्थमुद्रणालये मुद्रितः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

Sanskrit Academy Series, No. 16.
A. 13

MADANARATNAPRADĪPA

DĀNAVIVEKODDYOTA

PART III

An extensive digest on Danas compiled under the patronage of King Madanasimhadeva

THE SANSKRIT ACADEMY
OSMANIA UNIVERSITY,
HYDERABAD-7.

FIRST EDITION

1967

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

All rights reserved.

Published by

THE SANSKRIT ACADEMY

OSMANIA UNIVERSITY,

HYDERABAD-7.

First Edition : 1967.

16 25

Price : Rs. 12.50

PRINTED AT THE OSMANIA UNIVERSITY PRESS, HYDERABAD-7.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दानविवेकोद्द्योते तृतीयो भागः
विषयानुक्रमणिका

	पृष्ठम्
दशमहादाननिरूपणम्	१–८०
सुवर्णदानम्	१
आनन्दनिधिदानप्रयोगः	१०
भद्रनिधिदाननिरूपणम्	११
भद्रनिधिदानप्रयोगः	१५
शतमाननिरूपणम्	१६
हेमदानविधिः	१८
रजतदानम्	१९
अश्वदाननिरूपणम्	२१
श्वेताश्वदानम्	२२
तिलदानम्	२५
तिलमृगदानम्	२६
तिलपूर्णकांस्यपात्रदानम्	२७
तिलकांस्यपात्रदानप्रयोगः	३२
तिलराशिदानविधिः	३३
तिलपद्मदानम्	३४
रुद्रैकादशतिलदानम्	३८
तिलगर्भदानम्	३९
तिलगर्भदानप्रयोगः	४२
गजदानम्	४४
सूर्यगजदानविधिः	४७
दासीदानम्	४८

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पृष्ठम्

रथदानविधिः ५०
प्रसङ्गाच्छिविकादानम् ५२
भूमिदानम् ५५
गृहदानम् ५८
गृहदानप्रयोगः ७०
मठदानानि ७४
कन्यादानम् ७५
कपिलधेनुदानम् ८०
अतिदाननिरूपणम् ८३–१८८
गोदाननिरूपणम् ८३
गोदानविधिः ८७
हेमशृङ्गीदानम् ९०
नन्दीपुराणोक्तहेमशृंगीदानम् ९१
मत्स्यपुराणोक्तहेमशृंगीदानम् ९२
समानवत्सगोदानम् ९३
दशवर्णधेनुदानानि ९६
त्रिरात्रगोदानम् ९७
देवताभ्यो गोदानम् १००
वृषभैकादशीदानम् १०१
वृषभाधिकगोशतदानम् १०२
उभयमुखीदानम् १०३
वैतरणीधेनुदानम् १०७
वृषभदानम् १११
गुडधेन्वादिदानविधिः ११३
गुडधेन्वादिदानप्रयोगः ११७
तिलधेनुदानम् १२०
प्रकारान्तरेण तिलधेनुदानम् १२३
सप्तव्रीहिधेनुदानविधिः १२५
घृतधेनुदानम् १२६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पृष्ठम्

नवनीतधेनुदानम् १३०
जलधेनुदानम् १३१
क्षीरधेनुदानविधिः १३४
दधिधेनुदानम् १३७
मधुधेनुदानम् १३९
रसधेनुदानम् १४२
शर्कराधेनुदानम् १४४
कार्पासधेनुदानम् १४६
लवणधेनुदानम् १४८
कर्पूरादिधेनुदानानि १५०–१५६
कर्पूरधेनुः १५०
सुवर्णधेनुदानानि १५२
हेमवृषभदानम् १५५
विद्यादानफलानि १५७
वेदविद्यादानविधिः १६१
स्मृतिदानम् १६४
स्मृतिदानविधिः १६६
शिष्येभ्यो व्याख्यानदानविधिः १६९
पुराणदानानि १७२
भारतश्रवणविधिः १८२
शिवशास्त्रादिदानम् १८६
त्रिमूर्तिदानम् १८९
त्रिपुरुषदानम् १९२
नवग्रहदानम् १९४
दशावतारदानम् १९८
द्वादशादित्यदानम् २०१
चन्द्रादित्यदानम् २०४
कालपुरुषदानम् २०७
कालचक्रदानम् २१०
पापपुरुषदानम् २१२

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पृष्ठम्

आत्मप्रतिकृतिदानम् २१५
उदकुम्भदानम् २१८
यमप्रतिमादानम् २२०
लोकपालाष्टकदानम् २२१
अजाविकदानम् २२३
मेषीदानम् २२४
अजादानम् २२८
महिषीदानम् २३०
यममहिषदानम् २३३
कृष्णाजिनदानम् २३४
गृष्टिकृष्णाजिनदानम् २४१
आर्द्रकृष्णाजिनदानम् २४४
कालविशेषविहितदानानि २४६–२६२
तिथिदानानि २४६
वारदानानि २५२
नक्षत्रदानानि २५३
योगदानानि २५४
करणदानानि २५५
सङ्क्रान्तिदानानि २५६
मासदानानि २५७
ऋतुदानानि २६०
अयनदानम् २६१
संवत्सरदानम् २६२
प्रकीर्णदानानि २६३–३२९
आरोग्यदानम् २६३
रत्नदानम् २६५
अलङ्कारदानम् २६६
वस्त्रदानम् २६७
शय्यादानम् २७०
आसनदानम् २७३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पृष्ठम्

चामरदानम् २७४
वितानदानम् २७५
गन्धद्रव्यदानम् २७६
ताम्बूलादिदानम् २७७
उपानच्छत्रदानम् २७८
भाजनदानम् २७९
आपाकदानम् २८०
अन्नदानम् २८३
आमान्नदानम् २८६
उदकदानम् २८८
धर्मघटदानम् २९०
अश्वत्थसेवनम् २९२–३०१
तरुपुत्रकविधिः २९३
अश्वत्थोपनायनम् २९७
अश्वत्थोपनयनप्रयोगः ३०१
गलेतिकादानम् ३०३
मणिकदानम् ३०५
प्रपादानम् ३०६
पान्थोपचारः ३०८
गोपरिचर्या ३११
यज्ञोपवीतदानम् ३१४
यष्टिदानम् ३१५
इन्धनदानम् ३१६
अग्नीष्टिकादानम् ३१७
दीपदानम् ३१९
अभयदानम् ३२२
पात्रदानानि ३२३
कल्पदानानि ३२९
नानादानानि ३३१
तत्तद्द्रव्याणां दानमन्त्राः ३३६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पृष्ठम्

जलाशयोत्सर्गः ३५६
बह्वृचपरिशिष्टम् - जलाशयोत्सर्गविधिः ३७१
वापीकूपोत्सर्गविधिः ३७२
आरामप्रतिष्ठाविधिः ३७५
आरामप्रतिष्ठाप्रयोगः ३७८
Foreword VII
परिशिष्टम् ३८१

—:०:—

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

Foreword

We are glad to bring out the third and final volume of Dānavivekoddyota, the first and the second having already been published in 1964 and 1966 respectively. As already stated in the first volume, the Vyavahāravivekoddyota was published in 1948 and now we have published one more section of the Madanaratnapradīpa. The remaining five sections are still in the manuscript form.

The Madanaratnapradipa is an authoritative work on Dharmaśāstra and has been frequently referred to by the Vīramitrodaya and the Vyavahāramayūkha of Nīlakaṇṭha.

As promised in the first volume, we have added here at the end two indices to make the work as useful as possible.

———(:o:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

Appendix continued from P. 384.

मूलागमः – १. १४१, १४२, १५४.

मृत्युञ्जयः – ३. १९२, २९३, २१०, २११, २२०, २३३.

मैत्रायणीयसंहिता – २. २१, १०१.

मोहचूलोत्तरम् – १. १५३, १५४.

यमः – १. २१, २२, २९, ३०, ३२, ३३, ३९, ४३, ४४, ४७, ४९, ६२, ६४, ७८, ८७, १८६, १८७, १८९, २१८. ३. ३३, ८८, २६०, ३३४.

याज्ञवल्क्यः – १. १२, २८, ३०, ३१, ३३, ६१, ६३, ७२, ७७, ७९, १०२, ११०, १२०, १७८, १८०. ३. ७७, ३३५.

रामायणम् – १. ८६, ११५. ३. ३२२.

लक्षणसंग्रहः – १. १५६, २. २४७.

लघुशातातपः – १. ४०.

लघुहारितः – १. १०९, ११०.

ललितविजयम् – २. १९२.

लाप्यायनश्रौतसूत्रम् – २. १९, २२.

लिंगपुराणम् – ३. ११६, १३५, १९०. ३. ४५, ७७, ७८, ८३.

वराहपुराणम् – १. २८, ४४, ७८, ७९, ८४, ८७, ९०, १२३, १३०. ३. ८१, ८२, १०३, १०४, १२३, १४६, १४७, १६६, १६७, २४७, २४८, २६८, २६९.

वसिष्ठः – ३१, ३३, ४६, ६५, ८९, ११०, १७६.

वाजसेनीयसंहिता – १. २०९, २१२, २१७, २२४, २३५, २३६, २३९–२४२, २४५. २४८, २४९, २५४, २५६, २६२, २६९, २७१, २७२. २. १-४, ७, ९, १०, १३-१६, २१, २६, ३१, ३२, ३६, ३८, ४४, ४५, ५२, ५४, ५६, १०४, १०५, ११५, १३९, १४४, १४६, १६३, १७९, २३०, २३१. ३. ४०.

वामनपुराणम् – ३. १७८, १८०, २५७, २५८.

वायुपुराणम् – १. ८८, ११२, १८७. ३. १८, ३३२.

वासिष्ठधर्मशास्त्रम् – १. ४३, ६५.

विश्वकर्मवास्तुशास्त्रम् – १. १३४, १३५, १३८, १३९, १५७, १५९, १८३-१८६, १८८, १८९. २. २४९, २९३. ३. २२५, २३२.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विश्वामित्रः – १. ८३. २. ११८, ११९. ३. ८५, ८७, ८८, १२५, १५६, २५६.

विष्णुगुप्तः – १. ११९.

विष्णुधर्मोत्तरपुराणम् – १. २४, ३७, ४१- ४२, ४९, ५७, ५८, ६०, ७०, ७२-७४, ७९, ८०, ८४, ८५, ९४-९८. २, १२६-१२८, १७२, १७३, १८१, १८२, २४८, २४९, ३१६, ३१७. ३. ७९, ९७-९९, १२०-१२२, १२६-१२८, १३१, १३२, १५०-१५३, १५७, २०४-२०६, २२३, २२९, २३८, २४१-२४९, २५१, २५३-२५५, २६०-२६२, २६७, २७६, २७७, २८३, २८४, २८६, २८७, ३०९, ३१२, ३१३, ३२०, ३२१, ३३४- ३५६.

विष्णुस्मृतिः – १. ४८, ५९, ७१, ७७. ३, ३५७.

वृद्धशातातपः – १. १२, २२, ३८, ४४, ४५, ४६, ६२, ८०, ८४, ८९.

व्यासः – १. १०-१२, ४०-४२. ४४, ४६, ५०, ६१, ६७, ७४, ८४, ३०१, ३०२, ११५, ११७, २१९. ३. ४, ५, २५, ५८, ५९, ८०, ८५, २८५.

शङ्खः – १. १२, ६६, ८०.

शतपथब्राह्मणम् – १. ७. १७९, २४२.

शाखान्तरम् – १. ७९.

शांखायनः – १. ९०,

शारदातिलकम् – १. १३८, १४५-१४७, १४९, १५४.

शिवधर्मोत्तरपुराणम् – १. २७, ५७, ८४, १०५. २. १०१, १०२.

शुल्वसूत्रम् – १. १२९, १३६.

शौनकः – १. १७७. ३. २१८, २१९, २९७-३००.

श्रीप्रश्नः – १, १८९. २. २९३-२९५.

श्लोकगोतमः – १. ८९.

षट्त्रिंशन्मतम् – १. १०६, ११५.

संवर्तः – १. ३८, ६७. ३. ३१९, ३२२.

साममन्त्रब्राह्मणम् – १. २३०. २. २०. २१, २२, १४६, १४८-१५२, १५३, १५४.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सामवेदः – १. २३६, २५१. २. २३१.

सारसंग्रहः – १. १५७.

सिद्धाकाशः – १. १२७, १२८, १४०, १४५, १४६, १४८, १५२, १५५–१६०.

सिद्धान्तसंहिता – १. १८७.

सिद्धान्तसंग्रहः – १. १८६.

सुमन्तुः – १, २८. ३. २२८.

सूत्रसंग्रहः – १. १४१.

स्कन्दपुराणम् – १. ४६, ५०, ६६, ६८, ७०, ७२, ७५, ८१, ८४, ९३, १०१, १०५-१०८, १११, ११६, १२४, १४६, १६६, १६७, १७३-१७५, १७८, २. १२०, १२१, १७०, २४९. ३. १, १९, २१, ५१, ७४, ७७, ७८, ९९, १००, ११२, १२७, १३४-१४५, २५२, २६१, २६३, २६४, २७३, २७६-२७८; २८५, २८८, २९४-२९६, ३०९,

स्मृत्यन्तरम् – १. ८३, ९१, १०१, १४१, १४२, १४४, १८०, १८१. ६. ३८, १०९.

स्वायम्भुव – १. १५७, १५८.

हारीतः – १. ८७. २. ८४, ३११.

———(·o:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मदनरत्नप्रदीपे दानोद्द्योते तृतीयो भागः

अथ दशमहादाननिरूपणम्

अथ दशदानानि निरूप्यन्ते। तानि चोक्तानि कूर्मपुराणे —

कनकाश्च तिला नागा दासा रथमहीगृहम्।
कन्या च कपिला धेनुर्महादानानि वै दश॥

तत्रादौ सुवर्णदानम्। तदुत्पत्तिरुक्ता स्कान्दे।

महेश्वरस्य यद्रेतः पवित्रं शुक्लमुत्तमम्।
समाकृष्टं पुरा गौर्या दुराधर्षतमात् पतेः॥

देवतानां हितार्थाय तद्वह्नौ प्राक्षिपत् पुरा।
मुखेनैवापिवद्वह्नी रेतः शुक्रं पिनाकिनः॥

दुःखेन परीतः सन् गङ्गायां प्राक्षिपत् पुनः।
क्वथिताश्च पुनर्गङ्गा ससमुद्राः सरिद्गणाः॥

भूम्यां निपातयामास पर्वतैरभ्यपातयत्।
तप्तायःपिण्डवद् भूमिः सद्वीपकुलपर्वता॥

ततस्तदैश्वरं रेतः स्वरसेन सपावकम्।
दग्ध्वा समस्तभुवनं यातं शम्वरणं प्रति॥

ततः स्कन्दः समभवत् स्कन्दसंपर्कि यज्जलम्।

तत् स्वच्छं स्वर्णमभवद् इत्यादि।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वह्निपुराणे रामं प्रति महर्षीणां वाक्यम् —

एतत् पवित्रमतुलं संभूतमिह सुव्रतम् ।
शम्भोर्बीजं परं तेजो ह्यपत्यं जातवेदसः ॥

सहजं कार्तिकेयस्य रुद्रशुक्रसमुद्भवम् ।
पवित्रत्वात् सुरैः सर्वैर्धार्यते मुकुटादिषु ॥

अग्निस्तु देवताः सर्वाः सुवर्णं च तदात्मकं ।
तस्मात् सुवर्णे दत्ते वै प्रीताः स्युः सर्वदेवताः ॥

देवीपुराणे गौरीविवाहे —

वैवाहिकेन विधिना जुहावाग्निं पितामहः ।
होमं च कुर्वतस्तस्य विकारो मान्मथोऽभवत् ॥

रूपं दृष्ट्वा तदा देव्या[1] रेतः स्कन्नं महात्मनः ।
पद्भ्यां च मृदितं तेन बहुधा समपद्यत ॥

तत्रोत्पन्ना महात्मानो वालखिल्या मरीचिपाः ।
अग्नौ च शेषम[2]पतत्तच्चाभूज् ज्वलनप्रभम् ॥

जाज्वल्यमानं दीप्त्या च अग्निमध्यगतं तथा ।
शशंसिरे ततो देवा दृष्ट्वा पुत्रं विभावसोः ॥

जगृहुः शिरसा चैव पुण्यवत्वान्मुदान्विता ।
एवं सुवर्णमुत्पन्नमाग्नेयं ब्राह्ममेव च ॥

इति ।

अथ सुवर्णदानं नन्दिपुराणे —

---

1. Om A. 2. शेषमतपत्तच्च A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुवर्णं प्रकृत्य —

तस्मात् तत् सर्वथा पात्रे दद्यात् कनकदक्षिणाम् ।
अपात्रे पातयेद् दत्तं सुवर्णं नरकार्णवे ॥

प्रमादतस्तु तन्नष्टं तावन्मन्त्रं नियोजयेत् ।
अन्यथा स्तेययुक्तः स्याद्धेम्न्यदत्ते विनाशिनि ॥

दानार्थमेव तत्सृष्टं ह्यक्लिष्टं स्वर्गसाधनम् ।
दानात् परं सुवर्णस्य विधिरेव न विद्यते ॥

सुवर्णं परमं दानं सुवर्णं दक्षिणा परा ।
एतत्पवित्रं परममेतत् स्वस्त्ययनं महत् ॥

दश पूर्वान् परान् वंश्यानात्मानं च विशांपते ।
अपि पापरतं कृत्वा दत्त्वा विप्रेषु तारयेत् ॥
तथा —
सुवर्णदः स्वर्गलोके कामानिष्टान् समश्नुते ॥

विरजोऽम्बरसंवीतः परियाति यतस्ततः ।
विमानेनार्कवर्णेन भास्करेण विराजितः ॥

अप्सरोगणकीर्णेन भास्वता स्वेन तेजसा ।
हंसबर्हिणयुक्तेन कामगेन नरोत्तम ॥

दिव्यगन्धवहः स्वर्गे परिगच्छन्नितस्ततः[1] ।
तस्मात् स्वशक्त्या दातव्यं काञ्चनं मानवैर्भुवि ॥

नातः परतरं लोके सद्यःपापविमो[2]चनम् ।
सुवर्णस्य तु शुद्धस्य सुवर्णं यः प्रयच्छति ॥

---

1. ततः om A. 2. °विनोचनणम् A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते ।
सुवर्णद्वितयं दत्त्वाऽक्षयां गतिमाप्नुयात् ॥

दत्त्वा सुवर्णस्य शतं द्विजेभ्यः श्रद्धयान्वितः ।
ब्रह्मलोकमनुप्राप्य ब्रह्मणा सह मोदते ॥

कूर्मपुराणे —

पलैकं द्विगुणं वापि त्रिगुणं शक्त्यनुक्रमात् ।
कनकं स्यात् सुवर्णेन द्वाभ्यां त्रिभिः सदक्षिणम् ॥

पलादधो वा तत् कुर्याद् दक्षिणा स्याद् यथारुचि ।
वित्ताधिक्यात् पलाधिक्यमिति न्यायनिदर्शनात् ॥

पलैकमिति — एकपलपरिमितं कनकं, एकेन सुवर्णेन सदक्षिणम् । तद्द्विगुणं कनकं द्वाभ्यां सुवर्णाभ्याम् । त्रिगुणं त्रिभिः सुवर्णैः सदक्षिणं स्यादित्यर्थः ।

नन्दिपुराणे —

सुवर्णं ये प्रयच्छन्ति नराः शुद्धेन चेतसा ।
देवतास्तैर्न सन्देहः समस्ता इति नः श्रुतम् ॥

अग्निर्हि देवताः सर्वाः सुवर्णं च हुताशनः ।
तस्मात् सुवर्णे दत्ते च दत्ताः सर्वाश्च देवताः ॥

वेदव्यासः —

सर्वान् कामान् प्रयच्छन्ति ये प्रयच्छन्ति [1]काञ्चनम् ।
एतद्धि भगवानत्रिः पितामहसुतोऽब्रवीत् ॥

---

1. कीचनम् A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

अयं सुवर्णदानमन्त्रः ॥

वह्निपुराणे गरुड उवाच —

प्रभो प्रसीदाच्युत विश्वभावन प्रतापनित्योऽसि सुरारितापः ।
प्रयच्छ मे प्रश्नमहं करोमि यं मुकुन्द तस्योत्तरमुत्तरं विभो ॥

कथं जगन्नाथ जनो निरन्तरं महोत्सवी स्याद् विजयी सुखी सदा ।
सुसंपदानन्दपरोऽजरोऽमरो निरामयो येन शुभेन तद् वद ॥

विभुस्तदाकर्ण्य वचो गरुत्मतः प्रसन्नरूपः प्रतिवाक्यमाह तम् ।
सुपर्ण यत् प्रश्नमिदं त्वया कृतं शृणुष्व तत् साधु न दानतः परम् ॥

इहामुष्मिन्नपि संसृतो निधिः क्वचिन्न केनापि कदाचिदाप्यते ।
युगायुतैः [1]कल्पशतायुतैरपि प्रभुञ्जतो दातुरहो न हीयते ॥

गतिं च यां यामपि याति दाता योनिं यथामुत्र यथेह चापि ।
तां तामनुप्रैति तु दत्तमन्ते सुश्रद्धया यद् द्विजपुङ्गवेभ्यः ॥

तस्मान्निधानं शृणु सर्वदानतः प्रभावदं नित्यफलप्रदं च ।
ऐश्वर्यदं मोक्षदमक्षयं यद् धातुत्रयोद्भूतमनेकरत्नम् ॥

कारयेत् कार्तिकान्ते वा माघ्यां वा माधवेऽपि वा ।
अयने विषुवे वापि मन्वादिषु युगादिषु ॥

चन्द्रसूर्योपरागे वा स्वशक्त्यौदुम्बरं घटम्[2] ।
पिधानं राजतं तद्वन् मध्ये सौवर्णमुत्सृजेत् ॥

नानारत्नवरापूर्णं नानानानाभिरावृतं ।

1. कल्पशतायुतैरपि om A. 2. घट A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हैमराजतताम्रोत्थैः सरकैरभिपूरितम् ।
नानानानाशतादूर्ध्वमयुतादपि शक्तितः ॥

औदुम्बरं ताम्रमयम् । सौवर्णं सुवर्णमेव । सौवर्णरत्नवराणि महारत्नानि । नानानानाभिः नानाप्रकाराभिः नानाभिर्नाणकाभिधया प्रसिद्धैः मुद्राविशेषैः । सरकाः स्वल्पमुद्राः ।

शक्त्या पलसहस्रेण शतेनार्धशतेन वा ।
तदर्धार्धेन वा राजन् पलाद्धीनं न कारयेत् ॥

कार्यं तद् वै युतं हेम्ना वित्तशाठ्यमकुर्वता ।

निधिरूपत्वादुक्तनाणकव्यतिरेकेण पलसहस्रादिपरियुतं सुवर्णमपि प्रक्षेप्तव्यमित्यर्थः ।

राजतेनाथ ताम्रेण रत्नैर्वा वस्त्रसंवृतम् ॥

नानाधान्योपरि स्थाप्य कल्पोक्तैरर्चयेत् पदैः ।
पौराणिकं पुरस्कृत्य स्वयं वा तदनुज्ञया ॥

राजतेन पिधानेन । ताम्रेण घटेन । नानाधान्यान्यष्टादश धान्यानि । पदैर्मन्त्रैः । पौराणिको गुरुः ।

कृतक्रियोऽग्निसान्निध्ये विष्णोरीशस्य वाण्डज ।
इमं समुच्चरेन् मन्त्रं कुशपाणिः प्रसन्नधीः ॥

ॐ नमः सर्वदानन्द सर्वसम्पद्विवर्धन[1] ।
वर्धयास्मात् समृद्धोऽहमायुषा यशसा श्रिया[2] ॥

नमस्तेऽनन्तसन्तान सदानन्द सदोदय ।
त्वं सुखं वै कुरुष्वेह सन्तत्या मां धनायुषा[3] ॥

---

1. °विवर्धनः A; 2. श्रियाः A; 3. °धनायुवा E.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नमो नमः पद्मनिधे धनेश शतक्रतो शंकर नैर्ऋतेश ।
शमं नयास्मद्दुरितं हर प्रभो नमो नमस्ते हर शंकरेश ॥

नमो नमः पाश[1]धराप्रमेय नमोऽस्तु वामाय सुनामधेय ।
नमः समीराय हुताशनाय नमोऽस्त्वनन्ताय कजासनाय ॥

नमः सुरश्रेष्ठहरीश्वराय नमोऽस्तु सावित्रि शिवे श्रियेति ।
सरस्वतीप्रीतिरक्तिः क्रियेति सुपुष्टितुष्टिस्मृतिशान्तिकीर्ते ॥

सर्वामराणां निधिरप्रमेयस्त्वमेव पित्रर्षिमुनीश्वराणाम्[5] ।
आधारभूतोऽसि चराचरस्य विश्वस्य यस्मात् प्रणतोऽस्म्यतस्त्वाम् ॥

नमोऽस्तु सौन्दर्यनिधे सुरेश[6] नमोऽस्तु गांभीर्यनिधे[7] समुद्र ।
नमो नमः कान्तिनिधान इन्दो तेजोनिधे त्वां प्रणतोऽस्मि भानो ॥

नमः पद्माय भद्राय नमस्ते स्वस्तिकाय च ।
नमः शङ्खाय मणये माणिभद्राय ते नमः ॥

नमो नन्दिविवर्ताय[1] नन्द्यावर्ताय ते नमः ।
नमः कण्टककर्णाय कण्ठावर्ताय ते नमः ॥

नमो नन्दप्रतिष्ठाय नमो हेमप्रियाय च ।
नमो हिरण्यगर्भाय नित्यानन्दाय ते नमः ॥

एवं पूज्य विधानेन नित्यानन्दनिधिं सुधीः ।
ससिद्धार्थकदूर्वाब्जसकुशाक्षतचन्दनैः ॥

सिद्धार्थकाभिरानन्दमेवं संपूज्य यो जनः ।
तिललाजासुसंपूर्णं भूमावुदकमुत्सृजेत् ॥

मन्त्रेणानेन विधिवत् कल्पोक्तेन खगोत्तम ।
अद्येह पुण्यकालेऽस्मिन् द्विजदेवाग्निसन्निधौ ॥

---

1. शधराप्रमेय A; 2. पित्रर्षि मुनीश्वराणाम् E; 3. सुरे A; 4. गांभीर्यनिधेधे A; 5. °विवर्नाय A. E.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यशःश्रेयोभिवृद्ध्यर्थं मातापित्रोस्तथात्मनः ।
पुराणन्यायमीमांसावेदवादिभ्य एव च ॥

नमो विद्याविधायिभ्यो नानागोत्रेभ्य एव च ।
विप्रेभ्योऽनेकशर्मभ्यो नित्यानन्दनिधिं परम् ॥

अहं संप्रददे तेभ्यो नानानानावृतेन च ।
सस्वर्णरौप्यताम्रेण सरत्नेन सवाससा ॥

सोपस्करेण पुरुषो ब्रह्मविष्णुशिवात्मकः ।
प्रीयतां निधिदानेन श्रीयज्ञपुरुषोऽच्युतः ॥

एवमुत्सृज्य उदकं विप्रेभ्यः प्रतिपादयेत् ।
संविभज्य यथाशास्त्रं न किंचिदपमानयेत् ॥

महादानमिदं यस्मात् तस्मादेकोऽपि नार्हति ।
अथान्ये केचिदिच्छन्ति समस्तविधिपारगाः ॥

यज्ञदानव्रतानां च सोऽप्येकोऽर्हति तद्गृहे ।
एवं यः कुरुते दानं नित्यानन्दनिधेः परम् ॥

परं पदमवाप्नोति स संसारे निरन्तरम् ।
दानानामप्यशेषाणामनन्तफलमश्नुते ॥

नित्यानन्दनिधानस्य प्रदानादपवर्गभाक् ।
यश्चैवं सकृदत्रैव सदानन्दविधानकृत् ॥

स करोत्यसकृद्राज्यं प्राप्नोति त्रेतसञ्ज्ञके ।
पुनश्च धर्मसंयुक्तो राज्यं कृत्वा सहानुगः ॥

---

1. मामांसा A; 2. नानानाव्रतेन A; 3. स करात्य A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्राप्नोति पदमैशानं नित्यमक्षयमव्ययम् ।
तस्मादेत्य च पुना राज्यं लभेद् वैद्याधरे पदे ॥

आकल्पमप्यनल्पश्रीः श्रीनिधानप्रदानतः ।
पुनः प्रयाति कल्पान्तं वैष्णवं पदमव्ययम् ॥

गता अपि योगिनो यत्र नो मुञ्चन्ति पुनः परम् ।

यदा कथंचिदत्रैति स्वकर्मगुणसंयुतः ।
तदाखिलमहीराज्यं ॥

एतद् भद्रनिधानाख्यमाख्यातं वैनतेय ते ।
मया प्रीत्या प्रसन्नेन किमन्यत् कथयामि ते ॥

नित्यानन्दनिधेर्दानान् नित्यानन्दोऽभिजायते ।
यः कुर्यात् सोऽच्युतायुः स्याद् दीर्घसन्तानमाप्नुयात् ॥

यस्तु संकीर्तयेद् भक्त्या शृणुयाद्वा समाहितः ।
स दीर्घमायुराप्नोति मुच्यते सर्वकिल्बिषैः ॥

इति विहगेन्द्र ते गदितमिदं दयितं महताम्
तदिह महाद्भुतममेतच्छमनं त्वघानां ।
विमलमवाप्य कांचनमिहाचरते मनुजः
स पदमुपैति वैष्णवमनन्तसुखं महितम् ॥

इत्यानन्दनिधिदानविधिः ॥

——: o :——

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथानन्दनिधिदानप्रयोगः

अत्र यजमानः पूर्वोक्ते देशे काले च कृतनित्यक्रियः प्राङ्मुखः सकुशोपग्रहपाणिः कुशयवजलतिलान्यादाय असकृद्दानपक्षेऽद्येत्यादिदेशकालकीर्तनान्ते निरन्तरपरमपदावाप्तिसकलदानजन्यानन्तफलभोगानन्तरापवर्गप्राप्तिकामः इति दानवाक्यं सकृद्दानपक्षे त्वद्येत्यादिदेशकालकीर्तनान्ते वेधःपदाधिकरणासकृद्राज्यकल्पावधिकानल्पश्रीकवैद्याधरपदराज्यलाभोत्तराव्ययवैष्णवपदावाप्तिदीर्घायुष्यावच्छिन्नसन्तानकामश्च आनन्दनिधिमहादानं करिष्य इति कृतसंकल्पोऽस्य महादानत्वान् मातृपूजाभ्युदयिकश्राद्धं च कृत्वा एकमाचार्यं पुराणवेदाद्यभिज्ञं वस्त्रमुद्रिकाकुण्डलादिभिरभ्यर्च्य चिकीर्षितनित्यानन्दनिधिमहादानप्रतिग्रहार्थं वृणुयात्। स च वृतो निध्यासानदादिकं कुर्यात्। गुर्वनुज्ञया कर्तैव वा कर्म कुर्यात्। पूर्वोक्तं नानारत्नस्वर्णरौप्यताम्रमुद्रायथाशक्तिसंपादितद्वादशपलादिपरिमितस्वर्णयुतं राजतापिधानं ताम्रघटरूपमानन्दनिधिं सुसूक्ष्मवस्त्रैर्वेष्टितं शुद्धोपलिप्तमहीतलन्यस्ताष्टादशधान्योपरि विष्ण्वादिदेवतासन्निधौ स्थापयित्वा आनन्दनिधेः प्रतिष्ठापूर्वकं 'ॐ नित्यानन्दनिधये नमः' इति मन्त्रेणासनार्घाद्युपचारैरभ्यर्च्य सिद्धार्थदूर्वाब्जकुशचन्दनाक्षतानादायानन्दनिधिं प्रदक्षिणीकृत्य 'ॐ नमः सर्वदा' इत्यादिभिः पूर्वोक्तमन्त्रैः स्थाप्य पूजयित्वा कुशतिललाजयवाक्षतजलान्यादायाद्येत्यादिदेशकालकीर्तनान्तेऽद्येह पुण्ये कालेऽस्मिन् इत्यादि पूर्वोक्तमन्त्रैर्भूमावुदकमुत्सृज्य कृतैतदानन्दनिधिमहादानप्रतिष्ठार्थमिदं सुवर्णमग्निदैवतं दक्षिणां संप्रददे इति दक्षिणां दद्यात्। अस्य महादानस्य गृहीतुः पात्रस्यासुलभत्वाद् ब्राह्मणेभ्यः तन्निधिं विभज्य यथाशक्ति दद्यात्।

इत्यानन्दनिधिदानप्रयोगः।

——:०:——

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ भद्रनिधिदाननिरूपणम्

वह्निपुराणे इन्द्र उवाच —

भगवन् सर्वमाख्यातं वृषदानक्रियाफलम् ।
पृच्छाम्यन्यदहं पुण्यं सदाक्षयफलप्रदम् ॥

दानं त्रैलोक्यनाथस्य हरेः प्रीतिविवर्धनम् ।
यस्य जन्मायुतेनापि दानस्यान्तो न विद्यते ॥

तद्वदस्व विभो येन दत्तेनेशः प्रतुष्यति ।
दिक्कालात्मा च सन्नित्यः सदानन्दमयो हरिः ॥

तत्कथं भगवन् भक्ते भवेत् प्रेममयो हरिः ।
केन दानेन तपसा व्रतेन यजनेन वा ॥

मुच्यते पातकाद् घोराद्जन्ममरणान्तिकात् ।
कथं भवेन्नरः श्रीमान् धीमान् पुत्री प्रतापवान् ॥

अमितायुस्तथाऽरोगः सकलैश्वर्यभाक् सुधीः ।
कस्य जन्मायुतान्तेऽपि दानस्यान्तो न विद्यते ॥

केन तत्पदमाप्नोति विष्णोर्यत् परमं पुमान् ।
श्रोतुमर्होऽसि वै ब्रह्मन् वैष्णवं मन्यसे यदि ॥

तत् प्रसीदाखिलं ज्ञानं तत्त्वमाचक्ष्व मे गुरो ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ब्रह्मोवाच —

आनन्दं ब्रह्मणो रूपं नित्यं वेदेषु गीयते ।
सर्वावासो विभुः साक्षादानन्देषु व्यवस्थितः ॥

तस्मादानन्ददं पुण्यं देह्यानन्दनिधिं परम् ।
विप्रायाच्युतरूपाय वर्धयानन्दमुत्तमम् ॥

दानेनानेन भो शक्र धातुत्रययुतेन च ।

इन्द्र उवाच —

विधानं ब्रूहि मे ब्रह्मन् दानस्य च महाफलम् ।
यथा देयं विशेषेण विष्णोरानन्दकारकम् ॥

ब्रह्मोवाच —

पुण्यां तिथिं प्राप्य तु पौर्णमासीं तथोपरागे शशिसूर्ययोर्वा ।
चतुर्युगादिष्वयनद्वये वा प्रबोधने प्रस्वपनेऽथ विष्णोः ॥

कुर्यादथौदुम्बरमेककुम्भं हिरण्यमानेन यथा स्वशक्त्या ।

हिरण्यमानेन प्रक्षेप्तव्यभारादिपरिमितसुवर्णानुसारेण देयेन सुवर्णेन हीरकादिरत्नसहितेन पूर्णो यथा कुम्भः स्यात्तावत्प्रमाणं कुर्यादित्यर्थः ।

तथा पिधानं च सुराजतं स्याद्धिरण्यभारेण तु पूरयेत्तत् ॥

तदर्धतोऽर्धेन तदर्धतो वा स्वशक्तितः स्वर्णपलैः शतेन ।
तदर्धमर्धेन तु वित्तशक्त्या पलत्रयादूर्ध्वमपि प्रकुर्यात् ॥

तत्ताम्रभाण्डे कनकं निधाय सवज्रनीलोप्तपद्मरागम् ।

समुक्तवैडूर्यसविद्रुमं च तद्राजतं पात्रमधोमुखं स्यात् ।

तद्राजतं पूर्वोक्तपिधानपात्रम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं तु तं भद्रनिधिं सुविद्वान् कृत्वासने प्रावरणोपयुक्ते ।

प्रावरणे ततोत्तरच्छदेनोपयुक्ते सहिते ।

कुशोत्तरे दर्पणचामराद्यं सपादुकोपानहछत्रयुक्तम् ॥

तं क्षौमवस्त्रोत्तमयुग्मयुक्तं सम्पूजयेन्मन्त्रवरैरथैतैः ।
आदौ तु पञ्चामृतमर्प्य विष्णुं संस्नाप्य संसारहरं समर्च्य ॥

तथेश्वरं पावकमेव हुत्वा आमन्त्रयेद् भद्रनिधिं ततस्तं ।
श्रीखण्डकर्पूरसकुङ्कुमेन पञ्चाक्षरं नाम श्रियः प्रलिख्य ॥

नमस्तथोंकारयुतं च पात्रे तद्राजतेष्वेवमथार्चयेत्तत् ।
त्वया समस्तामरसिद्धपक्षविद्याधरेन्द्रोरगकिन्नरैश्च ॥

गन्धर्वविद्याधरदानवेन्द्रैर्युतं वृतं विश्वमिदं नमस्ते ।
समग्रसंसारकरी त्वमेव विष्णोः सदानन्दमयी च माया ॥

समस्तकल्याणमयः समाधिर्हरिप्रियो भद्रनिधे नमस्ते ।
एवं पूज्य विधानेन ततो विप्रमथार्चयेत् ॥

किरीटाङ्गदनिष्काग्र्यकुण्डलाङ्गुलिभूषणैः ।

अलङ्कृत्य हरिं तद्वत् पीताम्बरधरं ततः ।
पूजयेदच्युतं ध्यात्वा मन्त्रेणानेन भक्तिमान् ॥

भूदेवोऽसि विभो नित्यं नित्यानन्दमयो हरे ।

हर मे दुष्कृतं कर्म कृपाकर नमोऽस्तुते ।

भूदेव भगवन् गर्भभवभङ्गकरेश्वर ।
भव भूतिकरो जिष्णो प्रभविष्णो नमोस्तु ते ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं पूज्य हृदि ध्यात्वा तं द्विजं विष्णुरूपिणं ।
ततो भद्रनिधिं दद्यान् मन्त्रेणानेन मानवः ॥

स्वगोत्रोच्चरणेनादौ विष्णोर्नाम महात्मनः ।
यवदर्भतिलैः सार्धमुदकं संपरित्यजेत् ॥

पितृसंतारणार्थाय नित्यानन्दविवृद्धये ।
सर्वाघौघविनाशाय विष्णोर्दानं मया कृतम् ॥

तंदनेन सरत्नेन धातुत्रययुतेन च ।
सक्षौमाम्बरप्रयुक्तेन सादर्शपादुकेन च ॥

सासनेन सछत्रेण चामरोपानहेन च ।
सदानन्दविधानेन प्रीयतां विष्णुरीश्वरः ॥

एवमुच्चार्य तं दद्याद् द्विजाय हरिरूपिणे ।
प्येन विधिना दद्याद्धेमसंख्यां न कीर्तयेत् ॥

प्रकीर्तिते कोटियुगायुतं फलं प्रगोपिते कल्पयुगैर्न संक्षयः ।
इतीदमाज्ञाय न कीर्तयेत् सुधीर्निधानमध्ये निहितं च यद् भवेत् ॥

एवं कृते स्यान् मनुजः कृतात्मा भवेन्न च स्यान्मरणं कदाचित् ।
प्रयाति विष्णोः पदमव्ययं तत् शिवात्मकानन्दमयं स साक्षात् ॥

इति भद्रनिधिदाननिरूपणम् ।

———(:o:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ भद्रनिधेः प्रयोगः

पूर्णिमोपरागयुगादिप्रभृतिप्रोक्तकाले पुण्ये देशे यजमानः कृतनित्यक्रियः प्राग्वदनोपविष्टः सकुशोपग्रहपाणिः प्रागुदक्प्लवेऽनुपहतोपलिप्ते भूभागे पीठादौ [1]सोत्तरच्छदे कुशोत्तरे प्रागुक्तप्रकारेण यथाशक्ति [2]विरचितं भद्रनिधिं क्षौमवस्त्रद्वयावृतं स्थापयित्वा परितो दर्पण[3]चामरपादुकोपानच्छत्राणि चासाद्य पुरतो हरिहरौ स्थापयित्वा यथावत् पञ्चामृत [4]स्नपनपूर्वकं सम्पूज्य प्रागुत्तरे देशे स्वगृह्यानुसारेणाग्निस्थापनादिकर्म कृत्वा घृताक्ततिलादिभिरष्टोत्तर[5]शतादिसङ्ख्यया हुत्वा श्रीखण्डकुङ्कुमकर्पूरैः प्रणवादिश्रियै नम इति पञ्चाक्षरमन्त्रं निधिकुम्भे अपिधाने च लिखित्वा तेनैव भद्रनिधिमुपचारैः सम्पूज्य गृहीतकुसुमाञ्जलिः भद्रनिधिं प्रदक्षिणीकृत्य त्वया समस्तामरसिद्धेत्यादिपूर्वोक्तोपस्थानमन्त्राभ्यामुपस्थाय पुष्पाञ्जलिं प्रक्षिप्य नमस्कृत्योदङ्मुखमाचार्यं किरीटाङ्गदनिष्काभ्यकुण्डलाङ्गुलिभूषणपीतवासश्चन्दनादिभिः सम्पूज्य तं विष्णुरूपिणं ध्यात्वा कुसुमपाणिः 'भूदेवोऽसि विभो नित्यम्' इत्यादिमन्त्राभ्यां पुष्पाञ्जलिनाऽभ्यर्च्य कुशयवतिलान्यादायाऽमुकगोत्रोऽमुकशर्माऽहं सर्वपापक्षय[6]सकलपितृसन्तारणनित्यानन्दविवृद्धिशिवात्मकानन्दमयाव्ययविष्णुपदप्राप्तिकामोऽमुकगोत्रायामुकशर्मणेऽमुकशाखाध्यायिने इमं भद्रनिधिं सरत्नधातुत्रयात्मकं सक्षौमाम्बरयुग्ममादर्शपादुकोपानच्छत्रासनोपकरणसहितं विष्णुरूपिणे तुभ्यं सम्प्रदद इति तद्धस्ते जलं दद्यात्। स च सावित्रेण यजुषा प्रतिगृह्य ॐ स्वस्तीत्युक्त्वा कामस्तुतिं पठेत्। ततः कृतैतद्भद्रनिधिदानप्रतिष्ठार्थमिदं सुवर्णमग्निदैवतं दक्षिणां सम्प्रदद इति दक्षिणां दत्त्वा अनेन भद्रनिधिदानेन भगवानीश्वरो विष्णुः प्रीयतामिति वदेत्।

इति भद्रनिधिदानप्रयोगः।

इति भद्रनिधिदाननिरूपणम्॥

---

1. सोतरच्छदे–A. and D. 2. विरचिति°–A. and D. 3. वामर–D. 4. सूपनपूर्वकं–A. 5. सीतादि–A. 6. कलपितृ–D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ शतमाननिरूपणम्

ब्रह्माण्डपुराणे —

[1]ब्रह्मोवाच —

शृणुष्वावहितो दानं ब्रवीमि तव नारद ।
शतमानमिति प्रोक्तं सर्वपापप्रणाशनम् ॥

आयुष्यं श्रीकरं पुण्यमारोग्यं सन्ततिप्रदम् ।
भुक्तिमुक्तिप्रदं [2]स्वर्ग्यं सर्वमङ्गल्कारकम् ॥

पुण्यकालेषु सर्वेषु चन्द्रसूर्यग्रहादिषु ।
नित्यं वा कारयेद्दानं जन्मर्क्षेषु विशेषतः ॥

पुण्यदेशेषु सर्वेषु गृहदेवालयादिषु ।
यत्र साधनसम्पत्तिस्तत्र दानं समाचरेत् ॥

गव्येन भूमिं शकृता जलेन
आलिप्य मध्ये तिलतण्डुलैश्च ।
सरोरुहं केसरभूषणाढ्यं
सकर्णिकं चाष्टदलं विलिख्य ॥

तस्मिन् हिरण्यं शतमानमात्रं
निधाय तस्योपरि संविचिन्त्य ।
ब्रह्माणमीशं कमलासनस्थ–
माराध्य गन्धादिभिरादरेण ॥

1, नास्ति–D, 2. स्वग्र्यं–A. & D. 3. कारक–A, कारकं–D,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विप्रं तथा वेदविदं वरिष्ठं
विचिन्त्य बुद्ध्या नुतमर्चयित्वा ।
दद्याद्धिरण्यं शतमानमस्मै
सम्प्रीयतामात्मभूरित्युदीर्य ॥

शतमानमात्रमिति शक्त्यनुसारेण कृष्णलादि[1]शतमानमात्रमित्यर्थः ।

योऽसौ दानं शतमानं हिरण्यं
दद्यादायुस्सर्वमेवैति चोक्तम् ।
अतः कुर्यान्नारदैतत् सकृद्वा
नित्यं मासं हायनं शक्तितो वा ॥

जाम्बूनदं जातरूपं सुवर्णं काञ्चनं तथा ।
हिरण्यं चेति नामानि क्रमादेतानि नारद ॥

अत्र सकलकलुषक्षयसम्पूर्णायुष्ट्वारोग्यसन्तानैश्वर्यसकलमङ्गलावाप्तिपूर्वक–स्वर्गलोकप्राप्तिकाम इति [2]दानवाक्ययोजनम् ।

इति शतमानदाननिरूपणम् ।

———(:o:)———

1. शतनमात्र D. 2. क्येवोयोजनम् D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ हेमदानविधिः

अथ वायुपुराणोक्तहेमदानविधिः —

हेमदानमथो वक्ष्ये यदुक्तं वेधसा मम ।
अग्निगर्भं पवित्रं च आयुरारोग्यवर्धनम् ॥

निष्कमात्रं पवित्रं वा तदर्धं पादमेव वा ।
तण्डुलाढकसम्पूर्णे पात्रे पात्रान्तरं न्यसेत् ॥

[1]अर्धाढकतिलैः पूर्णं तस्योपरि घृतान्वितम् ।
तिलार्धमानतः पात्रं घृते तद्धेम विन्यसेत् ॥

गोमयेनोपलिप्तायां भूमौ तत् त्रितयं न्यसेत् ।
विप्रं च तद्धिरण्यं च [2]शम्भुं स्मृत्वा प्रपूजयेत् ॥

आत्मच्छायां हिरण्यं च तिलतण्डुलमेव वा ।
विलोक्य दद्याद्विप्राय शिवः सम्प्रीयतामिति ॥

दद्यादनेन विधिना नित्यं मासेऽयनेऽपि वा ।
संवत्सरे वा मत्प्रीत्यै मत्सायुज्यपरं यतः ॥

आयुरारोग्यसम्प्रीतिरस्मिन्काले भविष्यति ।

इति हेमदानम् ।

---

1. श्लोकार्धाविमौ न स्तः D; 2. सिं भुं, शभुंD.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ रजतदानम्

अथ [1]प्रसङ्गाद् रजतदानम्। तदुत्पत्तिर्नन्दिपुराणे —

अथ देवो विरूपाक्षः प्रत्यालीढसमाश्रितः।
[2]स्थानकं शरमादाय सर्वदेवमयं तदा॥

आकृष्य मन्दरं चापं [3]वासुकिज्यावनामितम्।
त्रिपुरस्य वधार्थाय [4]निर्निमेषैर्विलोचनैः॥

[5]ततोऽश्रुकण एकस्मादपतत्तस्य लोचनात्।
तस्माद्रुद्राक्षमभवच्छारवाढ्यं विटपोज्ज्वलम्॥

द्वितीयनेत्रादपतदश्रुबिन्दुश्च वामकात्।
तस्माद्रजतमुत्पन्नं[6] पितृकर्मसु शंसितम्॥

रजतेन समायुक्तं यद्यत् श्राद्धेषु किञ्चन।
तत्तदक्षयमित्युक्तं रहस्यं पितृभिः स्वयम्॥

स्कन्दपुराणे —

यः प्रयच्छति विप्राय रजतं वापि निर्मलम्।
[7]स विधूयाशु पापानि स्वर्गे लोके महीयते॥

रूपवान् सुभगः श्रीमानिहलोकेषु जायते।

---

1. प्रसङ्गाद्रजत्त A. प्रसङ्गाद्रजत्न D. 2. स्थानं कं D. 3. वासुकित्पावरमितं A. 4. निर्तिमैषै A. D. 5. ततोश्रुकणमैंकस्मा A. D. 6. मुत्पभं D. 7. विधूयाशु A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मत्स्यपुराणे —

पितॄणां राजतं पात्रमथवा [1]रजतान्वितम् ।
शिवनेत्रोद्भवं यस्मात् तस्मात् तत् पितृवल्लभम् ॥

अमङ्गलं च यज्ञेषु देवकार्येषु वर्जयेत् ।
रजतं दक्षिणामाहुः पितृकार्येषु सर्वदा ॥

इति रजतदानविधिः ।

——(:०:)——

1. राजतान्वितम् A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथाश्वदाननिरूपणम्

स्कन्दपुराणे —

अश्वं यस्तु प्रयच्छेद्वै हेमचित्रं सुलक्षणम् ।
स तेन कर्मणा चैव गान्धर्वं लोकमश्नुते ॥

महाभारते —

सर्वोपकरणोपेतं युवानं दोषवर्जितम् ।
योऽश्वं ददाति विप्राय स्वर्गलोके महीयते ॥

तथा —

यावन्ति रोमाणि हये भवन्ति हि नरेश्वर ।
[1]तावतो वाजिदा लोकान् प्राप्नुवन्ति [2]सुपुष्कलान् ॥

तद्दानमन्त्रः —

मत्स्यपुरांणे —

[3]उच्चैश्रवास्त्वमश्वानां राज्ञां विजयकारकः ।
सूर्यवाह नमस्तुभ्यमतः शान्तिं प्रयच्छ मे ॥

इति अश्वदाननिरूपणम् ।

----(:0:)----

---

1. तावतो A. 2. षुपुष्कलान् D. 3. उच्चैश्रवा D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ श्वेताश्वदानम्

गरुडपुराणे —

अश्वमेधमखं यस्तु कलौ कर्तुं समीहते ।
अश्वदानं तु तेनेह कर्तव्यं विधिपूर्वकम् ॥

विधिं तस्य प्रवक्ष्यामि ब्रह्मणा निर्मितं पुरा ।
श्वेतमश्वं शुभं स्नातं हैमपल्याणभूषितम् ॥

रौप्यैस्तु कटकैः शुद्धैः करिदन्तोपशोभितम् ।
वज्रनेत्रं खुरैस्ताम्रैः क्षौमपुच्छं सुवाससम् ॥

शुभ्रेण पट्टकेनैव संवृतं स्वायुधान्वितम् ।
धान्यरत्नोपरिस्थं तु बद्धकक्षं सुपट्टकम् ॥

एवं सुतेजसं चाश्वं ब्राह्मणाय निवेदयेत् ।
सुरूपाय सुवृत्ताय विदुषे च सुवृत्तये ॥

दातव्यो मन्त्रमुख्याय दातव्यो भास्कराय च ।
मन्वादौ च युगादौ च अयने विषुवे तथा ॥

चन्द्रसूर्यग्रहे चैवमश्वं दत्त्वा सुखी भवेत् ।

अश्वपूजामन्त्रः —

मार्तण्डाय सुवेगाय काश्यपाय त्रिमूर्तये ।
[1]जगद्दीपाय सूर्याय त्रिवेदाय नमोऽस्तु ते ॥

---

1. तगदीपाय D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं समुच्चरेन्मन्त्रं कर्णे दद्यात् तिलोदकम् ।
महार्णवे समुत्पन्न उच्चैःश्रवसपुत्रक ॥

मया त्वं विप्रमुख्याय दत्तो हय सुखी भव ।
इमं विप्र नमस्तुभ्यमश्वं ते प्रतिपादितम् ॥

प्रतिगृह्णीष्व विप्रेन्द्र मया [1]दत्तं सुशोभनम् ।
कर्णे समर्पणं कृत्वा विप्रहस्ते जलं क्षिपेत् ॥

पश्चादश्वपुरो गच्छेत् पदानां सप्तसप्ततिम् ।
भास्करं मनसि ध्यात्वा आलोक्य स्वगृहं व्रजेत् ॥

श्वेतमश्वं तु यो दद्यात् फलं शतगुणं भवेत् ।
[2]वडवां च तथा दत्त्वा तुल्यमेव फलं भवेत् ॥

एवं कृते नरव्याघ्रार्यमलोके व्रजेन्नरः ।
ब्रह्महत्यादिपापानि तथान्यानि बहून्यपि ॥

तानि सर्वाणि नश्यन्ति दत्त्वा ह्यश्वं विधानतः ।
त्रिंशत्पूर्वांश्च मेधावी त्रिंशच्चैव परावरान् ॥

सम्यग् दत्त्वाश्वदः पुत्रो नरकादुद्धरेत् पितॄन् ।
तृप्यन्ति पितरः सर्वे वलन्ति च हसन्ति च ॥

वाजिप्रदः कुले जातस्ततो वैमानिका वयम् ।
वाजिप्रदेन पुत्रेण उद्धृता नरकार्णवात् ॥

हयदानफलं ह्येतद्यल्लोका अक्षया नृणाम् ॥

---

1. दतः A. D. 2. वडवं च D. 3. वलान्ति A. D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्रैव दानवाक्यम् —

अद्येत्यादिदेशकालकीर्तनान्तेऽमुकगोत्रा[1]मुकवेदामुकशाखाध्यायिनेऽमुकशर्मणे तुभ्यं ब्राह्मणाय सकलपापक्षय *त्रिंशत्रिंशत्पूर्वापरपित्रुद्धरणपूर्वकाक्षयसूर्याक्षिलोकप्राप्तिकामोऽमुमश्वं हैमपल्याण(भू)षितरौप्यकटककरिदन्त*वज्रमयनेत्र ताम्रमयखुरक्षौमपुच्छस्वर्णतिलकोपशोभितं सुबद्धकक्षं स्वायुधान्वितं सुग्रैवेयकं सुवासःसंवीतं धान्यरत्नोपरिस्थितं तुभ्यमहं सम्प्रददे न ममेति दत्त्वा कर्णं धृत्वा समर्पयेत्। ततः सुवर्णदक्षिणादानम् ॥

इति श्वेताश्वदानविधिः।

———(:o:)———

1. गोना A. D. * अयं भागो नास्ति D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ तिलदानम्

तत्र व्यासः —

महर्षेः कश्यपस्यैते गात्रेभ्यः प्रसृतास्तिलाः ।
ततो दिव्यं गता भावं प्रदानेषु तिलाः प्रभो ॥

मत्स्यपुराणे —

विष्णोर्देहसमुद्भूताः कुशाः कृष्णतिलास्तथा ।
धर्मस्य रक्षणायालमेतत् प्राहुर्दिवौकसः ॥

संवर्तः —

नित्ये नैमित्तिके काम्ये तिलान् दत्त्वा स्वशक्तितः ।
प्रजावान् पुत्रवान्नित्यं धनवाञ् जायते नरः ॥

कूर्मपुराणे —

कृष्णाजिने तिलान् कृत्वा सुवर्णं मधुसर्पिषी ।
द्रोणैकं वा समाच्छन्नं त्रिधा तद्वत् सदक्षिणम् ॥

आहिताग्नौ द्विजे दत्त्वा सर्वं तरति दुष्कृतम् ।

अत्र त्रिधेति हीनमध्यमोत्तमभेदेन द्रोणमात्रेण द्रोणद्वितयेन द्रोणत्रितयेनेति पक्षत्रयेणेति व्याकृतं हेमाद्रिणा । तद्वत् सदक्षिणमिति पूर्वोक्तद्रोणैकादिपक्षानुसारेण क्रमादेकद्वित्रिसुवर्णदक्षिणासहितमित्यर्थः ।

इति तिलदानम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्रैव —

तिलमृगदानम्

मृगं तिलमयं कृत्वा सुवर्णरजतान्वितम् ।
दद्यात् कम्बल[1]संवीतं कृष्ण[2]मार्गाजिनेन वा ॥

सर्वकामसमृद्धेन विमानेन दिवं व्रजेत् ।
कालक्षयादिहागत्य राजराजो भवेत् पुनः ॥

विष्णुस्मृतौ —

ताम्रपात्रे तिलान् कृत्वा पलषोडशकल्पिते ।
सहिरण्यं स्वशक्त्या च विप्राय प्रतिपादयेत् ॥

नाशयेत् त्रिविधं पापं वाङ्मनःकायसम्भवम् ।

इति तिलमृगदानम् ।

---

1. संवीकृष्णमार्ग्रा–A. 2. मार्ग्राजिनेनद्य–D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ मातृणापाकरणतिलपूर्णकांस्यपात्रदानम्

आदित्यपुराणे पितामह उवाच —

श्रृणुध्वं देवताः सर्वा ऋषयश्च तपोधनाः ।
मुक्ता भवन्ति येनेह मानवा मातृजादृणात् ॥

यज्ञं सौत्रामणिं कर्तुं यदि शक्तिर्न विद्यते ।
महासरस्तथा वापीं कूपं कर्तुं च दीर्घिकाम् ॥

एवं कृते मातृऋणान्मुक्तो भवति मानवः ।
सदक्षिणं कांस्यपात्रमथ दत्त्वा प्रमुच्यते ॥

ऋषय ऊचुः —

भगवन् कांस्यपात्रस्य विधिं सम्यक् प्रकीर्तय ।
यत्प्रमाणं यत्स्वरूपं यस्मिन्काले च दीयते ॥

यादृशाय प्रदातव्यं दानमेतद् द्विजातये ।
यादृशेन च दातव्यं न दद्याद्यादृशाय च ॥

पितामह उवाच —

शुद्धकांस्यस्य पात्रस्य प्रमाणं पञ्चविंशतिः ।
पलानामत्र निर्दिष्टं तिलानां प्रस्थसप्तकम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुवर्णमाषांश्चतुरः पात्रोपरि निधापयेत् ।
वस्त्रेण वेष्टयेत् पात्रं प्रधानेन सुभक्तितः ॥

स्नानं कृत्वा निम्नगादौ पितॄन् देवांश्च तर्पयेत् ।
ततोऽभिपूजयेच्छम्भुं [1]शङ्करं हरिमेव वा ॥

गोमयेनाथ संलिप्य गृहमध्ये च सर्वतः ।
लिखेत् पद्मं द्वादशारं कुङ्कुमेनाथ चन्दनैः ॥

ततो वह्निं स्थापयित्वा होमं कुर्याद्यवैस्तिलैः ।
तत्र पात्रं प्रतिष्ठाप्य [2]पूजयेद्भक्तिसंयुतः ॥

गन्धचन्दनपुष्पादिधूपदीपैश्च शोभितम् ।
ततो ब्राह्मणमाहूय बहुभृत्यं सुसंयतम् ॥

परस्त्रीवर्जकं शान्तमलङ्कृत्य यथाविधि ।
दाम्भिकं वर्जयेन्नित्यं परस्त्रीरतिलालसम् ॥

क्षुद्रं मत्सरशीलं च ब्रह्मबन्धुमशौचकम् ।
पादौ प्रक्षाल्य विधिवन्मातृश्राद्धं समाचरेत् ॥

तत्र सम्पूजयेद्विप्रं पुष्पधूपविलेपनैः ।
वस्त्राणि परिधाप्योऽसौ सुभव्यानि मृदूनि च ॥

अलङ्कृत्य यथाशक्त्या माघ्यां वा मृतवासरे ।

मृतवासरे मातुरिति शेषः ।

ग्रहणे रविसोमाभ्यां सङ्क्रान्तिषु युगादिषु ।
तथान्यदपि यद्दत्तं माघ्यामुद्दिश्य मातरम् ॥

---

1. शकरं–A. शकर–D. 2. पूजेद्भक्ति–A. D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तदक्षयफलं सर्वं पुरा प्राह महेश्वरः ।
जीवन्तीं भूषयेद् वस्त्रैर्भोज्यैरपि विभूषणैः ॥

मृतामुद्दिश्य दातव्यं माघ्यां सर्वं स्वशक्तितः ।

अमावास्या यथा दत्ता पितॄणां च पुरा मया ।
तथा माघी मया दत्ता मातॄणां नात्र संशयः ॥

दत्तं जप्तं हुतं स्नातं विधिवत् तर्पणं कृतम् ।
तदक्षयफलं सर्वं जायते मुक्तिरेव च ॥

विप्रं सम्पूजयित्वा तु तत्पात्रं तस्य दापयेत् ।
प्रणम्य विधिवद्भक्त्या मन्त्रमेतमुदीरयेत् ॥

कांस्यपात्रं मया दत्तं मातुरानृण्यकाङ्क्षया ।
भगवद्वचनात्तुभ्यं यथा मुक्तिस्तथा वद ॥

दश मासाश्च उदरे जनन्याः संस्थितस्य मे ।
क्लेशिता बालभावेन स्तनपानाद् द्विजोत्तम ॥

गूथमूत्रादिसंलेपलिप्ता यच्च कृता मया ।
भवतो वचनादस्य मम मुक्तिर्भवेद्गणात् ॥

कांस्य पात्रं सुवर्णं च तिलान्वस्त्रादिदक्षिणाम् ।
सप्तधान्यं मया दत्तमृणमुक्तिर्भवेन्मम ॥

कांस्यपात्रप्रदानेन तत्त्वज्ञानं शरीरकम् ।
तथा हेमप्रदानेन परमात्मानमव्ययम् ॥

आच्छादनं तु ब्रह्माण्डं गुह्यमेतत् सनातनम् ।
विप्राच्छादनदानेन परमात्मा स पूजितः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तिलसंख्याकृतं दुःखं जनन्या मम सेवितम् ।
तिलदानप्रभावेन कृते मुक्तो भवाम्यहम् ॥

मम कृते इति सम्बन्धः ।

फलादिरवचितं कृत्वा तज्जलेन विभूषितम् ।
एवमुक्त्वा ततः पात्रं प्रदद्याद् ब्राह्मणस्य च ॥

ब्राह्मणेन ततो वाच्यं जननीसम्भवादृणात् ।
मुक्तस्त्वं पात्रदानेन महेश्वरवचो यथा ॥

दत्त्वा विप्रस्य पात्रं तु होमं कुर्यात् प्रयत्नतः ।
सोपस्करं सताम्बूलं समाप्य तु विसर्जयेत् ॥

अन्येषामपि विप्राणां भोजनादि प्रदापयेत् ।

भक्त्या शक्त्या ससन्मानं पूज्य विप्रान् प्रयत्नतः ।
एवं कृते ततो भूप ऋणान्मुक्तिर्न संशयः ॥

जननीसम्भवादस्मान्नान्यथा क्वचिदेव हि ।
पुरा मातृवधोद्भूतपापशोकितचेतसा ॥

जामदग्न्येन रामेण प्रदत्तं कांस्यभाजनम् ।
वसिष्ठतनयान् हत्वा विश्वामित्रेण धीमता ॥

पुरा दानमिदं दत्तं पातकव्रातशान्तये ।
अकृत्वा मातृवचनं पन्नगैः शापसंयुतैः ॥

केश्चिच्छोकपरैर्भूत्वा माता पश्चात् प्रसादिता ।
शापतो निष्कृतिं ब्रूहि न वाक्यं यत् कृतं तव ॥

शापोऽपि भवतां देवि नानृणानां दुरात्मनाम् ।
कथयामास सा तेभ्यः कांस्यपात्रं सविस्तरम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दत्त्वा दानं विनिर्मुक्ता भविष्यथ न संशयः ।
भुजगैस्तत्कृतं पूर्वं मातृवाक्येन गर्हितैः ॥

कांस्यपात्रप्रदाने तु पापमुक्तास्ततोऽभवन् ।
विधानं कांस्यपात्रस्य सर्वमेतन् मयोदितम् ॥

अन्यथा न तरिष्यन्ति ऋणान् मातृसमुद्भवात् ।

इति मातृणापाकरणतिलकांस्यपात्रदानम् ।

———(:०:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ प्रयोगः

मातृमृतवासरमाध्याद्युक्तकालदेशयोर्दानं चिकीर्षुर्यजमानो नद्यादौ कृतस्नानादिक्रियो देवर्षिपितॄन् सन्तर्प्य गृहमध्ये शुद्धे गोमयेनोपलिप्य कुङ्कुमचन्दनाभ्यां द्वादशदलं पद्मं विलिख्य तत्र पञ्चविंशतिपलपरिमितं कांस्यपात्रं तिलप्रस्थसप्तकपूरितमुपरिस्थापितस्वर्णमाषचतुष्टयं भव्यवस्त्रवेष्टितं विन्यस्य तत्र यथावद्धरिं शङ्करं वा आवाहनाद्युपचारैः सम्पूज्य परितः सप्तधान्यानि फलानि वाऽऽसाद्य प्रतिष्ठापूर्वं गन्धधूपदीपाद्यैरभ्यर्च्य पुरतोऽग्निं प्रतिष्ठाप्य स्वगृह्योक्तविधिनाऽऽज्याक्तैस्तिलैर्यवैश्च वैष्णवशैवान्यतममंत्रेणाष्टोत्तरशताद्याहुतीर्हुत्वा मातृक्षयाहश्चेन्मातृश्राद्धं कृत्वा जीवन्त्यां मातरि तां वस्त्रगन्धादिभिरलङ्कृत्य प्रतिग्रहीतारं पूर्वोक्तलक्षणं ब्राह्मणं गन्धपुष्पमुद्रिकाकु(ण्ड)लादिभिरभ्यर्च्य सुसूक्ष्मं मृदुलं वासः परिधाप्यालङ्कृत्योदङ्मुख उपवेश्य कुशतिलजलान्यादायाद्येत्यादिदेशकालकीर्तनान्तेऽमुकगोत्रायामुकशर्मणेऽमुकशाखीयवेदाध्यायिने ब्राह्मणायेदं पलपञ्चविंशतिपरिमितं कांस्यपात्रं प्रस्थसप्तकमिततिलपूरितंस्वर्णमुत्तमवस्त्रवेष्टितं परितःस्थापितसप्तधान्यफलादियुतं मातुरानृण्यकामस्तुभ्यमहं सम्प्रददे न ममेति तद्धस्ते दद्यात् । स च सावित्रेण यजुषा प्रतिगृह्य ॐ स्वस्तीत्युक्त्वा कामस्तुतिं पठेत् । ततः कृतैतत्कांस्यपात्रप्रतिष्ठार्थमिदं सुवर्णमग्निदैवतं दक्षिणां तुभ्यमहं सम्प्रदद इति दक्षिणां दत्त्वा प्रणम्य कांस्यपात्रं मया दत्तमित्यादीन् पूर्वोक्तान्मन्त्रान् पठित्वा ब्राह्मणं नमस्कुर्यात् । ततस्तेन मातॄणान्मुक्तोऽसीति प्रत्युक्तः पुनर्व्याहृतिभिर्होमं कृत्वा ब्राह्मणं विसृज्यान्यानपि ब्राह्मणान् यथाशक्ति सम्पूज्य भोजयेत् ।

इति तिलकांस्यपात्रदानप्रयोगः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ तिलराशिदानविधिः

तत्र यमः —

सर्वपातकसङ्घातं कामतो [1]वाप्यकामतः ।
शुद्धिं तस्य प्रवक्ष्यामि स्वर्गसाधनमेव वा ॥

कामतो वाप्यकामत इत्यत्र येन कृत इति शेषः ।

शुक्लैः कृष्णैर्यथालब्धैर्द्वात्रिंशदङ्गुलोच्छ्रितः ।
राशिस्तिलैः समे देशे कर्तव्यः पुरुषायतः ॥
यथाविभवविस्तारो यदि वा शक्तितो नरैः ।
प्रतिमाष्टाङ्गुला स्थाप्या सौवर्णी तत्र माधवी ॥

माधवमूर्तिलक्षणं नारदीये —

आरभ्य वामोर्ध्वकरमपसव्यक्रमेण तु ।
शङ्खचक्रगदापद्मान् दधानो माधवः स्मृतः ॥ इति ।
क्षौद्रेण पयसा दध्ना घृतेनापूरयेद् घटान् ।
स्थापयेत्तत्र तं रुक्मं पुष्पस्रग्वस्त्रभूषितम् ॥

तत्र पूर्वादिदिक्चतुष्टयस्थापितप्रत्येकदधिघृतपयोमधुपूर्णघटचतुष्टयमध्यस्थ-तिलराश्युपरीत्यर्थः । रुक्मं हेमरूपं तं पूर्वोक्तं माधवमित्यर्थः ।

शक्त्या चाभ्यर्च्य तत्सर्वं ब्राह्मणश्रोत्रियार्थिने ।
दद्यान् माघेऽथ वैशाखे विषुवे चोत्तरायणे ॥
अज्ञानाद्यदि वा मोहाल्लोभाद्वा जन्मजन्मनि ।
अर्जितं यन्मया किञ्चिद्दुष्कृतं मधुसूदन ॥
तत्सर्वं विलयं यातु दानेनानेन माधव ।
एवमुच्चार्य तत्सर्वं ब्राह्मणाय निवेदयेत् ॥
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ।

इति तिलराशिदानविधिः ।

---

1. वाथकामतः A. D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ तिलपद्मदानम्

महाभारते —

यम उवाच —

सर्वयज्ञेषु यत्पुण्यं सर्वदानेषु यत्फलम् ।
यद्दत्त्वा लभते विप्र तद्दानं कथयामि ते ॥

रहस्यं सर्वदानानां कथ्यमानं मया शृणु ।
पुण्येऽस्मिन् भारते वर्षे दानानामतिदुर्लभम् ॥

तिलपद्ममिति ख्यातं सुरासुरनमस्कृतम् ।
माघमासे तु सम्प्राप्ते शुक्लपक्षे द्विजोत्तम ॥

गोमयं मण्डलं कृत्वा चतुरस्रं महामते ।
नववस्त्रं समास्तीर्य कृष्णाजिनसमन्वितम् ॥

द्रोणावरांस्तिलांस्तत्र निधाय वसनोपरि ।
द्रोणः अवरः कनीयसी मात्रा येषाम् । द्रोणान्न्यूना न देया इत्यर्थः ।
पद्ममष्टदलं कृत्वा शुभं तत्कर्णिकोपरि ॥

निष्कत्रयं सुवर्णस्य स्थापयेच्च तथोपरि ।
श्रीनिवासं जगन्नाथं भुक्तिमुक्तिप्रदायकम् ॥

ध्यायेच्चतुर्भुजं देवं प्रणतार्तिहरं हरिम् ।
हिरण्यगर्भममृतं श्रीगर्भं परतः परम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शङ्खचक्रगदापाणिं पीतवाससमच्युतम् ।
श्रीवत्साङ्कं जगद्बीजं सर्वकारणकारणम् ॥

कविं पुराणं विश्वेशं पुण्डरीकनिभेक्षणम् ।
आसीनं कर्णिकामध्ये सर्वशक्तिसमन्वितम् ॥

कृताञ्जलिपुटो भूत्वा नमस्कृत्य पुनः पुनः ।
पूजयेत् परमेशानं श्रद्धावित्तानुसारतः ॥

इन्द्रनीलमहानीलमणिमुक्ताफलादिभिः ।
आराधयेद्यथाशक्त्या देवदेवं जनार्दनम् ॥

गन्धैः पुष्पैस्तथा दीपैर्नैवेद्यैश्च मनोरमैः ।
क्षीरान्नैर्घृतपक्वैश्च फलैर्दिव्यैरनेकधा ॥

पुष्पाणां प्रकरैश्चैव गीतनृत्यादिभिस्तथा ।
इत्थमाराध्य देवेशं ताम्बूलं विनिवेदयेत् ॥

पञ्चसौगन्धिकोपेतं श्रद्धापूतेन चेतसा ।

पञ्चसौगन्धिकं परिभाषायां द्रष्टव्यम् ।

तिलप्रस्थं घृतप्रस्थं दध्याढकमतः परम् ॥

स्थापयेत् पार्श्वतस्तस्य धान्यपात्राणि षोडश ।
एवमाराध्य तत्पद्मं तिलद्रोणमयं शुभम् ॥

एकरात्रं द्विरात्रं वा त्रिरात्रमथ वा द्विजः ।
तिलाहारो भवेत् पूर्वमुपवासमथापि वा ॥

कुर्यात् स्वकायशुद्ध्यर्थं वासुदेवमनुस्मरन् ।
ततो दद्याच्च तत्पद्मं शुचिर्भूत्वा समाहितः ॥

विज्ञातकुलशीलाय ब्राह्मणाय कुटुम्बिने ।
जितेन्द्रियाय शान्ताय प्रसन्नायात्मवेदिने ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रागद्वेषविहीनाय वैष्णवाय विशेषतः ।
एतद्गुणान्वितायैव यथायोगं यथाक्रमम् ॥

दातव्यं तत् प्रयत्नेन तिलपद्मं विधानतः ।
प्रीयतां माधवो देव इत्युक्त्वा तमनुस्मरन् ॥

हिरण्यगर्भ देवेश पद्मनाभ जनार्दन ।
हिरण्याक्ष गुणाधार सर्वाधार [1]धरेश्वर ॥

धनधान्यसमृद्धं च सर्वसम्पत्समन्वितम् ।
अरोगं च सुपुत्रं च सर्वदुःखविवर्जितम् ॥

कुरु मां परमोदार भक्तोऽयमिति चिन्तयन् ।
इत्थं प्रसाद्य देवेशं वासुदेवं सनातनम् ॥

[2]दद्यात्तिलमयं पद्मं सर्वकामसमृद्धये ।
ब्राह्मणश्चापि गृह्णीयाद् वाचयेत् तु प्रतिग्रहम् ॥

कोऽदात् कस्मा अदादिति वैदिकं मन्त्रमुच्चरेत् ।
एवं तिलमयं पद्मं यो ददाति विधानतः ॥

सर्वसत्त्वसमाकीर्णं नरकं स न पश्यति ।
स्वयं भवति पूतात्मा पितॄनथ पितामहान् ॥

[3]प्रपितामहांश्च धर्मात्मा तारयेदखिलं कुलम् ।
धर्मार्थी धर्ममाप्नोति धनार्थी धनमाप्नुयात् ॥

मोक्षार्थी मोक्षमाप्नोति नात्र कार्या विचारणा ।
पातकी मुच्यते पापात् पितृघ्नो गुरुतल्पगः ॥

---

1. धधरेश्वर–A;D. 2. तद्यातिलमयं–A;D, 3. मापितामह–A, यमितामह–D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सर्वपापरतो वापि मुच्यते नात्र संशयः ।
इच्छन्ति [1]पितरः पुत्रान्पौत्रांस्तद्वंशसम्भवान् ॥

अस्मद्वंशभवः कश्चित्तिलपद्मं विधास्यति ।
यस्तु राजा धनपतिः समृद्धोऽतीव धार्मिकः ॥

आराध्य विप्रं विधिना वस्त्रालङ्कारभूषणैः ।
वाहनादिभिरन्यैश्च ग्रामक्षेत्रादिकैस्तथा ॥

यत् फलं जायते तस्य द्विजदानपरस्य च ।
परिच्छिन्नं भवेत्तत्र नात्र कार्या विचारणा ॥

यस्त्विदं विधिवद्दद्यात्तिलपद्मं च धार्मिकः ।
तस्य दानफलं यस्मान्न तस्यान्तोऽत्र विद्यते ॥

इति तिलपद्मदानविधिः ॥

----(:०:)----

1. पितसृपुत्राप्नौत्रास्मद्वंश–A.––पितसः पुत्रान्पौत्रास्तद्वंश–D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ रुद्रैकादशतिलदानम्

ब्रह्माण्डपुराणे —

अतः परं ामि तिलदानमनुत्तमम् ।
यद्दत्त्वा पुरुषः स्त्री वा वैरिञ्चिं लोकमाप्नुयात् ॥

आयुरारोग्यदं पुण्यं सर्वपापप्रणाशनम् ।
शिवप्रीतिकरं नृणां पुत्रवृद्धिकरं परम् ॥

रुद्रैकादशबुद्ध्या तु विप्रानेकादशव्रती ।
प्राङ्मुखः प्रत्यगासीनान् गन्धादिभिरथार्चयेत् ॥

तिलप्रस्थद्वयं पात्रे प्रत्येकं निक्षिपेत्तथा ।
प्रत्येकं मण्डले हैमं पात्रेषु विनिवेदयेत् ॥

पात्राणि चैवमाराध्य शिवबुद्ध्या यथाक्रमम् ।
रुद्रैकादशमन्त्रैश्च दद्यादुदकपूर्वकम् ॥

रुद्रैकादशमन्त्राः प्रणवादिचतुर्थी[1]नमोन्तस्वस्वनामरूपा [2]ज्ञातव्याः । तन्नामानि च स्मृत्यन्तरे —

वीरभद्रश्च शम्भुश्च गिरीशश्च महायशाः ।
अजैकपादहिर्बुध्न्यः पिनाकी त्व[3]पराजितः ॥

भुवनाधीश्वरश्चैव कपाली च [4]विशांपतिः ।
स्थाणुर्भगश्च भगवान् रुद्रा एकादश स्मृताः ॥

इति रुद्रैकादशतिलदानविधिः ।

---

1. ननोन्तस्वस्वनाम A; नमोन्नस्व D; 2. ज्ञार्तव्याः A; ज्ञावुर्तव्याः D; 3. त्वपराजित A. D. 4. विशांपते A. D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ तिलगर्भदानम्

ब्रह्माण्डपुराणे —

अतः परं प्रवक्ष्यामि तिलगर्भमनुत्तमम् ।
यत्सम्प्रदानान् मनुजो दीर्घमायुरवाप्नुयात् ॥

अपमृत्युजयोपायो व्याधिनिर्मोक्षणक्षमः ।
तिलगर्भ इति ख्यातो रहस्यः पापनाशनः ॥

यदा ग्रहोपरोधः स्याज्जन्मर्क्षस्यातिदारुणः ।
व्याधीनां च समुत्थानमुत्पातस्यापि चोदयः ॥

तिलगर्भस्तदा कार्यः सर्वदोषोपशान्तये ।
निमित्तानन्तरं कुर्यान् नैमित्तिकविधिक्रमम् ॥

गोमयेनोपलिप्तायां क्षितावास्तीर्य वाससी ।
शालीनामाढकं मध्ये तदर्धं तण्डुलान् न्यसेत् ॥

तैस्तु पद्मं प्रविस्तार्यमष्टपत्रं सकर्णिकम् ।
कर्णिकायां न्यसेत् पद्मं सौवर्णं शक्तितः कृतम् ॥

नवरत्नानि तत्पद्मे निधातव्यानि यत्नतः ।
ततस्तद्बाह्यतः शुद्धांस्तिलान् कुर्यात् समन्ततः ॥

गर्भवद्वाससा भूयः समास्तीर्य ततः शनैः ।
गर्भं तं योनिमन्त्रेण समाधाय यथाविधि ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्रोपवेश्य पुरुषमृजूकृतसमुष्टिकम् ।
तस्याङ्गेषु न्यसेन् मन्त्रं मृत्युञ्जयमनुक्रमात् ॥

तं च देवं विरूपाक्षमर्धचन्द्रविभूषणम् ।
कल्पयित्वार्चयेन् मन्त्रैः पञ्चब्रह्मभिरादरात् ॥

योनिमन्त्रः —

'यस्यै ते यज्ञियो गर्भो यस्यै योनिर्हिरण्मयी । अङ्गान्यद्भुता यस्य तं मात्रा समजीगम, स्वाहा (वा. ८. २९) इति वाजसनेयिनां प्रसिद्धः ।

मृत्युञ्जयन्यास उक्तः शौनकेन । 'त्र्यम्बकं यजामहे' इति शिखायां न्यसेत् । 'सुगन्धिं पुष्टिवर्धनम्' इति हृदये । 'उर्वारुकमिव बन्धनात्' इति बाह्वोः । 'मृत्योर्मुक्षीय मामृतात्' इति नाभौ । (वा. सं. ३. ६०)

पादे गुल्फे च जङ्घोरुजघने कटिमेढ्रयोः ।
नाभौ कुक्षिद्वये पार्श्वे कक्षयोः कुचयोर्हृदि ॥

स्कन्धे कृकाटिकायां च कूर्परे मणिबन्धके ।
कनिष्ठानामिकामध्यातर्जन्यङ्गुष्ठपाणिषु ॥

कण्ठेऽथ चिबुके वक्त्रे नासिकाकर्णचक्षुषि ।
ललाटे मूर्ध्नि चूडायां वर्णान् मन्त्रस्य विन्यसेत् ॥

अन्यदपि मन्त्रस्य यदङ्गन्यासादिकं तत् तस्मादवगन्तव्यम् ।

पञ्चब्रह्ममन्त्राः 'ईशानः सर्वविद्यानाम्' इत्यादयः ।

तस्य मूर्ध्नि पुनः पद्मं सौवर्णं पूर्ववत् कृतम् ।
विन्यसेद्वस्त्रमावेष्ट्य तिलैरापूरयेत्ततः ॥

तद्गर्भमर्चयेद् भूयश्चिन्तयित्वाऽमृतोद्भवम् ।
अमृतस्राविणं चन्द्रं स्वेन मन्त्रेण मन्त्रवित् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ततः शतावृतं मन्त्रं मृत्युञ्जयमनुत्तमम् ।
तत उत्थापयेत्तस्माद् गर्भस्थानात् समाहितः ॥

पुनः सम्प्रोक्ष्य वारुण्या पावमानीभिरेव च ।
पूर्वदेहविनिर्मुक्तः शङ्करोऽस्मीति चिन्तयन् ॥

ब्राह्मणाय विनीताय ज्ञानिने वीतमन्यवे ।
ब्रह्मनिष्ठाय तत्सर्वं सम्प्रदद्यात् तिलोदकम् ॥

प्रीयतां भगवान् शम्भुश्चन्द्रमौलिरिति ब्रुवन् ।

अत्र तिलगर्भोपवेशनशङ्करात्मताभावनसमन्त्रकतिलादिदानानि यजमान-कर्तृकाणि । अन्यदाचार्यकर्तृकम् ।

अनेन विधिना यस्तु तिलगर्भं समाचरेत् ॥

अकालमृत्युर्न भवेत्तस्य नास्त्यत्र संशयः ।
व्याधीनां विप्रमोक्षः स्यान् महतामपि निश्चयः ॥

ग्रहदोषाः प्रणश्यन्ति प्रसीदन्ति ग्रहाः पुनः ।
उत्पातानां प्रशान्तिश्च त्रिविधानामपि क्षणात् ॥

त्रिविधानां भौमान्तरिक्षदिव्यानाम् ।

इति तिलगर्भदानविधिः ।

———(:o:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ तिलगर्भदानप्रयोगः

दीर्घायुरपमृत्युजयादिकामनायां जन्मर्क्षग्रहपीडादिनिमित्तानन्तरं वा शुद्धे गृहादिस्थाने प्राङ्मुख उपविश्य कुशतिलयवजलान्यादायाद्येत्यादिदेश-कालौ सङ्कीर्त्य जन्मर्क्षग्रहपीडाऽकालमृत्युनाशदीर्घा[1]युष्यत्रिविधोत्पात[2]सूचिता-रिष्टशान्त्युपस्थितव्याध्युपशमादिकामोऽहं तिलगर्भदानं करिष्य इति सङ्कल्प्य एकमुक्तलक्षणं स्वर्चितमाचार्यं वृणुयात्। गोमयोपलिप्ते शुद्धे भागे वासो-[3]युगलमास्तीर्य तत्र शाल्याढकं प्रसार्य तदुपर्यर्धाढकपरिमिततण्डुलैरष्टदलं पद्मं कृत्वा कर्णिकायां यथाशक्ति सौवर्णं पद्मं नवरत्नसहितं विन्यस्य परितः शुद्धांस्तिलानु-पविष्टयजमानावरणपर्याप्तान् ब्राह्मणवचनात् पुनः शुद्धान् स्थापयित्वान्येन वाससा गर्भवदावरणं कल्पयित्वा तं गर्भयोनिमन्त्रेण पूर्वोक्तेनाभिमन्त्र्य तत्र यजमान-मृजूकृतबद्धमुष्टिकमुपवेश्य तदङ्गेषु मृत्युञ्जया[4]नुष्टुब्मन्त्रन्यासं यथावत् कृत्वा तत्रैव विरूपाक्षं चन्द्रमौलिं कल्पयित्वा पञ्चब्रह्ममन्त्रैः 'ईशानः सर्वविद्यानाम्' इत्यादिभिर्यजमानमभ्यर्च्य पुनरन्यत्सौवर्णं पद्ममधोमुखं तन्मूर्ध्नि स्थापयित्वा वाससाऽवेष्ट्य तिलैरापूर्य तमन्तःस्थपुरुषं मृत्युञ्जयमन्त्रेण पुनरर्चयित्वा अमृतस्राविणं चन्द्रं तन्मन्त्रेण च सम्पूज्य शतावृत्या मृत्युञ्जयमन्त्रं ब्राह्मणैः सह जपित्वा तिलानपसार्य तस्माद् गर्भाद्यजमानमुत्थाप्य वारुणीभिः पावमानीभिः सम्प्रोक्षयेत्। अत्र यजमानः पूर्वदेहविनिर्मुक्तः शङ्करोऽहमस्मीति भावयित्वोदङ्मुखोपविष्टा-याचार्याय सोपस्करं तिलगर्भं दद्यात्। यथा—कुशयवतिलजलान्यादायाद्येत्यादि-देशकालकीर्तनान्तेऽमुकगोत्रायामुकशाखाध्यायिनेऽमुकशर्मणे [5]दीर्घायुष्यजन्मर्क्ष-ग्रहपीडाऽकालमृत्युत्रिविधोत्पातसूचितारिष्टव्याध्याद्युपस्थितबाधानिवृत्तिकाम

---

1. दीर्घायुष्टू A. दीर्घायुदृ D. 2. त्पूसूचित A. षूचित D. 3. युगल-मस्तीर्य A. युगमस्तीर्य D 4. यानुष्टुंम्मन्त्र A. D. 5. दीर्घायुष्ट्वाजन्म A.D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इमं तिलगर्भं वासः स्वर्णपद्माद्युपस्करसहितं तुभ्यं सम्प्रददे इति दत्त्वा देयद्रव्य-तृतीयांशादिरूपां दक्षिणां दत्त्वाऽनेन तिलगर्भदानेन भगवांश्चन्द्रमौलिः शङ्करः प्रीयतामिति वदेत् ।

इति तिलगर्भदानप्रयोगः ।

———(:o:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ गजदानम्

कूर्मपुराणे —

दद्याद्गजं पुराणोक्तं मूल्यं पञ्चशतानि वा ।
वित्तानुसारात् तत्रापि कनिष्ठोत्तममध्यमम् ॥

पुराणोक्तं मूल्यं हेममाषशतद्वयमिति हेमाद्रिणा व्याकृतम् । तत्र दद्याद्गजमित्युत्तमः पक्षः । तदलाभे तन्मूल्यं हेममाषाणां पञ्चशतानि दद्यात् । एष मध्यमः पक्षः । ततोऽप्यल्पवित्तश्चेत्तदा हेममाषशतद्वयं तन्मूल्यं दद्यादित्यधमः पक्षः । तदेतदुक्तं वित्तानुसारादिति ।

रूप्यस्थूणालङ्करणं तारागणविभूषितम् ।
सदक्षिणं वित्तशक्त्या दत्त्वा शिवपुरं व्रजेत् ॥

स्थूणा गजबन्धनस्तम्भिका । स्थूणा रज्जुरिति हेमाद्रौ । तारागणो मौक्तिकादिकृतो गजालङ्कारविशेषः ॥

अथ गजदानान्तरं विष्णुसंहितायाम् —

कक्षारज्जुभिरायत्तं शुभासनसमन्वितम् ।
मणिकाञ्चनमालाभिर्भूषितं कर्ण[1]चामरैः ॥

सूत्रखण्डैश्च पुष्पैश्च भूषितं दोषवर्जितम् ।
यथालाभोपपन्नं वा यः प्रयच्छति दन्तिनम् ॥

---

1. चौमरै–A. चामरौ–D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ब्राह्मणाय दरिद्राय स्वर्गलोके महीयते ।
कर्मक्षयादिहागत्य महाराजो गजाधिपः ॥

सर्वपापविनिर्मुक्तो जायते नात्र संशयः ॥

अथ लिङ्गपुराणे —

गजदानं प्रवक्ष्यामि यथावदनुपूर्वशः ।
द्विजाय वाथ दातव्यं देवदेवाय वा पुनः ॥

गजं तु लक्षणोपेतं हैमं वा राजतं तु वा ।
सहस्रनिष्कमात्रेण तदर्धेनाऽपि कारयेत् ॥

[1]तदर्धमर्धं वा कुर्यात् सर्वलक्षणलक्षितम् ।
पूर्वोक्तदेशकाले च देवाय विनिवेदयेत् ॥

अष्टम्यां वा प्रदातव्यः शिवाय परमेष्ठिने ।
ब्राह्मणाय दरिद्राय श्रोत्रियायाहिताग्नये ॥

शिवमुद्दिश्य दातव्यः शिवं सम्पूज्य पूर्ववत् ।
एवं यः कुरुते दानं शिवभक्तिसमन्वितः ॥

स्थित्वा स्वर्गे चिरं कालं राजा गजपतिर्भवेत् ॥

अथ गारुडपुराणे —

यो जगन्निधये नागं प्रयच्छति महामतिः ।
भद्रजातिसमुद्भूतं पद्मनाभाय भक्तितः ॥

कुथकम्बलशोभाढ्यं घण्टाचामरभूषितम् ।
वरत्राङ्कुशसंयुक्तमनेकस्वर्णभूषणम् ॥

---

1. तदर्धमिवाकुर्यात् A. तदर्धमिवाकुर्यात् D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नानामण्डनभूयिष्ठं दारुडिण्डिमडम्बरम् ।
कृत्वा विष्णोर्महापूजां कार्तिकैकादशीदिने ॥

द्वादश्यामर्पयेत्तं तु देवदेवाय चक्रिणे ।
त्रिलोकीनाथ देवेश सर्वभूतदयानिधे ॥

गजदानेन तुष्टस्त्वं प्रयच्छ मम वाञ्छितम् ।
इत्युच्चार्याथ दत्त्वा तं प्रणिपत्य जगत्प्रभुम् ॥

सुरेन्द्रलोकमासाद्य क्रीडते कालमक्षयम् ।
वर्षार्बुदसहस्राणि क्रीडित्वा सुचिरं दिवि ॥

ततो भूलोकमासाद्य सार्वभौमनृपो भवेत् ॥

इति गारुडपुराणोक्तविष्णुगजदानविधिः ।

------(;o:)------

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ सूर्यगजदानविधिः

अथाऽदित्यपुराणे —

निवेदयति यो नागं भक्त्या स्वर्णाद्यलङ्कृतम् ।
सूर्याय पर्वदिवसे तस्य पुण्यफलं शृणु ॥

स मत्तैरावणप्रख्यैर्गजयुक्तैः सुशोभनैः ।
[1]प्रक्रीडति महायानैः शतसंख्यैरनेकशः ॥

सप्तद्वीपसमुद्रायां क्षितौ नरपतिर्भवेत् ।
भुक्त्वा स विपुलान् भोगान् प्रलये समुपस्थिते ॥

सूर्ययोगं समास्थाय स तत्रैव प्रलीयते ।

इति सूर्यगजदानविधिः ।

———(:०:)———

1. प्रक्राडति A. D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ दासीदानम्

कूर्मपुराणे —

दासीं दद्याद्यथाशक्ति मूल्येनालङ्कृतां शुभाम् ।
सुवर्णरजतैः सार्धं विधिवद्दक्षिणायुताम् ॥

वित्तानुसारात्तां दत्त्वा विप्राय गृहमेधिने ।
मोदतेऽप्सरसां लोके यावत् कल्पशतत्रयम् ॥

वह्निपुराणे दासीदानं प्रस्तूय तत्कालादिकमुक्तम् —

स्थिरनक्षत्रसंयुक्ते सोमे सौम्यग्रहान्विते ।
दानकालं प्रशंसन्ति सन्तः पर्वणि वा पुनः ॥

अलङ्कृत्य यथाशक्त्या वासोभिर्भूषणैस्तथा ।

ब्राह्मणाय प्रदातव्या मन्त्रेणानेन शक्तितः ।
इयं दासी मया तुभ्यं श्रीवत्सप्रतिपादिता ॥

सर्वकर्मकरी भोग्या यथेष्टं भद्रमस्तु मे ।
पञ्चवर्षाधिका सा तु चत्वारिंशत्समावधिः ॥

दासी द्विजाय दातव्या दासीदानेऽप्ययं विधिः ।
दत्त्वा [1]क्षमापयेत् पश्चाद् ब्राह्मणं वस्त्रकाञ्चनैः ॥

अनुगत्वा तु सीमायां द्विजं विसर्जयेत् ततः ।
एवं दत्त्वा [2]महाराज कृतकृत्यो भवेत् पुमान् ॥

---

1. क्षमापयेत्व.क्षमापयेत्पश्चा A. 2. महातकृत्योभवेत्सुमान् A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

[1]इह लोके परे चैव सप्तजन्मान्यखण्डितः ।

तथा —

दासीं समीक्ष्य बहुशो गृहकर्मदक्षां
यो ब्राह्मणाय कुलशीलवते ददाति ।
विद्याधराधिपति[2]भिस्त्वभिपूजितोऽसौ
मर्त्यः प्रयाति स्वजनैः सह विष्णुलोकम् ॥

इति दासीदानम् ।

————(:०:)————

1. इह रे चैव A. इहलोके परेव D. 2. पतिभिस्त्वभिः स्त्वभिपूजितो A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ रथदानविधिः

गारुडपुराणे —

गन्त्रीं तुरगसंयुक्तां यो ददाति द्विजातये ।
सर्वकामसमृद्धात्मा स राजा जायते भुवि ॥

गन्त्री रथविशेषः ।

सचक्राक्षयुगोपेतां मत्तवारणभूषिताम् ।
आस्तीर्णमृद्वास्तरणां योक्त्रयुक्तां सकूबराम् ॥

युक्तां [1]चतुर्भिस्तुरगैर्द्वाभ्यां वा शक्तितो युताम् ।
बलीवर्दयुतां वाऽपि द्विजाय प्रतिपादयेत् ॥

पुण्येऽह्नि विप्रमाहूय कृत्वा वस्त्रादिभूषिताम् ।
सदक्षिणां यथाशक्त्या दद्यात् प्रयतमानसः ॥

दानमन्त्रः —

गन्त्रीमिमां प्रयच्छामि [2]विश्वकर्माधिदैवताम् ।
दानेनानेन भगवान् प्रीयतां मे परः पुमान् ॥

एवं प्रदाय विधिवद् गन्त्रीं मन्त्रेण मानवः ।
विमानेनार्कवर्णेन देववद् दिवि मोदते ॥

इहलोके भवेद्राजा बलवान् धर्मवत्सलः ॥

---

1. चतुर्ति D. 2. विश्वकर्मादि A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कूर्मपुराणे —

रथं चतुर्बलीवर्दैरूढं धान्यावृतं त्रिधा ।

वित्तानुसारात् सर्वैश्च रथोपकरणैर्युतम् ।
सदक्षिणं च विप्राय दत्त्वा शिवपुरं व्रजेत् ॥

धान्यावृतमित्यष्टादशधान्ययुतमित्यर्थः । रथोपकरणानि युगयोक्त्रतोत्र-वरत्रादीनि ।

अत्र दानमन्त्रः —

स्कन्दपुराणे —

ॐ रथाय रथनाथाय नमस्ते विश्वकर्मणे ।
विश्वरूपाय[1] नाथाय अरुणाय नमो नमः ॥

इति रथदानविधिः ।

———(:०:)———

1. विश्वभूताय दा. सं. ६१०.

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamwadi Math, Varanasi
Acc. No. 1875

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्र प्रसङ्गाच्छिविकादानम्

वह्निपुराणे --

वसिष्ठ उवाच --

शृणु राजन् महीपाल महादानमनुत्तमम् ।
येन वै दत्तमात्रेण मुच्यते नरकार्णवात् ॥

मार्गशीर्षे शुभे पक्षे समुपोष्य हरेर्दिने ।

शुभे पक्षे शुक्लपक्षे ।

माघफाल्गुनयोर्वापि वैशाखस्य शरत्सु च ॥

द्वादश्यां हरिमभ्यर्च्य कलशोपरिसंस्थितम् ।
शङ्खचक्रगदाशार्ङ्गधरं शक्त्या हिरण्मयम् ॥

शिविकां वक्रवशोत्थामृजुदारुमयीं विभोः ।
आनीय सन्निधिं विष्णोः शुभच्छत्रसमन्विताम् ॥

सम्पूज्य च [1]सगण्डूकां जागरं तत्र कारयेत् ।

सगण्डूकां सोपधानाम् ।

विद्याभिजनसम्पन्नं विदग्धं शास्त्रवित्तमम् ॥
आज्ञासारं शुचिं दक्षं कलत्रापत्यभूषितम् ।
प्रातः सभार्यमभ्यर्च्य वासोभिः कर्णभूषणैः ॥

---

1. स तां भूषां-दा. सं. ६११.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उपानच्छुरिकाखड्गपट्टकञ्चुकवेणुकाः ।
आदर्शस्थविकापानीयपात्रं कांस्य[1]भाजनम् ॥

चत्वारो वृषभा देया धेनवश्च सुलक्षणाः ।
शिबिकावाहनानां[2] तु तथैव छत्रधारिणः ॥

वृतिर्देया तथान्नं च वर्षार्हं ब्राह्मणाय च ।
वर्षे वर्षे पुनर्देयं ब्राह्मणस्यैतदेव तु ॥

[3]वृतिरेव त्व[4]संपत्तौ वर्षे वर्षे तु वार्षिकी ।
इहामुत्रातपत्राणं कुरु केशव मे विभो ॥

छत्रं त्वत्प्रीतये दत्तं ब्राह्मणाय मया शुभम् ।
देवदेव जगन्नाथ विरूपाक्षाव्ययानघ ॥

प्रभो शिबिकया देव प्रीतो भव जनार्दन ।
दत्त्वा तु ज्ञानविदुषे सपत्नीकाय पुत्रिणे ॥

सुरापः स्तेयकृत् सङ्गी ब्रह्महा गुरुतल्पगः ।
शिबिकादानमाहात्म्यान्मुच्यते [5]पातकात् स्फुटम् ॥

पितृपक्षं मातृपक्षं पत्नीपक्षं तथैव च ।
आत्मनो बान्धवांश्चैव तारयेन्नरकार्णवात् ॥

भुक्त्वा सुविपुलान् भोगानिहामुत्रसुखप्रदान् ।
सपत्नीकः सपितृको विष्णुसायुज्यमश्नुते ॥

---

1. भोजनम् A. D. 2. °वाहकानां A. 3. वृतिरेव च तु संपतौ A. 4. संपतौ D. 5. पातकत्स्फुटम् A. D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्र सम्भावितब्रह्महत्यादिपातकावलिनाशपितृमातृपत्नीपक्षात्मबन्धुपुरुष-नरकार्णवतारणपूर्वकैहिकामुष्मिकातप[1]त्राणतादृग्विपुलभोगानन्तरपितृमातृपत्नी–सहितस्वात्मविष्णुसायुज्यकामः इमां शुभच्छत्रोपानच्छुरिकाखड्गाद्युपकरणसहितां वृषधेनुचतुष्टयसहितां वाहकच्छत्रधारिसम्पन्नां शिबिकां तुभ्यं सम्प्रददे न मम इति दानवाक्यम् ॥

इति शिबिकादानविधिः ।

——:0:——

1. त्राणतादविपुल D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ भूमिदानम्

कूर्मपुराणे —

गोचर्ममात्रं भूखण्डमधिकं वा स्वशक्तितः ।
त्रिधा सदक्षिणं कृत्वा दत्त्वा शिवपुरं व्रजेत् ॥

त्रिधेति त्रिद्व्येकसुवर्णरूपा दक्षिणा त्रिधेत्यर्थः ।

दानबृहस्पतिः —

अपि गोचर्ममात्रेण सम्यग्दत्तेन मानवः ।
धौतपापो विशुद्धात्मा स्वर्गलोके महीयते ॥

बृहस्पतिः —

दशहस्तेन दण्डेन त्रिंशद्दण्डानि वर्तनम् ।
दश तान्येव गोचर्म ब्राह्मणेभ्यो ददाति यः ॥

यत् किञ्चित् कुरुते पापं पुरुषो लोभमोहितः ।
तत्सर्वं भूमिदानेन क्षिप्रमेव विनश्यति ॥

वृद्धवसिष्ठः —

दशहस्तेन दण्डेन दशहस्तान् समन्ततः ।
पञ्च वाभ्यधिकान् दद्यादेतद् गोचर्म कथ्यते ॥

मत्स्यपुराणे —

सप्तहस्तेन दण्डेन [1]त्रिंशद्दण्डानि वर्तनम् ।
त्रिभागहीनं गोचर्म मानमाह प्रजापतिः ॥

---

1. त्रिंशद्दण्डा–D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मानेनानेन यो दद्यान्निवर्तनशतं बुधः ।
विधिनानेन तस्याशु क्षीयते पापसंहतिः ॥

तदर्धमथवा दद्यादपि गोचर्ममात्रकम् ।
भवनस्थानमात्रं वा सोऽपि पापैः प्रमुच्यते ॥

तत्रैव —

[2]यत् किञ्चित् कुरुते पापं जन्मप्रभृति मानवः ।
अपि गोचर्ममात्रेण भूमिदानेन शुध्यति ॥

गवां शतं वृषश्चैको यत्र तिष्ठत्ययन्त्रितः ।
तद्धि गोचर्ममात्रं तु प्राहुर्वेदविदो जनाः ॥

अत्र नानाप्रकारेषु गोचर्ममानेषु [2]अधिकाल्पाल्पतरेषूत्तममध्यनाधम-भेदेन व्यवस्था बोद्धव्या । तथा —

श्रोत्रियाय कुलीनाय विनीताय तपस्विने ।
[3]व्रतस्थाय दरिद्राय सर्वभूतहिताय च ॥

ईदृशाय [4]शुभा शुद्धा दत्ता स्वल्पापि वासव ।
कुलानि तारयेद्वीर सप्त सप्त च सप्त च ॥

शुभा सर्वसस्योत्पत्तियोग्या । सस्यसम्पन्ना वा । शुद्धा न्यायोपार्जिता ।

वृद्धवसिष्ठः —

यत् किञ्चत् कुरुते पापं जन्मप्रभृति मानवः ।
अपि गोचर्ममात्रेण भूमिदानेन शुध्यति ॥

---

1. यत्किञ्चिट् ऋंचित कुरुते–A. 2. अधिकाल्पातरेषु–D. 3. बृतस्थाय–A. 4. शुगाशुद्धा–D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अपि पापकृतां राज्ञां प्रतिगृह्णन्ति साधवः।
पृथिवीं नान्यदिच्छन्ति याचनं ह्येतदुत्तमम्॥

अत्र पुराणभेदाद्वचनान्तरेषु नानाफलश्रवणेऽपि स्वकामनानुसारेणैकतमवचनस्थं फलं सङ्कीर्त्यैतत्काम इति दानवाक्ये योजयित्वा भूमिं दद्यात्। ततो दानमन्त्रमुच्चरेत्॥

मत्स्यपुराणे —

यथा भूमिप्रदानस्य कलां नार्हन्ति षोडशीम्।
दानान्यन्यानि मे शान्तिर्भूमिदानाद्भवत्विह॥

इति दानमन्त्रः।

दानानन्तरं प्रतिग्रहीता साक्षान्मनसा वा भुवं प्रदक्षिणीकृत्य ॐ स्वस्तीत्युक्त्वा सावित्रयजुःपाठान्ते कामस्तुतिं पठेत्। दक्षिणा चात्र सुवर्णमेव। यदाह माण्डव्यः —

न हि भूमेः परं वस्तु गोः सुवर्णाच्च किञ्चन।
[1]अतो भुवि गवि प्राज्ञैः सुवर्णं दक्षिणा मता॥

इति [1]महाभारते —

न चोषरां न निर्दग्धां महीं दद्यात् कथञ्चन।
न श्मशानपरीतां च न च पापनिषेविताम्॥

इति भूमिदानम्।

---

1. अतीभविगवितं॥ इतिभूमिप्रज्ञः –D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ गृहदानम्

कूर्मपुराणे —

शक्तितः सर्ववित्तेन पूर्णं गृहमपि त्रिधा ।
सदक्षिणं द्विजे दत्त्वा ब्रह्मलोकं व्रजेन्नरः ॥

सर्ववित्तेन सर्वप्रकारकेण [1]कांस्यताम्रादिभाजनसर्वधान्यघृतगुडशर्करागोवलीवर्ददासीदासादिरूपेण वित्तेन । त्रिधा पूर्ववदुत्तमादिपक्षत्रयेण ॥

संवर्तः —

गृहदानात् सुखी प्राज्ञो [2]वितृष्णः सर्ववस्तुषु ।
प्रजासुखविवृद्ध्यर्थं पात्रे देयमतो गृहम् ॥

गरुडपुराणे —

ऐष्टकं दारवं वाऽपि मृण्मयं वाऽपि शक्तितः ।
सर्वोपकरणोपेतं यो दद्याद्विपुलं गृहम् ॥

ब्राह्मणाय दरिद्राय श्रोत्रियाय कुटुम्बिने ।
क्रीडित्वा सुचिरं स्वर्गे मानुष्यं लोकमास्थितः ॥

भवत्यनाहतैश्वर्यः सर्वकामसमन्वितः ॥

व्यासः —

गृहं दीपप्रभोद्द्योतशयनासनभाजनैः ।
उपस्करैश्च सम्पूर्णं सर्वधान्यप्रपूरितम् ॥

---

1. कांस्यतांत्रादि–A. 2. वितृष्यः –A. वितृषः –D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ब्राह्मणाय दरिद्राय सुशीलाय [1]ददाति यः ।
तथाध्ययनशीलाय शृणु तस्यापि यत् फलम् ॥

देवैः पितृगणैर्युक्तः सर्वभोगसमन्वितः ।
ब्रह्मवर्षशतान्येव दश तिष्ठत्यनामयः ॥

तस्मादिह समागत्य सप्तद्वीपाधिपो भवेत् ।
बहुप्रजो बहुधनो द्विजो वा वेदपारगः ॥

सर्वधान्यानि परिभाषायामुक्तानि । उपस्करा मञ्चतूलिकोपधानकांस्यादिभाजनदासदासीप्रभृतयः ।

मत्स्यपुराणे —

पक्वेष्टकामयं कृत्वा शैलेयं वापि दारुजम् ।
मृण्मयं वाऽपि भवनं शुभलक्षणसंयुतम् ॥

मञ्चावरणशोभाढ्यं धेन्वा चैव समन्वितम् ।
अर्जुनैः सरलैरन्यैः शैलैश्चैव मनोरमम् ॥

तिनिसैः सर्जवृक्षैश्च कदम्बैः सह वञ्जुलैः ।
शुभस्थाने समुत्पन्नैर्वास्तुलक्षणसंयुतम् ॥

अत्रार्जुनादिवृक्षविशेषोपादानं वास्तुशास्त्रोक्तवृक्षविशेषणार्थम् । एतैर्दारुभिर्भवनं कृत्वेति सम्बन्धः ।

स्थापनं च यथान्यायं भूमेश्चैव तु शोधनम् ।
मार्जनं सिञ्चनं चैव सन्तानीयेन कारयेत् ॥

मङ्गलान्युपहारांश्च वास्तुविद्योदितांस्तथा ।
देवतापञ्चकं तत्र चत्वारिंशत्समन्वितम् ॥

---

1. दातियः --D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पूजयित्वा यथान्यायं ततो दद्याद् गृहं गृही ॥

इति ।

अत्र वास्तुमण्डलोद्धारतत्पूजादिकमुक्तं मत्स्यपुराणे —

एकाशीतिपदं कृत्वा रेणुभिः कनकेन वा ।
पश्चात् पिष्टेनानुलिम्पेत् सूत्रेणालोड्य सर्वतः ॥

दश पूर्वापरा रेखा दश चैवोत्तरायताः ।
सर्ववास्तुविभागेषु विज्ञेया नवका न च ॥

एकाशीतिपदं कृत्वा वास्तुवित् सर्ववास्तुषु ।
पदस्थान् पूजयेद्देवांस्त्रिंशत्पञ्चदशैव तु ॥

द्वात्रिंशद् बाह्यतः पूज्या पूज्याश्चान्तस्त्रयोदश ।
मध्ये नवपदस्त्वेकश्चत्वारस्त्रिपदाः स्मृताः ॥

विंशतिस्त्वेकपदिकास्तावन्तो द्विपदाः स्मृताः ।
एवं प्रतिष्ठिता देवाश्चत्वारिंशच्च पञ्च च ॥

नामतस्तान् प्रवक्ष्यामि स्थानानि च निबोधत ।
ईशानकोणादिसुरान् पूजयेत् क्रमशो नव ॥

[1]शिखी चैवाथ पर्जन्यो जयन्तः कुलिशायुधः ।
सूर्यः सत्यो भृशश्चैव आकाशो वायुरेव च ॥

पूषा च वितथश्चैव बृहत्क्षत्रयमावुभौ ।
गन्धर्वो भृङ्गराजश्च मृगः पितृगणस्तथा ॥
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ।
[3]असुरः शोषपापौ च रोगोऽहिर्मुख्य एव च ॥

---

1. ईशानश्चचैवाथ पर्जन्यो–D. 2. असुरश्चैव शोषश्च पापयक्ष्माव-रोगकः –दा. खं. ६१७.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भल्लाटः सोमसर्पौ च अदितिश्च दितिश्च वै ।
बहिर्द्वात्रिंशदेते तु तदन्तश्चतुरः शृणु ॥

आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च ।
अर्यमा सविता चैव विवस्वान् विबुधाधिपः ॥

मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात् ।
अष्टमस्त्वापवत्सस्तु परिधौ ब्रह्मणः स्मृताः ॥

आपश्चैवापवत्सश्च पर्जन्योऽग्निर्दितिस्तथा ।
पदिकानां तु वर्गोऽयमेवं कोणेष्वशेषतः ॥

तन्मध्ये तु बहिर्विंशतिर्द्विपदास्ते तु सर्वदा ।
अर्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ॥

ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्वतः ।

अयं च मण्डलोद्धारः । पूजाविधिश्च प्रयोगे स्पष्टीभविष्यति । एतत्पूर्वकं गृहारम्भं कुर्यादित्युक्तं तत्रैव ।

वास्तौ परीक्षिते सम्यग् वास्तुगेहे विचक्षणः ॥

वास्तूपशमनं कुर्यात् समिद्भिर्बलिकर्म च ।
जीर्णोद्धारे तथोद्याने तथा च नववेश्मनि ॥

नवप्रासादभवने प्रासादपरिवर्तने ।
द्वाराभिवर्तने तद्वत् प्रासादेषु गृहेषु च ॥

वास्तूपशनं कुर्यात् पूर्वमेवं विचक्षणः ।
एकाशीतिपदं लिख्य वास्तुमध्ये तु पिष्टकैः ॥

---

1. स्तन्य–A; D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

होमस्त्रिमेखले कार्यः कुण्डे हस्तप्रमाणके ।
यवैः कृष्णतिलैश्चैव समिद्भिः क्षीरवृक्षकैः ॥

पालाशैः खादिरैश्चापामार्गौदुम्बरसम्भवैः ।
कुशदूर्वाभवैर्वापि मधुसर्पिःसमन्वितः ॥

कार्यस्तु पञ्चभिर्बिल्वैर्बिल्वबीजैरथापि वा ।
होमान्ते भक्ष्यभोज्यैश्च वास्तुदेशे[1] बलिं हरेत् ॥

तद्वद्विशेषनैवेद्यमिदं दद्यात् क्रमेण तु ।
ईशकोणे घृतान्नं तु शिखिने विनिवेदयेत् ॥

ओदनं सोत्पलं दद्यात् पर्जन्याय घृतान्वितम् ।
जयन्ताय ध्वजं पीतं पैष्टं कूर्मं च विन्यसेत् ॥

इन्द्राय पञ्चरत्नानि पैष्टं च कुलिशं तथा ।
वितानकं च सूर्याय धूपं सक्तुं तथैव च ॥

सत्याय घृतगोधूमं मत्स्यान् दद्याद् भृशाय च ।
शष्कुलींश्चान्तरिक्षाय दद्यात् सक्तूंश्च वायवे ॥

लाजाः पूष्णे तु दातव्या वितथे चणकौदनम् ।
[2]गृहक्षताय मध्वन्नं यमाय पिशितौदनम् ॥

गन्धौदनं च गन्धर्वे भृङ्गे मेषस्य जिह्विकाम् ।
मृगाय यावकं दद्यात् पितृभ्यः कृशरांस्तथा ॥

दौवारिके दन्तकाष्ठं पैष्टं [3]कृष्णबलिं तथा ।
सुग्रीवेऽपूपकं दद्यात् पुष्पदन्ताय पायसम् ॥

---

1. देहबलिं–D. 2. गृहक्षतो–A. 3. कृवलिं–A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कुशस्तम्बेन सहितं दद्यात् पद्मं च वारुणे ।
पिष्टं हिरण्मयं दद्यादसुराय सुरा मता ॥

घृतौदनं च सोमाय गोधां वै पापयक्ष्मणे ।
घृतलड्डुकांस्तु रोगाय नागपुष्पं फणावते ॥

सर्पिर्मुख्याय दातव्यं मुद्गौदनमथापरम् ।
भल्लाटस्थानके दद्यात् सोमाय घृतपायसम् ॥

नागाय शालिजं पिष्टमदित्यै लोपिकां तथा ।
दित्यै तु पूरिकां दद्यादित्येवं बाह्यतो बलिः ॥

क्षीरमापाय दातव्यमापवत्साय वै दधि ।
सावित्रे लड्डुकान् दद्यात् समरीचं कुशोदकम् ॥

सवितुर्गुडापूपांश्च जयाय घृतचन्दनम् ।
विवस्वते पुनर्दद्याद् रक्तचन्दनपायसम् ॥

हरितालौदनं दद्यादिन्द्राय घृतसंयुतम् ।
गुडौदनं तु मित्राय रुद्राय घृतपायसम् ॥

आमं पक्वं तथा मांसं देयं स्याद्राजयक्ष्मणे ।
पृथ्वीधराय मांसानि कूष्माण्डानि च दापयेत् ॥

शर्करापायसं दद्यादर्यम्णे पानमेव च ।
पञ्चगव्यं यवांश्चैव तिलाक्षतहविश्चरून् ॥

भक्ष्यं भोज्यं च विविधं ब्रह्मणे विनिवेदयेत् ।
एवं संपूजिता देवाः शान्तिं कुर्वन्ति ते सदा ॥

---

1. माव्यवत्सायः D. 2. तिलाक्षं च A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सर्वेषां काञ्चनं दद्याद् ब्राह्मणे गां पयस्विनीम् ।
राक्षसीनां बलिर्देयो [1]मांसौदनसमन्वितः ॥

मांसौदनं घृतं पद्मकेसरं हविषान्वितम् ।
ईशाने नागमातृभ्यश्चरुं च विनिवेदयेत् ॥

मांसौदनं सरुधिरं हरिद्रौदनमेव च ।
आग्नेयीं दिशमाश्रित्य विदार्यै विनिवेदयेत् ॥

दध्योदनं सरुधिरं मत्स्यखण्डैश्च संयुतम् ।
पीतरक्तं बलिं दद्यात् पूतनायै तु रक्षसे ॥

वायव्ये पापराक्षस्यै मत्स्यं मांसं सुरासवम् ।
पायसं वापि दातव्यं स्वनाम्ना सर्वतः क्रमात् ॥

नमस्कारान्तयुक्तेन प्रणवाद्येन सर्वतः ।
ततः सर्वौषधिस्नानं यजमानस्य कारयेत् ॥

द्विजांस्तु पूजयेद् भक्त्या ये[2]चान्ये गृहमागताः ।
एतद्वास्तूपशमनं कृत्वा कर्म समाचरेत् ॥

प्रासादभवनोद्यानप्रारम्भे परिवर्तने ।
पुरवेश्मप्रवेशे च सर्वदोषापनुत्तये ॥

वास्तूपशमनं कृत्वा सूत्रेण परिवेष्टयेत् ।
रक्षोघ्नपावमानेन सूक्तेन भवनादिकम् ॥

नृत्तं मङ्गलवाद्यं च कुर्याद् ब्राह्मणवाचनम् ।
अनेन विधिना यस्तु प्रतिसंवत्सरं बुधः ॥

---

1. वादृक्तथा–A; वावृक्तथा–D. चान्यगृह–A;D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गृहे वा पत्तने कुर्यान्न स दुःखमवाप्नुयात्।
न च व्याधिभयं तस्य न च बन्धुधनक्षयः ॥

जीवेद् वर्षशतं स्वर्गे कल्पमेकं वसेन्नरः ॥

वह्निपुराणे —

ब्राह्मणेभ्यो गृहनिर्माणाद्यनन्तरं [1]यजमानकृत्यमुक्तम्।

एवं सम्भृतसम्भारं गृहं कृत्वा द्विजोत्तमान्।
कुलशीलसमायुक्तान् गृहसंख्यान् निमन्त्रयेत् ॥

गृहसंख्यान् देयगृहसंख्यान् निमन्त्रयेत् ज्ञापयेत्। गृहप्रतिग्रहायेति शेषः।

गृहधर्मरतान् दान्तान्निस्स्वान् बहुकुटुम्बिनः।
अधीतवेदांस्तत्त्वज्ञान् पुराणस्मृतिपारगान् ॥

अलङ्कृत्य सपत्नीकान् वस्त्राभरणकुण्डलैः।
कृत्वाग्नियजनं भूयो वास्तुं पूज्य विधानतः ॥

समुच्चरन्निदं दाता विदधीत गतस्मयः।

विदधीत दानमिति शेषः।

जगदीशो गृहावासो गोविन्दः प्रीयतामिति ॥

दानार्थगृहनिर्माण[2]तत्तदुपस्करसम्पादनाद्यनन्तरं [3]यजमानकृत्यमुक्तं ब्रह्मवैवर्तेऽपि —

गृहाङ्गणे कारयित्वा कुण्डमेकं समेखलम्।
ग्रहयज्ञः प्रकर्तव्यस्तुष्टिपुष्टिकरः सदा ॥

1. प्रजमान–A. 2. ददुपस्कर–A;D. 3. रजमान–D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राक्षोघ्नानि च सूक्तानि पठेयुर्ब्राह्मणास्ततः ।
वास्तोः पूजा प्रकर्तव्या दिक्पालानां बलिं क्षिपेत् ॥

ततः पुण्याहघोषेण ब्राह्मणांस्तेषु वेश्मसु ।
प्रवेशयित्वा सर्वांस्तु सभार्यानुपवेशयेत् ॥

यजमानस्ततः स्नातः शुक्लाम्बरधरः शुचिः ।
यद्यस्य विहितं पूर्वं तत्तस्मै प्रतिपादयेत् ॥

इदं गृहं गृहाण त्वं सर्वोपस्करसंयुतम् ।
तव विप्र प्रसादेन ममास्त्वभिनवं गृहम् ॥

एवमेकैकशो दत्त्वा प्रणिपत्य समर्पयेत् ।
स्वस्तीति ब्राह्मणैर्वाच्यं कोऽदादिति च पूजितैः ॥

मत्स्यपुराणे —

प्राप्ते दानदिने कार्यमैशान्यां हस्त[1]सम्मितम् ।
चतुरस्रं समं कुण्डं मेखलायोनिभूषितम् ॥

पूर्वोत्तरे [2]हस्तमिताऽथ वेदी
प्रहादिदेवेश्वरपूजनाय ।
अथार्चनं ब्रह्मशिवाच्युतानां
सूर्यस्य कार्यं फलमाल्यगन्धैः ॥

द्वारेषु कार्याणि च तोरणानि
पत्रैरपि क्षीरवनस्पतीनाम् ।
मध्येऽवसंस्थाप्य सरत्नकुम्भं
स्रग्गन्धधूपाम्बररत्नयुक्तम् ॥

---

1. सम्मिताम्–A;D. 2. स्तमिता–A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तथा —

गृह्योक्तेन विधानेन कृत्वा चाग्निमुखं ततः ।
गव्येन पयसा [1]दिव्यं स्थालीपाकं चरुं श्रयेत् ॥

ततश्च तं चैकचरुं जुहोति
मध्यस्थिताभ्यो गृहदेवताभ्यः ।
बलिं च सम्यग् विधिवत् प्रयुज्य
क्षीरेण धारां परितस्तु दद्यात् ॥

ब्राह्मणं [2]त्वर्चयेत् पूर्वं परितुष्टं क्षमापयेत् ।
शय्यां दक्षिणभागे तु सोपधानां सदीपिकाम् ॥

सितवस्त्रैः सुसंछन्नां लक्ष्मीनारायणान्विताम् ।

लक्ष्मीनारायणान्वितामिति तत्प्रतिमायुतामित्यर्थः । सा च यथाशक्ति सुवर्णेन कार्या । तत्प्रतिमालक्षणमुक्तं कामिके —

[3]पद्मासनगतं कुर्याद् देवदेवं चतुर्भुजम् ।
दक्षिणाधःकरे पद्मं शङ्खमूर्ध्वकरे न्यसेत् ॥

वामोर्ध्वे च भवेच्चक्रं लक्ष्मीपृष्ठेऽपरः करः ।
वामोत्सङ्गगता लक्ष्मी रत्नपात्रकरा भवेत् ॥

दक्षिणस्तु भुजो देव्याः पृष्ठे देवस्य चक्रिणः ॥

इति ।

सिताम्बरं कुण्डलहेमभूषितं
[4]केयूरकण्ठाभरणाभिरामम् ।
पत्नीसमेतं च करे गृहीत्वा
दाता पठेन् मन्त्रमिमं [5]गृहस्थः ॥

---

1. दिव्य–A. 2. दक्षयेपूर्वं–A. D. 3. पद्मासनमतं–A; D
4. गभराणा–A. 5. गृह–A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

[1]एह्येहि नारायण दिव्यरूप
सर्वामरैर्वन्दितपादपद्म ।
शुभाशुभानन्दसुधाम धीर
लक्ष्म्या युतस्त्वं हि गृहं गृहाण ॥

नमः कौस्तुभनाभाय हिरण्यकवचाय च ।
क्षीरोदार्णवसुप्ताय जगद्धात्रे नमो नमः ॥

नमो हिरण्यगर्भाय विश्वगर्भाय वै नमः ।
चराचरस्य जगतो [2]गृहभूताय वै नमः ॥

भूर्लोकप्रमुखा लोकास्तव देहे व्यवस्थिताः ।
नन्दन्ति यावत् कल्पान्तं तथास्मिन् भवने गृही ॥

त्वत्प्रसादेन देवेश पुत्रपौत्रैर्युतो गृहे ।
पञ्चयज्ञक्रियायुक्तो वसेदाचन्द्रतारकम् ॥

एवमुक्त्वाऽथ देवेशं सपत्नीकं द्विजोत्तमम् ।
तिलप्रस्थो[3]परिस्थायां शय्यायां[4]मुपवेश्य च ॥

वदेदिदं ततो वाक्यं सर्वधान्ययुतं त्विदम् ।
सर्वोपस्करसंयुक्तं गृहं गृह्ण द्विजोत्तम ॥

तत्रोपकरणं सर्वं दम्पत्योर्विनिवेदयेत् ।
पादुकोपानहच्छत्रभूषणासनभाजनम् ॥

सम्पन्नं वाप्यसम्पन्नं [5]गृहोपस्करभूषणम् ।
सर्वं सम्पूर्णमेवास्तु पठित्वैवं निवेदयेत् ॥

---

1. ह्येहि–A. 2. ग्रह–A. 3. परिस्थान्मं–A. 4. मुपवेसव–A.
5. गृहोपस्करषणम्–A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथाऽस्य फलं तत्रैव —

य एवं सर्वसम्पन्नं पक्वेष्टं विनिवेदयेत् ।
कल्पकोटिशतं यावद् ब्रह्मलोके महीयते ॥

शैलजं दारुजं वाऽपि यो दद्याद्विधिपूर्वकम् ।
वसेत् क्षीरार्णवे रम्ये नारायणसमीपतः ॥

मृण्मयं चैव यो दद्याद् गृहं चोपस्करान्वितम् ।
पुरेषु लोकपालानां प्रतिमन्वन्तरं वसेत् ॥

कलिकलुषविमुक्तः पूजितः सिद्धसङ्घै-
रमरचमरमालावीज्यमानोऽप्सरोभिः ।
पितृशतमथ बन्धून् पुत्रपौत्रप्रपौत्रा-
नपि नरकनिमग्नांस्तारयेदेक एव ॥

इति गृहदानविधिः ।

———(:o:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ गृहदानप्रयोगः

गृहदानं चिकीर्षुर्यजमानः [1]प्रागुदग्वा समामनुपहतामनूषरां कुशादियुतामुक्तगन्धवर्णरसादियुक्तां वास्तुशास्त्रोक्त[2]क्रमेण परीक्षितां भुवं परिगृह्य समे गोमयोपलिप्ते चतुरस्रे देशे परिभाषोक्तक्रमेण प्राचीं कल्पयित्वा तत्र सुधादिलिप्तेन सूत्रेण समान्तराल[3]पूर्वापरायतदक्षिणोत्तरायतसूत्रदशकास्फालनेन प्रागपरायतदक्षिणोत्तरायतनवनवकोष्ठात्मकमेकाशीतिपदं वास्तुमण्डलं विरच्य तद्गर्भदेशस्थकोष्ठनवकमेकीकृत्य [4]तत्र ब्रह्माणं विन्यस्य तत्पूर्वस्थाव्यवहितकोष्ठत्रयं दक्षिणोत्तरायतमेकीकृत्य तत्रार्यमणं विन्यस्य तथैव दक्षिणाव्यवहितकोष्ठत्रयमेकीकृत्य तत्र विवस्वन्तं विन्यस्य तथैव तत्पश्चिमाव्यवहितकोष्ठत्रयमेकीकृत्य तत्र मित्रं विन्यस्यैवं तदुत्तराव्यवहितकोष्ठत्रयमेकीकृत्य पृथ्वीधरं विन्यस्यैतेषामुभयपार्श्वस्थेशानादिकोणकोष्ठचतुष्टये प्रादक्षिण्येनाऽपवत्ससवितृविबुधाधिपराजयक्ष्मणो विन्यसेत् ।

तत आपवत्सस्यैशानकोष्ठे समनन्तरं आपं [5]सवितुराग्नेयकोष्ठे सावित्रं विबुधाधिपतेर्नैर्ऋत्यकोष्ठे जयं राजयक्ष्मणो वायव्यकोष्ठे रुद्रं विन्यसेत् । ततो बहिः प्रागवस्थितैशानादिकोष्ठेषु प्रादक्षिण्येनैशानादिकोष्ठद्वये शिखिपर्जन्यौ विन्यस्य तृतीयादिसप्तमान्तकोष्ठानि स्वस्वानन्तरपश्चिमकोष्ठैरेकीकरणेन द्विकोष्ठात्मकानि पञ्चपदानि विधाय तेषु जयन्तेन्द्रसूर्यसत्यभृशानष्टमेऽन्तरिक्षं विन्यस्य [6]तद्दक्षिणस्थाग्नेयादिबाह्यकोष्ठेषु प्रथमे वायुं द्वितीये पूषणं विन्यस्य तदनन्तराणि पञ्चकोष्ठानि स्वानन्तरोत्तरस्थितकोष्ठैः पूर्ववदेकीकृत्य तेषु वितथगृहक्षतयमगन्धर्वभृङ्गराजानवशिष्टकोष्ठे मृगं विन्यस्य पश्चिमस्थितनैर्ऋत्यबाह्यकोष्ठेषु प्रथमे पितरं

---

1. प्रागुदक्प्लवामासन्नमुपहता–A. 2. मेण–A. 3. पूर्वापरादक्षिणोत्तराया–A. 4. तत्रब्रह्माणं–A. 5. सवितुराग्नेयं कोष्ठे सावित्रं विबुधाप राजयक्ष्मणो वायव्यकोष्ठे रुद्रं च विन्यसेत् । –A. 6. त्तदक्षिण–A. D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्वितीये दौवारिकं शेषेषु पूर्ववद् द्विकोष्ठात्मकेषु पञ्चसु सुग्रीवपुष्पदन्तजलाधिपासुरशोषानवशिष्टकोष्ठेषु पापं विन्यस्योत्तरस्थितवायव्यादिकोष्ठेषु प्रथमे रोगं द्वितीये अहिं तत्पूर्वेषु पूर्ववत्कोष्ठद्वयात्मकेषु पञ्चसु पदेषु मुख्यभल्लाटसोम[1]नागादितीनवशिष्टकोष्ठे दितिं न्यसेदित्येवं बाह्यपरिधौ द्वात्रिंशत् सुराः। एवं पञ्चचत्वारिंशत्सुरानावाह्य प्रतिष्ठाप्यासनपाद्यार्घ्या[2]चमनादिभिर्गन्धपुष्पधूपदीपादिभिरभ्यर्च्य यथोक्तं बलिं दत्त्वा तत्र वास्तुशास्त्रानुसारेण शिलेष्टकादिमयं गृहं निर्माय तच्च सुधाधात्वादिभिरलङ्कृत्य गृहोपकरणैर्गृहं सुसज्जितं कृत्वा गृहाङ्गणेशानदिग्भागे च वस्त्रादिना मण्डपं चतुर्द्वारसहितं विधाय क्षीरद्रुमपत्रैस्तौरणचतुष्टयं द्वारेषु बद्ध्वा [3]तदन्तर्हस्तमितं [4]समेखलायोनिकुण्डं [5]तत्पूर्वोत्तरे हस्तमितां ग्रहवेदिं च विरच्य पूर्वोक्तप्रकारेण पुण्याहवाचनमातृपूजानान्दीश्राद्धानि कृत्वा होमाद्यर्थं पञ्च ब्राह्मणान् वृणुयात्। ते च यथोक्तग्रहयज्ञपूर्वकं कर्मोपक्रम्य ग्रहवेदिकायां ग्रहस्थापनं ब्रह्मशिवाच्युतसूर्यप्रतिमास्थापनं च कृत्वा सर्वौषधिपञ्चरत्नादिगर्भं वारुणं कलशं प्रतिष्ठाप्य ग्रहादीनां पाद्यादिभिरुपचारैः पूजां विधाय ग्रहहोमानन्तरं ब्रह्मादिमन्त्रैर्होमं कुर्युः। ततो वास्तुमण्डलं पूर्वोक्तप्रकारेणोद्धृत्य प्रोक्तपञ्चचत्वारिंशद्वास्तुदेवानां प्रतिष्ठापूर्वकं सर्वोपचारैरर्चनं विधाय गव्येन पयसा ब्रह्मादिदेवताभ्यश्चरुं श्रपयित्वा यवकृष्णतिलसमिदाज्यादिप्रोक्तद्रव्यैर्ब्रह्मादिदेवताभ्यः स्वस्वमन्त्रैः प्रणवादिचतुर्थीनमोन्तस्वस्वनाममन्त्रैर्वा यथासम्भवं प्रत्येकमष्टविंशत्यष्टोत्तर[6]शताहुतीर्जुहुयुः। तथैव पायसं चरुं ब्रह्मादिवास्तुदेवताभ्यो हुत्वा अनन्तरं भक्ष्यभोज्यादियुतं तदुक्तं बलिं नैवेद्यं दत्त्वा पायसमेव वा सर्वेभ्यो बलिमिन्द्रादिलोकपालेभ्यश्च बलिं दत्त्वा [7]तथा शिखिपर्जन्यादीनां प्रीतये द्विजेभ्यः काञ्चनं ब्रह्मणः प्रीतये धेनुं च दद्यात्। ततः शान्तिकलशोदकेनर्त्विग्भिरभिषेकमन्त्रैरभिषिक्तो यजमानः शुक्लमाल्याम्बरादिधरो ब्राह्मणेभ्यो दक्षिणां दत्त्वा गीतमङ्गलवाद्यादिभिर्गृहं [8]राक्षोघ्नपावमानमन्त्रैःसूत्रेण प्रदक्षिणमावेष्ट्य परितः क्षीरधारां पातयित्वा गृहमध्ये दक्षिणभागेऽष्टदलं पद्मं लिखित्वा तदुपरि प्रस्थमात्रांस्तिलान् प्रक्षिप्य तत्रोपधानादिसर्वोपकरण-

---

1. सर्पादि–A. 2. चमनीयादि–D. 3. तदन्तहस्त–A. 4. समेखलायानि–A. 5. तत्पूर्वोत्तरे–A. 6. शततताहुती–A. 7. यथा–A. यया–D. 8. राक्षोघ्न–A. राक्षोघ्न–D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सहितामुपरिस्थापितपूर्वोक्तसौवर्णलक्ष्मीनारायणप्रतिमां [1]शय्यायां स्थापयित्वा प्रतिमां सम्पूज्य प्रतिग्रहीतारं कुण्डलवस्त्रमुद्रिकाकेयूरादिभिः सपत्नीकमलङ्कृत्य गृहदानप्रतिग्रहार्थं कृत्वा तं करे गृहीत्वा [2]सुलग्ने मङ्गलवाद्यादिभिः सह वक्ष्यमाण-मन्त्रैर्गृहं प्रवेशयेत्। मन्त्रास्तु —

एह्येहि नारायण दिव्यरूप
सर्वामरैर्वन्दितपादपद्म।
शुभाशुभानन्दसुधाम धीर
लक्ष्मीयुतस्त्वं हि गृहं गृहाण॥

नमः कौस्तुभ[3]नाभाय हिरण्यकवचाय च।
क्षीरोदार्णवसुप्ताय जगद्धात्रे नमो नमः॥

नमो हिरण्यगर्भाय विश्वगर्भाय वै नमः।
चराचराय जगतो गृहभूताय वै नमः॥

भूर्लोकप्रमुखा लोकास्तव देहे व्यवस्थिताः।
[4]नन्दन्ति यावत्कल्पान्तं तथाऽस्मिन् भवने गृही॥

त्वत्प्रसादेन देवेश पुत्रपौत्रैर्युतो गृहे।
पञ्चयज्ञक्रियायुक्तो वसेदाचन्द्रतारकम्॥

ततस्तं पूर्वस्थापितशय्योपर्युदङ्मुखमुपवेश्य स्वयं प्राङ्मुखः सकुशोपग्रह-पाणिरासने उपविश्य तस्मै सर्वोपस्करसंयुतं गृहमित्थं वाक्यप्रयोगेण दद्यात्। तत्प्रयोगस्तु —

यजमानः कुशयवतिलजलान्यादायाद्येत्यादिदेशकालकीर्तनान्तेऽमुकगोत्रा-यामुकवेदामुकशाखाध्यायिनेऽमुकशर्मणे ब्राह्मणायेदं गृहं पक्वेष्टादिरचितं यथा-शक्तिसम्पादितकांस्यताम्रादिभाजनसर्वधान्यलवणघृतगुडशर्करागोबलीवर्ददासी-दासमञ्चतूलिकावितानादिसर्वोपकरणसहितं सदीपप्रभोद्द्योतं सर्वदैवतं सकल-

1. शय्यां A, D. 2. सुलने A. 3. °नाभाय A, D. 4. °नन्दति A, D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कलुषक्षयानन्तर[1]सिद्धसङ्घपूजिताप्सरःकरकलितचामरवीज्यमानत्वसहितसम्भावितनरकनिमज्जनपित्रादिपुरुषशतपुत्रपौत्रादिबन्धुतारणपूर्वकेत्यन्ते पक्वेष्टकारचितगृहदाने कल्पकोटिशतावधिककालब्रह्मलोकमहीयमानत्वकाम इति, शैलदारुजगृहदाने कल्पकोटिशतावधिकसमयनारायणसमीपक्षीरार्णवनिवासकाम इति वा, मृण्मयगृहदाने एकैकमन्वन्तरावच्छिन्नप्रतिलोकपालपुरनिवासकाम इति वा, दातव्यगृहविशेषानुसारेणोक्त्वा अहं तुभ्यं संप्रददे इति ब्राह्मणहस्ते दत्त्वा —

इदं गृहं गृहाण त्वं सर्वोपस्करसंयुतम् ।
तव विप्र प्रसादेन ममाऽस्त्वभिनवं[2] गृहम् ॥

गृहं मम विभूत्यर्थं गृहाण त्वं द्विजोत्तम ।
प्रीयतां मे जगद्योनिर्वासुदेवरूपी जनार्दनः ॥

इति पठेत् । ततः प्रतिग्रहीता सावित्रेण यजुषा प्रतिगृह्य ॐ स्वस्तीत्युक्त्वा कामस्तुतिं यथाशाखं पठेत् । ततः कृतैतद्गृहदानप्रतिष्ठार्थमिदं सुवर्णमग्निदैवतं दक्षिणां तुभ्यमहं सम्प्रददे इति सुवर्णसहस्रमारभ्यैकसुवर्णावरां दक्षिणां यथाशक्ति दद्यात् । [3]ततस्तस्मै पादुकोपानच्छत्रचामरादिकं दत्त्वा –

सम्पन्नं वाप्यसम्पन्नं गृहोपस्करभूषणम् ।
सर्वं सम्पूर्णमेवाऽस्तु त्वत्प्रसादाद् द्विजोत्तम ॥

इति सम्प्रार्थ्य तदनुज्ञया स्वगृहं गच्छेत् ।

इति गृहदानप्रयोगः ।

———(:o:)———

1. सिद्धसंख A;D. 2. फलम् D. 3. ततस्मै A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ मठदानानि

स्कन्दपुराणे —

कृत्वा मठं [1]प्रयत्नेन शयनासनसंयुतम् ।
पुण्यकाले द्विजेभ्यो वा यतिभ्यो वा निवेदयेत् ॥

सर्वान् कामानवाप्नोति निष्कामो मोक्षमाप्नुयात्[2] ।

[3]भविष्यपुराणे —

प्रतिश्रये सुविस्तीर्णे कारिते सजलेन्धने ।
दीनानाथजनार्थाय वद किं न कृतं भवेत् ॥

मार्कण्डेयपुराणे —

कुर्यात् प्रतिश्रयगृहं पथिकानां हितावहम् ।
निजगेहैकदेशं वा साधूनां यो निवेदयेत् ॥

अक्षयं पुण्यमुद्दिष्टं तस्य स्वर्गापवर्गदम् ।
सर्वकामसमृद्धोऽसौ देववद्दिवि मोदते ॥

प्रतिश्रयो धर्मशाला ।

इति मठदानानि ।

——: o :——

---

1. प्र ात्नलशणनामनसंयुतम् A. 2. मापुयान् A. D. 3. भतियनुराणे A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ कन्यादानम्

तत्र बृहस्पतिः —

सहस्रमेव धेनूनां शतं वाऽनडुहां समम् ।
दशानडुत्समं यानं दशयानसमो हयः ॥

दशवाजिसमा कन्या भूमिदानं च तत्समम् ।
तस्मात् सर्वेषु दानेषु कन्यादान विशिष्यते ॥

भविष्यत्पुराणे —

कन्यामलङ्कुतां दद्यात् समाहूय नराधिप ।
विद्यार्थिने ब्राह्मणाय कन्यादानं तदुच्यते ॥

अत्र ब्राह्मणग्रहणं द्विजातिमात्रोपलक्षणम् । अत एव भविष्यत्पुराणे —

कन्यामलङ्कृतां दद्यादनादाय नराधिप ।
द्विजाय वेदविदुषे कन्यादानं तदुच्यते ॥

इत्युक्तम् । इयं च कन्या संवर्तादिभिः 'दशमे कन्यका प्रोक्ता' इति वयोविशेषलक्षिताऽथाप्राप्तरजोदर्शनैव विवक्षिता ।

तस्मादुद्वाहयेत् कन्यां यावन्नर्तुमती भवेत् ॥

इति रजोदर्शनादर्वाग्विवाहाऽभ्यनुज्ञानात् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्र विशेषमाह ऋष्यशृङ्गः —

वरगोत्रं समुच्चार्य प्रपितामहपूर्वकम् ।
नाम सङ्कीर्तयेद्विद्वान् कन्यायाश्चैवमेव हि ॥

तिष्ठेत् पूर्वमुखो दाता वरः प्रत्यङ्मुखो भवेत् ।
मधुपर्कार्चितायैनां तस्मै दद्यात् सदक्षिणाम् ॥

उदपात्रं ततो गृह्य मन्त्रेणानेन दापयेत् ।
गौरीं कन्यामिमां विप्र यथाशक्ति विभूषिताम् ॥

गोत्राय शर्मणे तुभ्यं दत्तां [1]विप्र समाश्रय ।
भूमिं गाश्च दासीश्च वासांसि च स्वशक्तितः ॥

महिषीर्वाजिनश्चैव दद्यात् स्वर्णमणीनपि ।
ततः स्वगृह्यविधिना होमाद्यं कर्म कारयेत् ॥

यथाचारं विधेयानि माङ्गल्यकुतुकानि च ।

वरगोत्रमिति । अद्यामुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्राया-मुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पौत्रायामुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्रायामुकगोत्रायामुकप्रवरायामुकशर्मणे वराय । एवमेव कन्यायाः प्रपितामहपूर्वकं प्रवरनामान्युच्चार्य अमुकशर्मणः पुत्रीमित्यन्ते अमुकगोत्रा-मुकप्रवराममुक[2]नाम्नीमिमां कन्यां यथाशक्त्यलङ्कृतां प्रजापतिदैव-तामक्षय्यब्रह्मलोकप्राप्तिकामस्तुभ्यं प्रतिपादयामि इति वरहस्ते कुशाक्षतजलानि कन्याकरेण सह दत्त्वा —

कन्यां कनकसम्पन्नां यथाशक्तिविभूषिताम् ।
दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ॥

---

1. विप्राय A. D. तस्मै दत्तां विप्रसम्यतायाम् दा. खं. 649. 2. नाम A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इति स्मृत्यन्तरोक्तं मन्त्रं पठेत् । ततः कृतैतत्कन्यादानप्रतिष्ठार्थमिदं सुवर्णं दक्षिणां तुभ्यमहं सम्प्रददे न ममेति सुवर्णादिदक्षिणां दत्त्वा गोभूमिदासदास्यादिकं यथाशक्ति दद्यात् । ततः स्वगृह्योक्तविधिना होमादि कुर्यात् । ततो यथास्वकुलाचारं मङ्गल्यकुतुकाद्याचरणं कुर्यादित्यर्थः ।

स्कन्दपुराणे —

वैवाहिकप्रदानं च [1]यो ददाति दयापरः ।
विमानेन विचित्रेण किङ्किणीजालमालिना ॥

महेन्द्र[2]भवनं याति सेव्यमानोऽप्सरोगणैः ।

कन्यादाने दातृनाह याज्ञवल्क्यः —

पिता पितामहो भ्राता सकुल्यो जननी तथा ।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥

नारदोऽपि —

पिता दद्यात् स्वयं कन्यां भूम्ना वानुमते पितुः ।
मातामहो मातुलश्च स्वकुल्या वा विशेषतः ॥

माता त्वभावे सर्वेषां प्रकृतौ यदि वर्तते ।
तस्यामप्रकृतिस्थायां दद्युः कन्यां स्वजातयः ॥

परकीयकन्यादाने विशेष उक्तो लिङ्गपुराणे —

कन्यां लक्षणसम्पन्नां सर्वदोषविवर्जिताम् ।
मातापित्रोस्तु संवादं कृत्वा दत्त्वा धनं महत् ॥

आत्मीकृत्य तु संस्थाप्य वस्त्रं दत्त्वा शुभं नवम् ।
भूषणैर्भूषयित्वा च गन्धमाल्यैरथार्चयेत् ॥

1. को D. 2. वनं A. भयनं D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निमित्तानि समीक्ष्याथ गोत्रनक्षत्रकादिकम् ।
उभयोश्चित्तमालोच्य उभौ सम्पूज्य यत्नतः ॥

उभयोर्वधूवरयोश्चित्तं चित्तानुकूल्यम् ।

दातव्या श्रोत्रियायैव ब्राह्मणाय तपस्विने ।
साक्षादधीतवेदाय विधिना ब्रह्मचारिणे ॥

दासीदासासनाद्यं च भूषणानि विशेषतः ।
क्षेत्राणि च धनं चापि तथान्यानि प्रदापयेत् ॥

यावन्ति सन्ति रोमाणि कन्यायाश्च तनौ पुनः ।
तावद्वर्षसहस्राणि रुद्रलोके महीयते ॥

स्कन्दपुराणेऽपि —

आत्मीकृत्य सुवर्णेन पारकीयां तु कन्यकाम् ।
धर्म्येण विधिना दातुमसगोत्रोऽपि युज्यते ॥

वह्निपुराणे —

श्रुत्वा कन्याप्रदानं च पितरश्च पितामहाः ।
विमुक्ताः सर्वपापेभ्यो ब्रह्मलोकं व्रजन्ति ते ॥

प्रसङ्गात् कन्यागृहे भोजननिषेधस्तत्रैव —

अप्रजायां तु कन्यायां न भुञ्जीत कदाचन ।
दौहित्रस्य मुखं दृष्ट्वा किमर्थ[1]मनुशोचति ॥

---

1. मनुर्वशोति D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दक्षः —

मातापितृविहीनं तु संस्कारोद्वाहनादिभिः ।
यः स्थापयति तस्येह पुण्यसंख्या न विद्यते ॥

प्रसङ्गाद्राजस्थापनफलं विष्णुधर्मोत्तरे —

भूपालं यश्च्युतं राज्यात् स्वराज्ये स्थापयेत् पुनः ।
स याति शक्रसालोक्यं यावच्छक्राश्चतुर्दश ॥

ततो मानुष्यमासाद्य राजा भवति धार्मिकः ।

तथा —

स्थानभ्रष्टस्य यः कुर्याद् भूपस्यारोपणं नरः ।
नाकलोकमवाप्नोति चिरं तेनेह कर्मणा ॥

इति कन्यादानम् ।

———(:o:)———

1. च्युतं A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ कपिलधेनुदानम्

व्यासः —

रुक्मशृङ्गीं रौप्यखुरां सवस्त्रां काम्यदोहनाम् ।
सवत्सां कपिलां दत्त्वा वंशान् सप्त समुद्धरेत् ॥

यावन्ति चास्या रोमाणि सवत्साया भवन्ति हि ।
सुरभीलोकमासाद्य रमते तावतीः समाः ॥

अस्या [1]दानमन्त्रो मत्स्यपुराणे —

कपिले सर्वभूतानां पूजनीयाऽसि रोहिणि ।
तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ॥

यमः —

रुक्मशृङ्गीं रौप्यखुरां मुक्तालङ्कारभूषिताम् ।

कांस्योपदोहनां धेनुं वस्त्रच्छन्नामलङ्कृताम् ।
दत्त्वा द्विजेन्द्राय नरः स्वर्गलोके महीयते ॥

[2]दशधेनुप्रदानेन तुल्यैका कपिला मता ।

आदित्यपुराणे —

सहस्रं यो गवां दद्यात् कपिलां [3]वापि सुव्रत ।
सममेव पुरा प्राह ब्रह्मा ब्रह्मविदां वरः ॥

---

1. दानमन्त्रौ A. 2. धीश A. धश D. 3. चापि A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कूर्मपुराणे —

दश सौवर्णिके शृङ्गे खुराः पञ्चपलान्विताः ।
पञ्चाशत्पलिकं ताम्रं कास्यं चैतावदेव च ॥

वस्त्रं तु त्रिगुणं धेन्वा दक्षिणां च चतुर्गुणाम् ।
एतैरलङ्कृतां धेनुं घण्टाभरणभूषिताम् ॥

कपिलां विप्रमुख्याय दत्त्वा मोक्षमवाप्नुयात् ।

द्विगुणोपस्करोपेता महती कपिला स्मृता ।
दत्ता सा विप्रमुख्याय स्वर्गमोक्षफलप्रदा ॥

सप्तजन्म[1]कृतात् पापान्मुच्यते दशसंयुतः ।

दशसंयुतः दशभिः पुत्रादिभिः पुरुषैः संयुतः ।

यान् यान् प्रार्थयते कामान् तांस्तान् प्राप्नोति मानवः ॥

अन्ते स्वर्गापवर्गौ च फलमाप्नोत्यसंशयम् ।

पञ्चपलान्विता इति पञ्च पलानि रूप्यस्येति ज्ञेयम् । वस्त्रदक्षिणयोस्त्रैगुण्यादिकं गोदानसामान्योपक्लृ[2]प्तवस्त्राद्यपेक्षयेति ज्ञातव्यम् । विधिस्तु गोदानप्रकरणे वक्ष्यते ।

इयमेव [3]वर्णभेदेन दशधोक्ता वराहपुराणे —

सुवर्णकपिला पूर्वा द्वितीया गौरिपिङ्गला ।
तृतीया चैव रक्ताक्षी चतुर्थी गुडपिङ्गला ॥

पञ्चमी बहुवर्णा स्यात् षष्ठी च श्वेतपिङ्गला ।
सप्तमी श्वेतपिङ्गाक्षी अष्टमी कृष्णपिङ्गला ॥

---

1. कृतीत्पान्मुच्यते A. कृतात्पान्मुच्यते D. 2. कप्त D. 3. सुवर्ण A

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नवमी पाटला ज्ञेया दशमी पुच्छपिङ्गला ।
एता दश समाख्याताः कपिलास्ते वरानने ॥

सर्वा ह्येता महाभागास्तारयन्ति न संशयः ।
सङ्गमेषु प्रशस्ताश्च सर्वपापप्रणाशनाः ॥

इति श्रीकोदण्डपरशुरामेत्यादिविविधविरुदावलीविराजमानमानोन्नत–महाराजाधिराजश्रीशक्तिसिंहात्मजश्रीमहाराजाधिराजश्रीमदनसिंहदेवविरचिते मदन-रत्नप्रदीपे दानविवेकोद्द्योते दशमहादाननिरूपणम् ॥

————(:०:)————

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथातिदाननिरूपणम्

भविष्यत्पुराणे —

त्रीण्याहुरतिदानानि गावः पृथ्वी सरस्वती ।
नरकादुद्धरन्त्येता [1]जपवापनदोहनैः ॥

——(:0:)——

तत्रादौ गोदाननिरूपणम्

महाभारते —

दानानामिह सर्वेषां गवां दानं विशिष्यते ।
गावः श्रेष्ठाः पवित्राश्च पावना जगदुत्तमाः ॥

ऋते दधिघृताभ्यां च नेह यज्ञः प्रवर्तते ।
तेन यज्ञमशेषं च गोमूलं सम्प्रचक्षते ॥

लिङ्गपुराणे —

अग्न्यगाराणि विप्राणां देवतायतनानि च ।
पूयन्ते शकृता यासां किं देयमधिकं ततः ॥

---

1. नयवानदोहनैः D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हारीतः —

बहुक्षीरां च यो गां वै ब्राह्मणायोपपादयेत् ।
उत्तारयेत् स आत्मानं सप्त सप्त कुलानि च ॥

देवलः —

सुशीलां लक्षणवतीं युवतीं वत्ससंयुताम् ।
बहुदुग्धवतीं स्निग्धां धेनुं दद्याद्विचक्षणः ॥

महाभारते —

प्रासादा यत्र सौवर्णाः [1]शय्या रत्नोज्ज्वला तथा ।
वराश्चाप्सरसो यत्र तत्र गच्छन्ति गोप्रदाः ॥

तथा

यावन्ति रोमाणि भवन्ति धेन्वा –
स्तावन्ति वर्षाणि महीयते स्वः ।
स्वर्गाच्च्युतश्चाऽपि ततोऽत्र लोके
कुले समुत्पत्स्यति गोमतां सः ॥

जाबालिः —

होमार्थमग्निहोत्रस्य यो गां दद्यादयाचिताम् ।
त्रिर्वित्तपूर्णा पृथिवी तेन दत्ता न संशयः ॥

आत्रेयः —

अकुलीनाय मूर्खाय लुब्धाय पिशुनाय च ।
हव्यकव्यव्यपेताय गौर्न देया कथञ्चन ॥

ब्रह्मपुराणे —

पीतोदकां जग्धतृणां दुग्धचोषां निरिन्द्रियाम् ।
उन्मत्तामङ्गहीनां च मृतवत्सां महाशनाम् ॥

1. शेय्या A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

केशचेलपुरीषास्थिक्रव्यादां सन्धिनीं खलाम् ।
पुटधेनुं यमलसूं नित्यं प्रस्रवणस्तनीम् ॥

न दद्याद् ब्राह्मणेभ्यश्च सदोषं वृषभं तथा ।

पीतोदकां जग्धतृणामिति वृद्धोपलक्षणम् । दुग्धचोषां स्वकायस्तन-पायिनीम् । पुटधेनुर्बालवत्सैव या गर्भिणी ।

व्यासः —

न कृशां पापवत्सां वा वन्ध्यां रोगान्वितां तथा ।
न व्यङ्गां न[1] परिश्रान्तां दद्याद्गां ब्राह्मणाय वै ॥

विश्वामित्रः —

नैकशृङ्गां [2]वलच्छृङ्गां स्फुटिताक्षीं गलत्खुराम् ।
न दद्यात् त्रिस्तनीं चैव गां शुभामेव दापयेत् ॥

महाभारते —

अन्तर्जाताः सुक्रयज्ञानलब्धाः
प्राणक्रीता निर्जिताश्चौकजाश्च ।
कृच्छ्रो[3]त्सृष्टा पोषणाभ्यागताश्च
द्वारैरेतैर्गोविशेषाः प्रशस्ताः ॥

अन्तर्जाता गर्भिण्यः । ज्ञानं विद्या । प्राणक्रीता भृतिलब्धाः । निर्जिता युद्धादिना । ओकजा गृहजाताः । कृच्छ्रोत्सृष्टा इत्यादि व्याध्याक्रान्ताः सत्यः स्वामिना त्यक्ताः । स्वयं पोषणं कृत्वा लब्धाः ।

---

1. नापरिश्रान्तां दा. खं. 426. 2. श्चलच्छृगां A. D. 3. कृच्छ्रो-स्पष्टा D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्रैव —

एकां वै दशगुर्दद्याद्दश दद्याच्च गोशती ।
शतं सहस्रगुर्दद्यात् सर्वे तुल्यफलाः स्मृताः ॥

[1]नन्दिपुराणे —

विधिना तु यदा दत्ता पात्रे धेनुः सदक्षिणा ।
तदा तारयते जन्तून् कुलानाम्युतैः शतैः ॥

इति गोदाननिरूपणम् ।

———(:०:)———

1. नेदिपुराणे D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ गोदानविधिः

विश्वामित्रः —

प्राङ्मुखीं गामवस्थाप्य सवत्सां तां सुपूजिताम् ।
पुच्छदेशे तु दाता वै स्नातो बद्धशिखो भवेत् ॥

उदङ्मुखस्तु विप्रः स्यात् पात्रलक्षणलक्षितः ।
आज्यपात्रं करे कृत्वा कनकेन समन्वितम् ॥

निक्षिप्य पुच्छं तस्मिंस्तु घृतदिग्धं प्रगृह्य च ।
सतिलं विप्रपाणिं तु प्रागग्रं तु निधापयेत् ॥

सतिलं सकुशं वापि गृहीत्वा दानमाचरेत् ।
अनेनैव तु मन्त्रेण पात्रहस्ते जलं क्षिपेत् ॥

यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी ।
विश्वरूपधरो देवः प्रीयतामनया गवा ॥

अनुव्रज्य च तां धेनुं ब्राह्मणेन समन्वितम् ।
गोमतीं तु ततो विद्यां जपेत प्रयतः शुचिः ॥

उद्दिश्य वासुदेवं च प्रीयतामिति चानघ ।
पात्रं मनसि सञ्चिन्त्य तोयमप्सु विनिक्षिपेत् ॥

जलशायी ब्रह्मपिता पद्मनाभः सनातनः ।
अनन्तभोगशयनः प्रीयतां परमः पिता ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गोमतीविद्या महाभारते दर्शिता ।

गावो मामुपतिष्ठन्तु हेमशृङ्ग्यः पयोमुचः ॥

[1]सुरभ्यः सौरभेय्यश्च सरितः सागरास्तथा ।
गा वै पश्याम्यहं नित्यं गावः पश्यन्तु मां सदा ॥

गावोऽस्माकं वयं तासां यतो गावस्ततो वयम् ।

तथा यमेनापि ––

गावः सुरभयो नित्यं गावो [2]गुग्गुलसन्निभाः ॥

गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत् ।
अन्नमेव परं [3]गावो देवानां हविरुत्तमम् ॥

पावनं सर्वभूतानां रक्षन्ति च वहन्ति च ।
हविषा मन्त्रपूतेन तर्पयन्त्यमरान् दिवि ॥

ऋषीणामपि[4] होतॄणां गावो होमे प्रतिष्ठिताः ।
सर्वेषामेव भूतानां गावः शरणमुत्तमम् ॥

गावः पवित्रं परमं गावो मङ्गलमुत्तमम् ।
गावः सर्वस्य लोकस्य गावो धन्याः सवाहनाः ॥

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधाकृतम् ।
एकत्र मन्त्रास्तिष्ठन्ति हविरेकत्र तिष्ठति ॥

इति ॥

---

1. सुरम्यसौरभेयश्च A. D. 2. गुगुल D. 3. गावा A. D. 4. यग्नि–होतॄणां दा. खं. 440.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्र दक्षिणामाह वसिष्ठः —

सुवर्णं दक्षिणामाहुर्गोप्रदाने विशेषतः ।
सुवर्णं परमं ह्याहुर्दक्षिणार्थं न संशयः ॥

गोप्रदानं तारयते सप्त पूर्वान् परांस्तथा ।
सुवर्णदक्षिणां दत्त्वा तावद् द्विगुणमश्नुते ॥

सुवर्णं परमं दानं सुवर्णं दक्षिणा परा ।
सुवर्णं पावनं प्राहुः परिमाणं परं तथा ॥

अत्र 'परिमाणं परं [1]तथा' इत्यन्यत्रापि सुवर्ण[2]शब्दसम्बन्धात् तत्परिमाण-विशेषावगतेरैच्छिकपरिमाणसुवर्णदक्षिणादानं व्यावर्तते । तच्च शक्तविषयम् । अशक्तस्य तु यजमानस्य 'तस्यास्ततो दद्याद्यथाशक्त्या तु दक्षिणाम्' इति ब्रह्मवैवर्तवाक्येन ततोऽल्पाया अपि दक्षिणाया अभ्यनुज्ञानात् ।

गोदानमात्रप्रार्थनामन्त्रानाह वसिष्ठः —

घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः ।
घृतनद्यो घृतावर्तास्ता मे सन्तु सदा गृहे ॥

घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितम् ।
घृतं मे सर्वतश्चैव गवां मध्ये वसाम्यहम् ॥

इति ॥

इति गोदानविधिः ।

———————(:o:)———————

1. तथेन्यत्रापि A. D. 2. शब्दं A. D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ हेमशृङ्गीदानम्

स्कन्दपुराणे —

यो नरो गां प्रयच्छेत्तु सवत्सां कांस्यदोहनीम् ।
हैमशृङ्गीं रौप्यखुरां दुकूलक्षौमवासिनीम् ॥

शय्यास्तरणसंयुक्तां बहुपुष्पैः फलैर्युताम् ।
ब्राह्मणांस्तर्पयित्वा तु गन्धमाल्यैरलङ्कृताम् ॥

देवैरध्यासितां तां तु [1]सर्वैर्हस्तद्वयेन तु ।
मृदुबन्धेन बध्नीयादन्तःश्लक्ष्णेन रज्जुना ॥

कुशान् सुवर्णबीजानि तिलान् सिद्धार्थकांस्तथा ।
प्रदद्यात्तां ततोऽद्भिर्मन्त्रेणानेन सुव्रत ॥

सर्वदेवमयीं दोग्ध्रीं सर्वलोकमयीं तथा ।
सर्वलोकनिमित्तां तां सर्वदेवनमस्कृताम् ॥

प्रयच्छामि महासत्त्वामक्षय्याय शुभाय गाम् ।
एवमामन्त्र्य तां दत्त्वा [2]यत्र यत्र प्रजायते ॥

तत्र तत्र गता सा तु जन्तुं तारयते भयात् ।
सर्वलोकान्तरे गत्वा रमते च यथाऽमरः ॥

स तथा मानुषो जातो गोसहस्री महाबलः ।
रूपवान् बलवांश्चैव बहुपुत्रश्च जायते ॥

इति स्कन्दोक्तहेमशृङ्गीदानम् ।

1, सर्वोर्हस्तद्वयेन तु A. D. 2. यत्र यत्र यत्र A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ नन्दिपुराणोक्तहेमशृङ्गीदानम्

नन्दिपुराणे —

योगां सुपरिपूर्णाङ्गीं हेमशृङ्गीमकोपनाम् ।
सुशीलां राजतैः पादैश्चित्रवस्त्रसुसंवृताम् ॥

सलोहपात्रां कुतपे निविष्टचरणां तथा ।
कुतपो नेपालकम्बलः ।
सदक्षिणां प्रदद्याद्गां सोऽक्षय्यं स्वर्गमाप्नुयात् ॥

गवि रोमाणि यावन्ति सप्रसूतिकुलस्थितौ ।
तावन्त्यब्दानि वसति स्वर्गे दाता न संशयः ॥

प्रसूतीत्यादि । प्रसूतिः सन्तानं तत्सहिता कुलस्थितिः कुलपरम्परा यस्याः ।

एतच्छतगुणं पुण्यं कपिलादानतः स्मृतम् ॥

इति नन्दिपुराणोक्तहेमशृङ्गीदानम् ।

———(:०:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ मत्स्यपुराणोक्तहेमशृङ्गीदानम्

दश सौवर्णिके शृङ्गे खुराः पञ्चपलान्विताः ।
पञ्चाशत्पलिकं कांस्यं ताम्रं चापि तथैव च ॥

दाताऽस्याः स्वर्गमाप्नोति यावदाभूतसम्प्लवम् ।

पञ्चपलानि रौप्यस्य । कांस्यं दोहनाय । ताम्रं पृष्ठदेशाच्छादनाय । सुवर्णं दक्षिणा चेति ज्ञेयम् ।

इति मत्स्यपुराणोक्तहेमशृङ्गीदानम्

———(:o:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ महाभारते समानवत्सगोदानानि

समानवत्सां कपिलां धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसम्पन्नां सूर्यलोके महीयते ॥

सुव्रतां सुशीलाम् । समानवत्सां समानवर्णवत्साम् ।

रोहिणीं तुल्यवत्सां तु धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसम्पन्नां सूर्यलोके महीयते ॥

समानवत्सां शबलां धेनुं दद्यात् पयस्विनीम् ।
सुव्रतां वस्त्रसंवीतां सोमलोके महीयते ॥

शबला कर्बुरा ।

समानवत्सां कृष्णां तु धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसंवीतामग्निलोके महीयते ॥

वातरेणुसवर्णां तु सवत्सां कामदोहनीम् ।
प्रदाय वस्त्रसंयुक्तां वायुलोके महीयते ॥

वातरेणुसवर्णा धूसरवर्णा ।

समानवत्सां धूम्रां तु धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसंवीतां यमलोके महीयते ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

[1]अघ्न्यां हेमसवर्णां तु सवत्सां कांस्यदोहनाम् ।
प्रदाय वस्त्रसंवीतां वारुणं लोकमश्नुते ॥

[2]अघ्न्या गौः ।

हिरण्यवर्णां पिङ्गाक्षीं सवत्सां कामदोहनाम् ।
प्रदाय वस्त्रसंवीतां कौवेरं लोकमाप्नुयात् ॥

[3]पलालधूमवर्णां तु सवत्सां कामदोहनाम् ।
प्रदाय वस्त्रसंवीतां पितृलोके महीयते ॥

कामदोहनामनायासदोहनाम् ।

सवत्सां [4]पीवरीं दत्त्वा शितिकण्ठीमलङ्कृताम् ।
वैश्वदेवमसंवासं स्थानं श्रेष्ठं प्रपद्यते ॥

शितिकण्ठीं कृष्णपिङ्गलाम् ।

समानवत्सां गौरीं तु धेनुं दत्त्वा पयस्विनीम् ।
सुव्रतां वस्त्रसंवीतां वसूनां लोकमाप्नुयात् ॥

पाण्डुकम्बलवर्णां तु सवत्सां कामदोहनाम् ।
प्रदाय वस्त्रसंवीतां साध्यानां लोकमाप्नुयात् ॥

वत्सोपपन्नां नीलाङ्गीं सर्वरत्नसमन्विताम् ।
गन्धर्वाप्सरसां लोकान् दत्त्वा प्राप्नोति मानवः ॥

गोप्रदानरतो याति भित्त्वा जलदसञ्चयान् ।
विमानेनार्कवर्णेन दिवि राजन् विराजते ॥

---

1 अघ्न्या A. D. 2. अघ्न्याः A. D. 3. पलोल D. 4. वीवरीं A. वेवरीं D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तं चारुवेषाः सुश्रोण्यः सहस्रं वरयोषितः ।
रमयन्ति नरश्रेष्ठ गोप्रदानरतं नरम् ॥

इति समानवत्सगोदानानि ।

——:(0):——

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ दशवर्णधेनुदानानि

गां दद्याद् वेदपूर्णाय विप्राय गृहमेधिने ।
स्वर्णालङ्कृतशृङ्गीं च वस्त्रवण्टासमन्विताम् ॥

प्रत्यग्रां त्रिसमृद्धां तु [1]ललाटतटदर्पणाम् ।
राजतच्छत्रवरणां मुक्तालाङ्गूलभूषिताम् ॥

कांस्योपदोहनां तृप्तां लवणादितृणोदकैः ।

त्रिसमृद्धां त्रिभिः शीलक्षीरसन्तानैः समृद्धा ।

गवां पुच्छं गृहीत्वा च ससुवर्णेन पाणिना ॥

गृहस्थो वेदविद्विप्रो दापयेत् तत्प्रतिग्रहम् ।
भोगसौख्यप्रदा श्वेता धूमाभा पापनाशिनी ॥

कृष्णा स्वर्गप्रदा ज्ञेया गौरी च कुलवर्धिनी ।
रक्ता रूपप्रदा ज्ञेया पीता दारिद्र्यनाशिनी ॥

पुत्रप्रदा कृष्णसारा नीला धर्मविवर्धिनी ।
कपिला सर्वपापघ्नी नानावर्णा च मोक्षदा ॥

इति दशवर्णधेनुदानानि ।

——(:०:)——

1. लालटन्तट D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्रिरात्रगोदानम्

विष्णुधर्मोत्तरे —

हेमशृङ्गीं रौप्यखुरां मुक्ताला ङ्गूलभूषणाम् ।
अहताम्बरसंवीतां तथा कांस्योपदोहनाम् ॥

त्रिरात्रं स्थण्डिले सुप्त्वा त्रिरात्रं गोरसाशनः ।
तृप्तां तु तर्पिते दत्त्वा वाससा संवृते द्विजे ॥

सदक्षिणां महाभागां त्रिरात्रं गौरसैस्ततः ।
प्राणसंधारणं कृत्वा गवां लोके महीयते ॥

यावन्ति धेनो रोमाणि तावद्वर्षाणि मानवः ।
दत्त्वैवं कपिलां विप्रः प्राप्नोत्यभ्यधिकं फलम् ॥

अथ विष्णुधर्मोत्तरे —

वसिष्ठ उवाच —

पुण्यं दिनमथासाद्य स्नात्वा तर्प्य पितॄंस्तथा ।
कृतोपवासः सम्प्राश्य पञ्चगव्यं नरेश्वर ॥

घृतक्षीराभिषेकं च कृत्वा विष्णोः शिवस्य च ।
समभ्यर्च्य यथान्यायं पुष्पादिभिरनुक्रमात् ॥

उदङ्मुखीं प्राङ्मुखीं वा गृष्टिं कृत्वा पयस्विनीम् ।

गृष्टिः सकृत्प्रसूता गौः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सपुत्रां वस्त्रसंवीतां सितयज्ञोपवीतिनीम् ।
स्वर्णशृङ्गीं रौप्यखुरां सुवर्णोपरि संस्थिताम् ॥

शक्तितो दक्षिणायुक्तां ब्राह्मणाय निवेदयेत् ।

गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः ।
गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥

प्रदक्षिणं ततः कृत्वा धेनुं द्विजवरं च तम् ।
इमां नः प्रतिगृह्णीष्व धेनुं दत्तां मया तव ॥

स मे पापापनोदाय गोविन्दः प्रीयतामिति ।

वह्निपुराणे [1]त्वयमधिको मन्त्रः —

या धेनुः [2]कश्यपस्यासीदत्रेर्वा गौतमस्य च ।
सा मे कामफला देवि इहलोके परत्र च ॥

इति ॥

एवमुच्चार्य तं विप्रं गोविन्दमुपकल्पयेत् ।
अनुव्रजेत्तु गच्छन्तं पदान्यष्टौ नराधिप ॥

अनेन विधिना धेनुं यो विप्राय प्रयच्छति ।
सर्वकामसमृद्धात्मा विष्णुलोकं स गच्छति ॥

सप्तावरान् सप्त परानात्मानं चैव मानवः ।
सप्तजन्मकृतात् पापान्मोचयत्यवनीपते ॥

पदे पदेऽश्वमेधस्य गोसवस्य च मानवः ।
फलमाप्नोति राजेन्द्र दक्षायैवं जगौ हरिः ॥

सर्वकामदुघा सम्यक् सर्वकालेषु पार्थिव ।
भवत्यथो पापहरा यावदिन्द्रा[3]श्चतुर्दश ॥

1. त्वधिकोऽयं मन्त्रः A. 2. कश्यपःस्यासीद् A;D. 3. श्चद्दतुश A;D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सर्वेषामेव पापानां कृतानामविजानता ।
प्रायश्चित्तमिदं प्रोक्तमनुतापोपबृंहितम् ॥

सर्वेषामेव दानानामेकजन्मानुगं फलम् ।
हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम् ॥

ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चान्यैश्च मानवैः ।
लोकाः कामदुघाः प्राप्ता दत्त्वैतद्विधिना नृप ॥

गोभ्योऽधिकं जगति नापरमस्ति किञ्चिद् –
दानं पवित्रमिति शास्त्रविदो वदन्ति ।
ताः सम्पदः सुरसदश्च समीहमानै –
र्देयाः सदैव विधिना द्विजपुङ्गवेभ्यः ॥

इति त्रिरात्रगोदानम् ।

———(:०:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ देवताभ्यो गोदानम्

स्कन्दपुराणे —

शिवाय विष्णवे वापि यस्तु दद्यात् पयस्विनीम् ।
धेनुं स्नानोपहारार्थं स परं ब्रह्म गच्छति ॥

भविष्यत्पुराणे —

सौरीं सूर्याय यो दद्यात्तरुणीं च पयस्विनीम् ।
तेन दत्तं भवेत् सर्वं जगत् स्थावरजङ्गमम् ॥

[1]सौरी सूर्यसिता धेनुरित्यर्थः ।

स्नानाग्निकार्यमुद्दिश्य सुरूपां च पयस्विनीम् ।
कुलीनां कपिलां दत्त्वा दत्तं भवति गोशतम् ॥

कुलीनां शीलादिगुणसम्पन्नां गोकुलोत्पन्नां वा ।

स्कन्दपुराणे [2]रुद्रानुद्दिश्य नानाधेनुदानं प्रक्रम्य —

नरैःसर्वप्रयत्नेन एता देयाः प्रयत्नतः ।
धेनवो यो न शक्तः स्यादेकां देया प्रयत्नतः ॥

सर्वेषामेव रुद्राणां भर्तृयज्ञवचो यथा ।

इति देवताभ्यो गोदानम् ।

---

1. सौरीं D. 2. फद्रानु° A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ वृषभैकादशीदानम्

शिवधर्मेषु —

दश गावः सवृषभा वृषभैकादशी स्मृता ।
शिवाय विनिवेद्यैवं विशुद्धेनान्तरात्मना ॥

रुद्रैकादशतुल्यात्मा बलभोगादिभिर्गुणैः ।
शिवादिसर्वलोकेषु यथेष्टं मोदते वशी ॥

भविष्यत्पुराणे —

दश गावः सवृषभा वृषभैकादशी स्मृता ।
सूर्याय विनिवेद्येह यत् फलं लभते शृणु ॥

द्वादशादित्यतुल्यात्मा अणिमादिगुणैर्युतः ।
सौरादिसर्वलोकेषु सूर्यवन्मोदते दिवि ॥

इति वृषभैकादशीदानम् ।

——:0:——

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ वृषभाधिकगोशतदानम्

शिवधर्मोत्तरे —

सवृषं गोशतं दद्याच्छिवायातीव शोभनम् ।
त्रिः सप्तकुलजैः सार्धं श्रृणु यत् फलमाप्नुयात् ॥

सूर्यकोटिप्रतीकाशैर्विमानैः सार्वकामिकैः ।
अनेकयानसंख्यातैरमरासुरपूजितैः ॥

शतरुद्रबलोपेतो वीरभद्र इवापरः ।
गत्वा शिवपुरं दिव्यमशेषाधिपतिर्भवेत् ॥

भविष्यत्पुराणे —

सवृषं गोशतं दत्त्वा भास्कराय नराधिप ।
त्रिः समकुलजैः सार्धं श्रृणु यत् फलमाप्नुयात् ॥

विमानैः सूर्यसङ्काशैर्दिवाकर इवापरः ।
गत्वादित्यपुरं रम्यं क्रीडते सूर्यवन् नृप ॥

भुक्त्वा तु विपुलान् भोगान् प्रलये सर्वदेहिनाम् ।
मोहकञ्चुकमुत्सृज्य [1]विशत्यादित्यमण्डलम् ॥

सर्वज्ञः सूर्यपरमः शुद्धः स्वात्मनि संस्थितः ।
[2]सर्वगः परिपूर्णत्वात् सूर्यवद्दीप्तिमाप्नुयात् ॥

इति वृषभाधिकगोशतदानम् ।

---

1. विशत्वादित्य A. D. 2. सगर्वः A. सर्वैःर्वं.D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथोभयमुखीदानम्

मत्स्यपुराणे —

रुक्मशृङ्गीं रौप्यखुरां मुक्तालाङ्गूलभूषिताम् ।
कांस्योपदोहनां राजन् सवत्सां द्विजपुङ्गवे ॥

प्रसूयमानां यो दद्याद्धेनुं द्रविणसंयुताम् ।
यावद्वत्सो योनिगतो यावद् गर्भं न मुञ्चति ॥

तावद् गौः पृथिवी ज्ञेया सशैलवनकानना ।

धेनुं द्रविणसंयुतामिति दक्षिणारूपबहुद्रविणसंयुताम् । अत्रोभयमुखीं प्रस्तुत्य देवलः —

[1]अलङ्कृत्योक्तविधिना सुवर्णत्रिपलान्विता ।
दातव्या द्विपला मध्या पलाद्या कन्यसी मता ॥

वराहपुराणे —

यश्चोभयमुखीं दद्यात् प्रभूतकनकान्विताम् ।
तद्दिनं पायसाहारः पयसा चातिवाहयेत् ॥

सुवर्णस्य सहस्रेण तदर्धेनाऽपि वा पुनः ।
तस्याऽप्यर्धं शतं वाथ [2]पञ्चाशच्च ततोऽर्धकम् ॥

---

1. अलङ्कृत्वोक्त A. D. 2. पञ्चाशविशुर्धकम् D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यथाशक्त्याऽपि दातव्यं वित्तशाठ्यविवर्जितम् ।
इमां गृहाणोभयमुखीं भवांस्त्राता ममास्तु वै ॥

मम वंशविशुद्धस्य सदा स्वस्तिकरी भव ।

इरावती धेनुमती जप्त्वा देवस्योनात् वा तदनन्तरं ।

प्रतिगृह्णामि त्वां धेनुं कुटुम्बार्थे विशेषतः ॥

स्वस्तिर्भवतु मे नित्यं रुद्रमातर्नमो नमः ।
द्यौस्ते [1]प्रतिददामि पृथिवी ते प्रतिगृह्णामि ॥

क इदं कस्माद् ददेति जपेन् मन्त्रं वसुन्धरे ।
विसृजेद् ब्राह्मणं देवि गां च तस्य गृहं नयेत् ॥

मत्स्यपुराणे —

प्रसूयमानां यो दद्याद्धेनुं द्रविणसंयुताम् ।
ससमुद्रगुहा भूमिः सशैलवनकानना ॥

चतुरन्ता भवेद् दत्ता पृथिवी नात्र संशयः ।
यावन्ति धेनुरोमाणि वत्सस्य च नराधिप ॥

तावत्संख्यान् युगगणान् देवलोके महीयते ।
पितॄन् पितामहांश्चैव तथैव प्रपितामहान् ॥

उद्धरिष्यत्यसन्देहो नरकाद् भूरिदक्षिणः ।
घृतक्षीरवहाः कुल्या दधिपायसकर्दमाः ॥

यत्र यत्र गतिस्तस्य भवेच्चेप्सितकामदा ।
गोलोकः सुलभस्तस्य ब्रह्मलोकश्च पार्थिव ॥

---

1. प्रतिगृह्णामि A. D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्त्रियश्च तं चन्द्रसमानवक्त्राः प्रतप्तजाम्बूनदतुल्यवर्णाः ।
महानितम्बस्तनमध्यवृत्ता भजन्त्यजस्रं नलिनाभनेत्राः ॥

उभयशिरसं दद्यादित्यनुवृत्तौ च्यवनः —

तस्याः प्रदानकालः प्रसवकालः । नान्यं कालं प्रतीक्षेत । व्यतीपात-विषुवायनषडशीतिमुखविष्णुपदाद्याः ग्रहणान्ता सर्व एव पुण्यकालास्तदैव यत्र सार्धप्रसूता । तत्र स्नातो ब्राह्मणं ब्रूयाच्छ्रुतशीलसत्यशौच [1]वृत्तजातिक्रियाद्यैर्गुणै-रुपेतं च काले प्रणिपत्य ब्रूयादहमतीवार्तो भीतोऽस्मादगाधादपारात्संसारार्णवात् । समुत्तारयामि दशावरान् दश परानात्मानं च स्वामिन् भवन्तं दानपात्रमासाद्य । स चानुग्रहबुद्ध्या दानार्थं लिप्सया गृह्णीत । दाता च तामनुमन्त्रयेत् । त्वं महीमवनिं विश्वधेनाम्' (ऋ. ४. १९. ६) इति क इदं कस्माद् इति गृहीतायां दक्षिणेन पाणिना वत्समाकर्षयेत् । 'गर्भेनुसन्नन्वेषामवेदम् (ऐ.आ.२.५.१) इति जयेन् निष्क्रान्तेऽनलमुपसमाधाय देवान् पितॄन् नदीः पर्वतान् वनस्पतीनु-दधीन्नागानोषधीस्तर्पयेत् तैस्तैर्मन्त्रैः । तेषां मन्त्रपदानि भवन्ति । ये देवासो दिव्येकादशस्था (ऋ. १. १३९. २१) । उशन्तस्त्वा निधीमहि (ऋ. १०. १६. १२) । इमं मे गङ्गे यमुने सरस्वति (ऋ. १०.७५. ५) । अद्रिभिः सुतो मतिभिश्च नो हितः (ऋ. ९. ७५. ४) । वनस्पते शतवल्शो विरोह (ऋ. ३.८.२९) । समुद्रज्येष्ठाः सलिलस्य मध्यात् (ऋ. ७.४९.१) । अहिरिव भोगैः पर्येति बाहुं (ऋ. ६. ७५. १४) । मधुवाता ऋतायते (ऋ. १. ९०. ६) इति मन्त्राः । तदनु पार्थिवीभिः पृथिवीं तर्पयेत् । 'ईळे द्यावा पृथिवी पूर्वचित्तये (ऋ. १. ११२. १) ।' 'मही द्यौः पृथिवी च नः' (ऋ.१.१२.१३) । उर्वी पृथ्वी बहुले दूरे अन्ते (ऋ. १.१८५.७) । गौरीर्मिमाय सलिलानि तक्षती (ऋ. १. १६४. ४१) इत्यादिभिश्चतुरशी-त्याज्याहुतीर्जुहोति । ब्राह्मणान् भोजयेत् स्वस्त्ययनं वाचयीत । अथास्य कर्मणो व्युष्टिमुदाहरन्ति । अभक्ष्यभक्ष्यमपेयपायिनं ब्रह्मघ्नं सद्य एव पुनाति ।

---

1. वृत A. D. 2. तर्पयंस्तै A. E.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उपाध्यायीं[1] स्वसुतां स्वामिभार्यां मातरं मातृष्वसारं मातुलानीं भगिनीं भागिनेयीं शिष्यजायां धात्रीमन्यामप्यगम्यां गत्वोभयशिरसं सपरिवारां ब्राह्मणाय दद्यात् । परिकरोऽस्याः सुवर्णं रत्नं रूप्याणि क्षेत्राणि ग्रामा वा धान्यानि वस्त्राणि रसा लवणाद्याश्चन्दनाद्या गन्धाः शतं गवां तदर्धमर्धं वा सर्वस्वं वा सह तया ब्राह्मणाय दद्यान् महापातकविमुक्तये ।

इत्युभयतोमुखीगोदानविधिः ।

———(:०:)———

1. उपाध्यायां E.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ वैतरणीधेनुदानम्

ब्रह्मवैवर्ते —

युधिष्ठिरेण वैतरणीस्वरूपादिकं पृष्टस्य मार्कण्डेयस्य वाक्यम् —

या सा वैतरणी नाम यमद्वारे महानदी ।
तस्याः प्रमाणं रूपं च शृणु सर्वभयावहम् ॥

शतयोजनविस्तीर्णा पृथुत्वे स महासरित् ।
अगाधानन्तरूपा सा दृष्टमात्रभयावहा ॥

पूयशोणिततोया सा मांसकर्दमनिर्मिता ।
कृमिभिः सङ्कुलं पूयं वज्रतुण्डैरयोमुखैः ॥

शिशुमारैश्च मकरैर्वज्रकर्तरिसंयुतैः ।
अन्यैश्च जलजैर्घोरैर्युक्ता सा मर्मभेदिभिः ॥

पतन्ति तत्र वै मर्त्याः क्रन्दमानाः सुदारुणाः ।
हा भ्रातः पुत्र तातेति प्रलपन्तो [1]मुहुर्मुहुः ॥

चिरमन्तर्निमज्जन्ति ग्लानिं गच्छन्ति देहिनः ।
चतुर्विधैः प्राणिगणैर्द्रष्टव्या सा महानदी ॥

तरन्ति तस्या दानेन अन्यथा तु पतन्ति ते ।
धार्मिका दानशीलाश्च तां तरन्ति नरोत्तमाः ॥

---

1. मुहुः E.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सानुकूला भवेद्येन नदी वैतरणी नृणाम् ।
तच्छृणुष्व नरव्याघ्र कथ्यमानं युधिष्ठिर ॥

अयने विषुवे पुण्ये व्यतीपाते दिनक्षये ।
अन्येषु पुण्यकालेषु दीयते दानमादरात् ॥

पाटलामथ वा कृष्णां कुर्याद् वैतरणीं शुभाम् ।
स्वर्णशृङ्गीं रौप्यखुरां कांस्यपात्रसुदोहनाम् ॥

कृष्णवस्त्रयुगच्छन्नां सप्तधान्यसमन्विताम् ।
कार्पासद्रोणशिखरे आसीनां ताम्रभाजने ॥

यमं हेमं प्रकुर्याद् वै लोहदण्डसमन्वितम् ।
महामहिषमारूढमूढपाशं करेऽपरे ॥

इक्षुदण्डमयं बद्ध्वा उडुपं पट्टबन्धनैः ।
उडुपोपरि तां धेनुं सूर्यदेहसमुद्भवाम् ॥

कृत्वाधिवासयेद् विद्वांश्छत्रोपानहसंयुताम् ।

सप्तधान्यादि परिभाषायामुक्तम् । उडुपं प्लवः । ततो धर्मराजमुडुपगतां धेनुं च यथासम्भवं वासोगन्धपुष्पादिभिरुपहारैः सम्पूज्याधिवासयेत् ।

इममुच्चारयेन्मन्त्रं सङ्गृह्योदकमण्डलुम् ॥

यमद्वारे महाघोरे दृष्टा वैतरणी नदी ।
तर्तुकामो ददाम्येनां तुभ्यं वैतरणीं च गाम् ॥

अत्रैव प्रतिग्रहीतुर्विप्रस्य वस्त्रालङ्कारादिभिर्वरणम् । इत्यधिवासनमन्त्रः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ दानम् —

ॐ ॥ विष्णुरूप द्विजश्रेष्ठ भूदेव पङ्क्तिपावन ।
सदक्षिणा मया तुभ्यं दत्ता वैतरणी च गौः ॥

स्मृत्यन्तरे तु अन्यो दानमन्त्रो दर्शितः ।

यमद्वारे महाघोरे या सा वैतरणी नदी ।
तां तर्तुं गां ददाम्येनां तुभ्यं वैतरणीमहम् ॥

धर्मराजं च विप्रं च धेनुं वैतरणीं तथा ।
सर्वं प्रदक्षिणीकृत्य ब्राह्मणाय निवेदयेत् ॥

पुच्छं सङ्गृह्य तद्धेनोरग्रे कृत्वा च ब्राह्मणम् ।
धेनुके त्वं प्रतीक्षस्व यमद्वारे महाभये ॥

उत्तितीर्षुरहं देवि वैतरण्यै नमो नमः ।
अनुव्रजेच्च गच्छन्तं सर्वं तस्य गृहं नयेत् ॥

अनुव्रजेत् अनुगच्छेत् । "धेनुके त्वं" इति मन्त्रेणेति शेषः ॥

उक्तकालेषु दानाकरणे कालान्तरमाह व्यासः —

आसन्नमृत्युना देया गौः सवत्सा तु पूर्ववत् ।
तदभावे तु गौरेव नरकोद्धरणाय वै ॥

पूर्ववत् स्वर्णशृङ्गादिप्रकारेण ।

तदा यदि न शक्नोति दातुं वैतरणीं तु गाम् ।
शक्तोऽन्योऽरुक्तदा दद्याच्छ्रेयो दद्यान् मृतस्य तु ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तदा मरणपूर्वकाले । अरुक् रोगरहितः ।

ब्रह्मवैवर्ते —

एवं कृते महीपाल सा सरित् सुखदा भवेत् ॥

तार्यते च तया धेन्वा सा सरिज् जलवाहिनी ।
सर्वाह्लादानवाप्नोति ये दिव्या ये च मानुषाः ॥

रोगी तु रोगनिर्मुक्तस्तथैवापदि संस्थितः ।

इतीदमुक्तं तव धर्मसूनो
पुण्यं मया वैतरणीप्रदानम् ।
शृणोति भक्त्या पठतीह सम्यक्
स याति विष्णोः पदमप्रमेयम् ॥

इति वैतरणीधेनुदानम् ।

——(:०:)——

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ वृषभदानम्

भविष्योत्तरे (१६०. ३-१२) —

कृष्ण उवाच —

वृषदानफलं दिव्यं शृणुष्व कथयामि ते ।
पवित्रं पावनं चैव सर्वदानोत्तमोत्तमम् ॥

दशधेनुसमोऽनड्वानेकश्चैव धुरन्धरः ।
दशधेनुप्रदानाद्धि वृष एको विशिष्यते ॥

[1]वृषभश्चापि पुष्टाङ्गो ह्यरोगः पाण्डुनन्दन ।
युवा भद्रः सुशीलश्च सर्वदोषविवर्जितः ॥

धुरन्धरः स्थापयति एक एव कुलं महत् ।
भ्राता भवति संसारे नात्र कार्या विचारणा ॥

अलङ्कृत्य वृषं शान्तं पुण्येऽह्नि[2] समुपस्थिते ।

अलङ्कृत्य स्वर्णशृङ्गवस्त्रादिना ।

रौप्यलाङ्गूलसंयुक्तं ब्राह्मणाय निवेदयेत् ॥

मन्त्रोणानेन राजेन्द्र तं शृणुष्व वदामि ते ।
धर्मस्त्वं वृषरूपेण [3]जगदानन्दकारकः ॥

---

1. द्वो हृष्टश्चाति Printed ed. of म. पु. P. 841. 2. पुण्यकाले Printed भ. पु. 841. 3. जगदादकारक A. जगनदोदकारक D. जगदानन्द-कारणः Printed.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अष्टमूर्तेरधिष्ठानमतः पाहि सनातन ।
दत्त्वैवं दक्षिणायुक्तं प्रणिपत्य विसर्जयेत् ॥

सप्तजन्मकृतं पापं वाङ्मनःकर्मकायजम् ।
तत् सर्वं विलयं याति गोदानसुकृतेन वै ॥

यानं वृषभसंयुक्तं दीप्यमानं सुशोभितम् ।
आरुह्य कामगं दिव्यं स्वर्लोकमधिरोहति ॥

यावन्ति तस्य रोमाणि गोवृषस्य महीपते ।
तावद्वर्षसहस्राणि गवां लोके महीयते ॥

गोलोकादवतीर्णस्तु इहलोके द्विजो भवेत् ।

महाभारते ––

युवानमिन्द्रियोपेतं शतेन सह यूथपम् ॥

गवेन्द्रं ब्राह्मणेन्द्राय भूरिशृङ्गमलङ्कृतम् ।
वृषभं ये प्रयच्छन्ति श्रोत्रियाय परन्तप ॥

ऐश्वर्याण्यभिजायन्ते जायमानेष्वतः[2] पुनः ।

शतेन [3]स्त्रीगवामिति विशेषः । भूरिशृङ्गं स्वर्णशृङ्गम् ।

स्कन्दपुराणे ––

निवेद्य सद्गुणोपेतमनड्वाहं शिवाश्रये ।
दशधेनुप्रदानस्य फलं शोभनमाप्नुयात् ॥

देवलः ––

वृषयुग्मं वृषं वापि दत्त्वा गत्वेश्वरालये ।
[4]भुंक्ते मन्वन्तरे भोगान् द्विगुणान् युगलाङ्गली ॥

इति वृषभदानम् ।

---

1. कायकर्मणाम् भ. पु. P. 841. 2. यजमानः E. 3. स्त्रीगवानाम् E.
4. भुक्तेमन्वन्तरभोगा D. भुक्तेमन्वन्तरे भोगा D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ गुडधेन्वादिदानविधिः

अथाऽत्र धेनुशब्दसाधारण्यात् प्रथमा गुडधेनुः स्यादित्यादि दशमी स्यात स्वरूपत इत्यन्ते स्वरूपगवीसहपाठाच्च गुडधेन्वादिदानानि निरूप्यन्ते ।

मत्स्यपुराणे —(८१.१७-२१)

यास्तु[1] पापविनाशिन्यः कथिता दश धेनवः ।
तासां स्वरूपं वक्ष्यामि नामानि च नराधिप ॥

प्रथमा [2]गुडधेनुः स्याद् घृतधेनुस्तथाऽपरा ।
तिलधेनुस्तृतीया तु चतुर्थी जलसंज्ञिता ॥

क्षीरधेनुश्च [3]विख्याता मधुधेनुस्तथापरा ।
सप्तमी शर्कराधेनुर्दधिधेनुस्तथाऽष्टमी ॥

रसधेनुस्तु नवमी दशमी स्यात् स्वरूपतः ।
कुम्भा[4] घृतादिधेनूनामितरासां तु राशयः ॥

सुवर्णधेनुमप्यत्र केचिदिच्छन्ति मानवाः[5] ।
नवमीं[6] तिलतैलेन तथान्येऽपि महर्षयः ॥

रसधेनुस्थाने सुवर्णधेनुस्तिलतैलधेनुश्च । उक्तगुडधेन्वादिविधानमपि तत्रैवोक्तम् । (म. पु. ८२. २–१६)

---

1. यास्ताः म. पु. P. 201. 2. गुडदोनुः A. गुडदैनुः D. 3. विख्याती A. 4. कुम्भाः स्युर्द्रव° म. पु. P. 201. 5. मानवीः A. 6. नवनीतेन रत्नैश्च म. पु. 201.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गुडधेन्वादिदानस्य यद्रूपमिह यत् फलम् ।
तदिदानीं प्रवक्ष्यामि सर्वपापप्रणाशनम् ॥

कृष्णाजिनं चतुर्हस्तं प्राग्ग्रीवं[1] विन्यसेद् भुवि ।
गोमयेनोपलिप्तायां दर्भानास्तीर्य सर्वतः ॥

लघ्वेणकाजिनं तद्वद्वत्सस्य[2] परिकल्पयेत् ।
प्राङ्मुखीं कल्पयेद्धेनुमुदक्पादां सवत्सकाम् ॥

एणकाजिनं कृष्णाजिनम् । प्राङ्मुखीं प्राक्शिरसम् । सवत्सामुत्तर-भागस्थितवत्ससहिताम् ।

उत्तमा गुडधेनुः स्यात् सदाभारचतुष्टयम् ।
वत्सं भारेण कुर्वीत [3]भाराभ्यां मध्यमा स्मृता ॥

अर्धभारेण वत्सः स्यात् कनिष्ठा भारकेण तु ।
चतुर्थांशेन वत्सः स्याद् गृहवित्तानुसारतः ॥

भारः परिभाषायां व्याख्यातः ।

धेनुवत्सौ घृतास्यौ तौ सितसूक्ष्माम्बरावृतौ ।
शुक्तिकर्णाविक्षुपादौ शुचिमुक्ताफलेक्षणौ ॥

सितसूत्रशिरालौ तौ सितकम्बलकम्बलौ ।

द्वितीयकम्बलशब्दो गलकम्बलवाची ।

ताम्रगण्डुकपृष्ठौ[4] तौ सितचामररोमकौ ॥

---

1. प्रागग्रं. 2. वत्सश्च. 3. द्वाभ्यां वै. 4. गण्डक (म. पु. पृ. 200) पात्रक-दा. सा. पृ. 225.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गण्डुकं ककुत्प्रदेशः ।

विद्रुमभ्रूयुगोपेतौ नवनीतस्तनान्वितौ ।
क्षौमपुच्छौ कांस्यदोहाविन्द्रनीलकतारकौ ॥

सुवर्णशृङ्गाभरणौ राजतक्षुरसंयुतौ ।
नानाफलमयैर्दन्तैर्घ्राणगन्धकरण्डकौ ॥

गन्धकरण्डकः कर्पूरादिपूरितो रजतादिपात्रविशेषः ।

अत्रानुक्तपरिमाणानां सुवर्णादीनां सारतः परिमाणतश्च फलविशेषत इति न्यायाद्यथाशक्त्याधिक्यग्रहणम् ।

इत्येवं रचयित्वा तु[1] धूपदीपैरथार्चयेत् ।

[2]मन्त्रा आमन्त्रणमन्त्राः —

या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता ।
धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु ॥

देहस्था या च रुद्राणां शङ्करस्य सदा प्रिया ।
धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥

विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसौ ।
चन्द्रार्कशक्रशक्तिर्या धेनुरूपाऽस्तु सा श्रिये ॥

चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च ।
लक्ष्मीर्या लोकपालानां सा धेनुर्वरदाऽस्तु मे ॥

स्वधा या पितृमुख्यानां स्वाहा यज्ञभुजां तथा ।
सर्वपापहरा धेनुस्तस्माच्छान्तिं प्रयच्छ मे ॥

---

1. तौ म. पु. P. 201. 2- मन्त्रान् आमन्त्रणमन्त्रान् A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवमामन्त्र्य तां धेनुं ब्राह्मणाय निवेदयेत् ।
विधानमेतद्धेनूनां सर्वासामिह पठ्यते ॥ (म. पु. ८१. ११-१६)

सर्वासां पूर्वोक्तघृतादिधेनूनां स्वरूपधेनुव्यतिरिक्तानाम् । स्वरूपधेनोरुपस्कराणां घृतास्यशुक्तिकर्णेक्षुपादादीनां मुख्यधेनुसादृश्यसम्पादकानां दृष्टोपयोगा[1]भावेनादृष्टकल्पनाप्रसङ्गात् । तथा —

एतदेव विधानं स्यात् त एवोपस्कराः स्मृताः ।
मन्त्रावाहनसंयुक्ताः सदा पर्वणि पर्वणि ॥

यथाश्रद्धं प्रदातव्या[2] भुक्तिमुक्तिफलप्रदाः[3] ।
अशेषयज्ञफलदाः सर्वपापहराः शुभाः ॥ (म. पु. १२. २२-२४)

अयने विषुवे चैव व्यतीपाते तथा पुनः ।
गुडधेन्वादयो देया उपरागादिपर्वसु ॥ (म. पु. ८१. २९)

अत्र घृतादिधेनुषु द्रव्यपरिमाणमपि गुडधेनूक्तमेव। विधानमितिकर्तव्यता। उपस्करा घृतवस्त्रशुक्तीक्षुक्षौमादयः ।

इति गुडधेन्वादिदानविधिः ॥

------(:o:)------

१. भायेन A. 2. श्रदातव्या A.D. 3. प्रदीःA. 4. आप म. पु. P. 201.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ गुडधेन्वादिदानप्रयोगः

तत्र यजमानो विषुवायनोपरागादिपूर्वोक्तैकतमकाले पुण्यदेशे च गुडादिधेनुदानं चिकीर्षुः कृतनित्यक्रियः शुद्धे देशे गोमयोपलिप्ते प्राङ्मुखोपविष्टः सकुशोपग्रहपाणिः कुशयवजलान्यादायाद्ये[1]त्यादिदेशकालकीर्तनान्ते सकलदुरितक्षयपूर्वकाशेषयज्ञजन्यफलसमफलप्राप्त्युत्तरभुक्तिमुक्ति[2]प्राप्तुकामोऽमुकधेनुदानमहं करिष्य इति [3]सङ्कल्प्य, पुण्याहवाचनं विधायैकमाचार्यं यथोक्तलक्षणं यथाशक्ति वस्त्रमुद्रिकाकुण्डलादिभूषितं चिकीर्षितधेनुदानप्रतिग्रहार्थं वृणुयात् । ततो गोमयोपलिप्तायां कुशास्तृतायां भुवि चतुर्हस्तं प्राग्ग्रीवमुत्तरलोमकं कृष्णाजिन प्रसार्य तत्र भारचतुष्टयपरिमितेन गुडादिनोत्तमां भारद्वयपरिमितेन मध्यमामेकभारपरिमितेनाधमामिति शक्त्यनुसारात् सम्पादितेन प्राक्शिरसमुदक्पादां धेनुं कल्पयित्वा वक्ष्यमाणद्रव्यैरङ्गानि कल्पयेत् । यथा—मुखं घृतपूर्णपात्रेण । शुक्तिभ्यां कर्णौ । इक्षुदण्डैः पादान् । मुक्ताफलाभ्यामीक्षणे। इन्द्रनीलाभ्यां तारके । सितसूत्रैः शिराः। [4]सितकम्बलेन गलकम्बलम् । ताम्रेण ककुदं पृष्ठं च । सितचामरै रोमाणि । विद्रुमैर्भ्रूयुगम् । नवनीतेन स्तनान् । क्षौमेण पुच्छम् । सुवर्णेन शृङ्गे । रूप्येण खुरान् । नानाफलैर्दन्तान् । गन्धकरण्डकेन घ्राणं कल्पयित्वा कांस्यमयदोहनपात्रां सितसूक्ष्मवस्त्रावृतां च कुर्यात् । एवमेव धेनोरुत्तरे लघुकृष्णाजिने धेन्वर्थोपकल्पितगुडादिद्रव्यचतुर्थांशेन घृतादिद्रव्यैः सह वत्सं कल्पयेत् । ततो धेनुं वत्समावाहनपूर्वकं प्रतिष्ठाप्य, सप्रणवचतुर्थीनमोन्तैर्गुडधेन्वादिनाममन्त्रैः 'ॐ गुडधेनवे [5]सवत्सायै नमः' इत्यादिरूपैरासनार्घ्य-[6]पाद्याचमनीयाद्युपचारैर्यथावदभ्यर्च्य गृहीतकुसुमाञ्जलिर्धेनुं सवत्सां प्रदक्षिणीकृत्य-

या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता ।
धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु ॥

---

1. द्येसादि D. 2. प्राप्तकामो A;D. 3. कृतसंकल्प E. 4. सिल E 5. सवत्सादै A;D. 6. पाद्याचमनमनीयाद्युप A;D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देहस्था या च रुद्राणां शङ्करस्य सदा प्रिया ।
धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥

विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसौ ।
चन्द्रार्कशक्रशक्तिर्या धेनुरूपाऽस्तु सा श्रिये ॥

चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च ।
लक्ष्मीर्या लोकपालानां सा धेनुर्वरदाऽस्तु मे ॥

स्वधा या पितृमुख्यानां स्वाहा यज्ञभुजां तथा ।
सर्वपापहरा धेनुस्तस्माच्छान्तिं प्रयच्छ मे ॥
(म. पु. ८१. २१. २१)

इति श्लोकपञ्चकेनामन्त्र्य पुष्पाञ्जलिं धेनोरुपरि प्रक्षिप्य नमस्कृत्य [1]पश्चाद्भागे प्राङ्मुख उपविश्य कुशयवतिलजलान्यादायाद्येत्यादिदेशकालकीर्तनान्ते अमुकगोत्रायाऽमुकशर्मणेऽमुकवेदामुकशाखाध्यायिने ब्राह्मणाय सकलपापक्षयपूर्वकाशेष(यज्ञ)जन्यफलसमफलप्राप्तिसहितभुक्तिपूर्वकमुक्तिकाम इमामेतावत्परिमिते[2]र्द्रव्यैः कल्पितामामुकधेनुं घृतास्यां शुक्तिकर्णामिक्षुपादां शुचिमुक्ता[3]फलेक्षणामिन्द्रनीलतारकां सितसूत्रशिरां सितकम्बलमयगलकम्बलां ताम्रमयककुत्पृष्ठां सितचामररोमकां विद्रुमभ्रूयुगां नवनीतस्तनां क्षौमपुच्छां कांस्यदोहां सुवर्णशृङ्गीं रौप्यखुरां नानाफलकल्पितां गन्धकरण्डकघ्राणां सितसूक्ष्माम्बरावृतामेतद्धेन्वर्थैतद्द्रव्यचतुर्थांशोपकल्पितवत्सां सम्प्रदद इति पुच्छदेशे दद्यात् । प्रतिग्रहीता सावित्रेण यजुषा प्रतिगृह्य ॐ स्वस्तीत्युक्त्वा कामस्तुतिं पठेत् । ततो दाता कृतैतद्धेनुदानप्रतिष्ठार्थमिदं सुवर्णमग्निदैवतं दक्षिणां तुभ्यं सम्प्रदद इति दत्त्वा दीनानाथादीन् यथाशक्ति तोषयित्वा आचार्यं क्षमापयेत् ।

यत्तु वह्निपुराणादावितोऽपि न्यूनपरिमाणद्रव्येण घृतधेनुकथनं तत्तद्धेन्वपेक्षया प्रकारान्तरमेवेति न विरोधः । यथा —

---

1. पत्वाद्भागे A. 2. द्रव्यकल्पिता D. 3. फलक्षणानीलमिन्द्रतारकां D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वह्निपुराणे —

'प्रथमा गुडधेनुः स्यात्' इत्याद्यभिधाय

नवनीतेन तैलेन गन्धैः प्रोक्ता तथाऽपरा ।
कुम्भा स्यू रसधेनूनां द्रोणैरेव हि राशयः: ॥

सर्वाः समफलाः प्रोक्ताः मध्यमोत्तमकन्यसा ।"

इत्यादि ।

इति गुडधेन्वादिदानप्रयोगः ।

——(:०:)——

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ तिलधेनुदानम्

विष्णुधर्मोत्तरे —

तिलधेनुं प्रवक्ष्यामि केशवप्रीणनाय च ।
यां दत्त्वा ब्रह्महा गोघ्नः पितृघ्नो गुरुतल्पगः ॥

अगारदाही गरदः सर्वपापयुतोऽपि वा ।
महापातकयुक्तश्च संयुक्तश्चोपपातकैः ॥

मुच्यते ह्यखिलैः पापैर्विष्णुलोकं च गच्छति ।
अनुलिप्ते महीपृष्ठे वस्त्राजिनकुशावृते ॥

धेनुं तिलमयीं कृत्वासर्व रत्नैरलङ्कृताम् ।
धेनुं द्रोणेन कुर्वीत आढकेन तु वत्सकम् ॥

स्वर्णशृङ्गीं रौप्यखुरां गन्धघ्राणवतीं तथा ।
कुर्याच्च शर्कराजिह्वां गुडास्यामविकम्बलाम् ॥

इक्षुपादां ताम्रपृष्ठां शुचिमुक्ताफलेक्षणाम् ।
प्रशस्तपत्रश्रवणां फलदन्तवतीं शुभाम् ॥

स्रग्दामपुच्छां कुर्वीत नवनीतस्तनान्विताम् ।
सितसूत्रशिरालां च सितसर्षपरोमिकाम् ॥

[1]फलैर्मनोहरैर्भक्ष्यैर्मणिमुक्ताफलान्विताम् ।
सितवस्त्रयुगच्छन्नां घण्टाभरणभूषिताम् ॥

---

1. पलैर्मनोहरैर्तक्ष्यैर्मणि--D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ईदृक्संस्थानसम्पन्नां कृत्वा श्रद्धासमन्वितः ।
कांस्योपदोहनां दद्यात् केशवः प्रीयतामिति ॥

या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता ।
धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु ॥

देहस्था या च रुद्राणां शङ्करस्य सदा प्रिया ।
धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥

विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसौ ।
चन्द्रार्कशक्रशक्तिर्या धेनुरूपाऽस्तु सा श्रिये ॥

चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च ।
लक्ष्मीर्या लोकपालानां सा धेनुर्वरदाऽस्तु मे ॥

स्वधा या पितृमुख्यानां स्वाहा यज्ञभुजां तथा।
सर्वपापहरा धेनुस्तस्माच्छान्तिं प्रयच्छ मे ॥ (म.पु.२१.१.१९)

इत्यावाहनमन्त्रः ।

वह्निपुराणे त्वेतादृशमेव तिलधेनौ मन्त्रान्तरमुक्तम् ।

तिलाश्च पितृदेवत्या निर्मिताश्चेह गोसवे ।
ब्रह्मणा तन्मयी धेनुर्दत्ता प्रीणातु [1]केशवम् ॥

इति ।

ततः प्रदक्षिणं कृत्वा पूजयित्वा प्रणम्य च ।
सदक्षिणा मया तुभ्यं दत्तेत्युक्त्वा विसर्जयेत् ॥

अनेन विधिना दत्त्वा तिलधेनुं नराधिप ।
सर्वपापविनिर्मुक्तः परं ब्रह्माधिगच्छति ॥

---

1. केशवः A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यश्च गृह्णाति विधिवद्दीयमानां प्रमोदवान् ।
दीयमानां प्रपश्यन्ति ये च संहृष्टमानसाः ॥

तेऽप्यशेषाघनिर्मुक्ताः प्रयान्ति परमां गतिम् ।
प्रणीताय सुशीलाय वेदव्रतधराय च ॥

धेनुं तिलमयीं दत्त्वा न शोचति कृताकृते ।
त्रिरात्रं यस्तिलाहारस्तिलधेनुप्रदो भवेत् ॥

एकाहमथ वा मासास्तद्व्रतेनान्तरात्मना ।
दानाद्विशुद्धपापस्य तस्य पुण्यवतो नृप ॥

चान्द्रायणादप्यधिकं कथितं तिलभक्षणम् ।

इति तिलधेनुदानम् ।

————(:o:)————

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ प्रकारान्तरेण तिलधेनुदानम् ।

वराहपुराणेऽपि —

चतुर्भिः सेतिकाभिस्तु प्रस्थ एकः प्रकीर्तितः ।
ते षोडश भवेद्धेनुश्चतुर्भिर्वत्सको भवेत् ॥

इक्षुदण्डमयाः पादा दन्ताः पुष्पमयाः शुभाः ।
नासा गन्धमयी तस्या जिह्वा गुडमयी भवेत् ॥

पुच्छे स्रक् कल्पनीया स्याद् घण्टाभरणभूषिता ।
ईदृशीं कल्पयित्वा च स्वर्णशृङ्गीं प्रकल्पयेत् ॥

कांस्यदोहां रौप्यखुरां पूर्वधेनुविधानतः ।

तिलधेनुं ततो दद्याद् द्वादश्यां नियतेन्द्रियः ।
आत्मानं तारयेद्दुर्गान्नरकान्नात्र संशयः ॥

सेतिका कुडवः । स च द्वादशप्रसृतिपरिमितः ।

महाभारतेऽपि (अनुशा. ६७.३०-३१) —

सुदक्षिणां काञ्चनचारुशृङ्गीं
कांस्योपदोहां द्रविणोत्तराङ्गीम् ।
धेनुं तिलानां ददतो द्विजाय
लोका वसूनां सुलभा भवन्ति ॥

तथा —

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धेन्वाः प्रमाणेन समप्रमाणं
धेनुं तिलानामपि च प्रदाय ।
पानीयवापीं च यमस्य लोके
न यातनां काञ्चिदुपैति मर्त्यः ॥

तथा —

गोमत्या विद्यया धेनुं तिलानामभिमन्त्र्य यः ।
रसरत्नमयीं दद्यान्न स शोचेत् कृताकृते ॥

गोमती विद्या । गावो मामुपतिष्ठन्त्वित्यादिका स्वरूपगोदानप्रकरणे लिखिता ।

इति तिलधेनुदानम्

———(:o:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ विश्वामित्रोक्तसप्तव्रीहिधेनुदानविधिः

सप्तव्रीहिमयाः सप्त धेनवः परिकीर्तिताः ।
यथा तिलमयी धेनुस्तथैवैतास्तु कारयेत् ॥

यवव्रीहिमयी धेनुर्गोधूमा सतिला परा ।
माषमुद्गमयी चैव सप्रियङ्गुश्च सप्तमी ॥

उपस्करं तु सर्वासु तिलधेनुवदीरितम् ।
एतासामेव धेनूनामङ्गानि तिलधेनुवत् ॥

सप्तव्रीहिमयाः सप्त यो ददातीह मानवः ।
स याति परमं स्थानं वायुभूतः स्वमूर्तिमान् ॥

ब्रह्महा च सुरापश्च तस्करो गुरुतल्पगः ।
धेनुदानेन पूतोऽसौ याति विष्णोः परं पदम् ॥

इति विश्वामित्रप्रोक्तः सप्तव्रीहिधेनुदानविधिः ।

———(:o:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ विष्णुधर्मोत्तरोक्तं घृतधेनुदानम्

तिलाभावे तथा दद्याद् घृतधेनुं यतव्रतः ।
येन भूप विधानेन तदिहैकमनाः शृणु ॥

वासुदेवं जगन्नाथं घृतक्षीराभिषेचनैः ।
सम्पूज्य पूर्ववत् पुण्यैर्गन्धधूपादिभिर्नरः[1] ॥

अहोरात्रोषितो नाम्ना अभिष्टूय घृतार्चिषम् ।
घृतार्चिषे जगन्नाथाय देवाय नम इति स्तुतिः ॥

गव्यस्य सर्पिषः कुम्भं पुष्पमालादिभूषितम् ।
कांस्यापिधानसंयुक्तं सितवस्त्रयुगेन च ॥

हिरण्यगर्भसहितं मणिविद्रुममौक्तिकैः ।

अत्र पलसहस्रपरिमाणः कुम्भः । दशपलाधिकानि पञ्चपलशतानि इति केचित् । हिरण्यगर्भेति मध्यवर्तिहिरण्यसहितम् । मणिविद्रुममौक्तिकैरिति सहार्थे तृतीया ।

इक्षुयष्टिमयान् पादान् खुरान् रौप्यमयांस्तथा ॥

सौवर्णे चाक्षिणी कुर्याच्छृङ्गे चागरुकाष्ठजे ।

---

1. नंरैः D. E.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्र सुवर्णादेः परिमाणविशेषानाम्नानाद्यथाशक्तिविधानम् ।

सप्तधान्यमये पार्श्वे [1]पत्रोर्णेन च कम्बलम् ॥

कुर्यात्तुरुष्क[2]कर्पूरैः घ्राणं फलमयान् स्तनान् ।
तद्वच्छर्करया जिह्वां गुडक्षीरमयं मुखम् ॥

पत्रोर्णं धौतकौशेयम् । तुरुष्कः सिल्हकः सिल्हारस इति यावत् ।

क्षौमसूत्रेण [3]लाङ्गूलं रोमाणि सितसर्षपैः ।
ताम्रपात्रमयं पृष्ठं कुर्याच्छ्रद्धासमन्वितः ॥

ईदृक्स्वरूपां सङ्कल्प्य घृतधेनुं नराधिप ।
तद्वत्कल्पनया विद्वान् घृतवत्सं प्रकल्पयेत् ॥

तद्वत् पूर्वोक्तधेनुवत् । कल्पनया चतुर्थांशकल्पनया ।

तं च विप्रं महाभागं मनसैव घृतार्चिषम् ।
कल्पयित्वा ततस्तस्मै प्रयतः प्रतिपादयेत् ॥

घृतार्चिषं यज्ञपुरुषम् ।

[4]एतां ममोपकाराय गृह्णीष्व त्वं द्विजोत्तम ।
प्रीयतां मम देवेशो घृतार्चिः पुरुषोत्तमः ॥

इत्युदाहृत्य विधिवद् दद्याद्धेनुं नराधिप ।

स्कन्दपुराणे [5]ह्ययं मन्त्रः —

घृतं गावः प्रसूयन्ते घृतं भूम्यां प्रतिष्ठितम् ।
घृतमग्निश्च देवाश्च घृतं मे सम्प्रगृह्यताम् ॥

---

1. पत्रोर्णेन D. 2. कर्पूरैर्घ्राणि D. 3. लाङ्गूलरौमाणि D. 4. एते D. 5. ह्ययं मन्त्रः D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विष्णुधर्मोत्तर एवं —

घृतरत्नसुवर्णानां सम्यक्कल्पनया कृताम् ।
दत्त्वैकरात्रं स्थित्वा तु घृताहारो नराधिप ॥

मुच्यते सर्वपापेभ्यस्तथा दानफलं शृणु ।
घृतक्षीरवहा नद्यो यत्र पायसकर्दमाः ॥

तेषु लोकेषु सर्वेषु सुपुण्येषु स जायते ।
पितुरूर्ध्वं नयेत् सप्तपुरुषांस्तस्य येऽप्यधः ॥

तांस्तेषु नृप लोकेषु स नयत्यस्तकल्मषः ।
सकामानामियं व्युष्टिः कथिता नृपसत्तम ॥

विष्णुलोकं नरा यान्ति निष्कामा घृतधेनुदाः ।
घृतमग्निर्घृतं सोमस्तन्मयाः सर्वदेवताः ॥

घृतं प्रयच्छता दत्ता भवन्त्यखिलदेवताः ।

दक्षिणा चात्र सुवर्णम् । सा चैकसुवर्णप्रभृति यथाशक्ति दातव्या ।

देवीपुराणे त्वेवंविधैव घृतधेनुः प्रतिपादिता । विशेषस्तु तत्र घृतार्चिषः पूजास्थाने भवानीपूजोक्ता ।

स्नापयित्वा भवानीं तु घृतक्षीरैर्यथाविधि ।
पूजयेत् पुष्पमालाभिर्नैवेद्यैः सुमनोहरैः ॥

तथेति,

तद्भक्ताय प्रदातव्या मङ्गला शास्त्रवेदिने ।

तद्भक्ताय देवीभक्ताय ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इमां ममोपकाराय गृह्णीष्व मदनुग्रहात् ॥

प्रीयतां नन्दिनी देवी मङ्गलाचर्चिका उमा ।
इत्युच्चार्यार्पयेद्धेनुं कृत्वा [2]नन्दां मनोनुगाम् ॥

अनेन विधिना देया सर्पिषो धेनुरुत्तमा ।
देव्या लोकमवाप्नोति निष्कामो घृतधेनुदः ॥

आदित्यपुराणे त्वयं विशेषः —

आदित्यं तु जगन्नाथं घृतक्षीराभिषेचनैः ।
सम्पूज्य पूर्ववत् पुष्पैर्गन्धधूपादिभिर्नरः ॥

अहोरात्रोषितो भूत्वा अभिष्टुत्य घृतार्चिषम् ।

इत्यादिना पूर्वोक्तं धेनुकल्पनपूजादिकमभिधाय,

तं च विप्रं महाभागं मनसैव घृतार्चिषम् ॥

कल्पयित्वा ततस्तस्मै प्रयतः प्रतिपादयेत् ।
इमां ममोपकाराय गृह्णीष्व त्वं [3]द्विजोत्तम ॥

प्रीयतां मम देवेशो घृतार्चिर्मिहिरोत्तमः ।
इत्युदाहृत्य विप्राय दद्याद् धेनुं नरोत्तमः ॥

दत्त्वैकरात्रं स्थित्वा च घृताहारो [4]नरो यदि ।
मुच्यते सर्वपापेभ्यस्तस्य पुण्यफलं शृणु ॥

घृतक्षीरवहा नद्यो यत्र पायसकर्दमाः ।
तेषु लोकेषु नित्यं स सुपुण्येषु प्रमोदते ॥
पितुरूर्ध्वं नयेत् सप्त पुरुषांस्तस्य येऽप्यधः ॥

इति ॥

इति घृतधेनुदानविधिः ।

1. इमं D. 2. दानं मथेनुगाम् D. 3. द्विजोनम D. 4. नरा यधि D

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ नवनीतधेनुदानम्

भविष्योत्तरे —

घृतधेनुविधानेन नवनीतमयी शुभा ।
दातव्या नृपते धेनुर्न्यूनाधिक्यविवर्जिता ॥

मन्त्रः स एव निर्दिष्टो घृतधेनौ तु यः स्मृतः ।
शृणु पार्थ महाबाहो प्रदानफलमुत्तमम् ॥

घृतक्षीरवहा नद्यो यत्र पायसकर्दमाः ।
नवनीतप्रदो याति तत्र कामैः प्रपूजितः ॥

पितुरूर्ध्वं तु ये सप्त पुरुषास्तस्य येऽप्यधः ।
तांश्चेष्टेष्विह लोकेषु स नयत्यस्तकल्मषान् ॥

सकामानामियं व्युष्टिः कथिता नृपसत्तम ।
निष्कल्मषपदं यान्ति निष्कामास्तत्प्रदायिनः ॥

इति नवनीतधेनुदानम् ।

———(:o:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ जलधेनुदानविधिः

विष्णुधर्मोत्तरे — (३.३०१.१)

जलधेनुं प्रवक्ष्यामि प्रीयते दत्तया यया ।
देवदेवो हृषीकेशः सर्वेशः सर्वभावनः ॥

जलकुम्भं नरव्याघ्र सुवर्णरजतान्वितम् ।
रत्नगर्भमशेषैस्तु ग्राम्यैर्धान्यैः समन्वितम् ॥

सितवस्त्रयुगच्छन्नं दूर्वापल्लवशोभितम् ।
कुष्टमांसीमुरोशीरबालकामलकैर्युतम् ॥

प्रियङ्गुपत्रसहितं [1]सितवस्त्रोपवीतिनम् ।
सच्छत्रं सोपानत्कं च दर्भविष्टरसंस्थितम् ॥

चतुर्भिः संवृतं भूप तिलपात्रैश्चतुर्दिशम् ।
स्थगितं दधिपात्रेण घृतक्षौद्रवता मुखे ॥

उपोषितः समभ्यर्च्य वासुदेवं जलेशयम् ।
पुष्पधूपोपहारैश्च यथाविभवमादृतः ॥

सङ्कल्प्य जलधेनुं च कुम्भं तमभिपूज्य च ।
पूजयेद्वत्सकं तद्वत् कृतं जलमयं बुधः ॥

एवं सम्पूज्य गोविन्दं जलधेनुं सवत्सकाम् ।
सितवस्त्रधरः शान्तो वीतरागो विमत्सरः ॥

---

1. सितवस्त्रोपवीतिनम् D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दद्याद् द्विजाय राजेन्द्र प्रीत्यर्थं जलशायिनः ।
जलशायी जगद्योनिः प्रीयतां मम केशवः ॥

इति चोच्चार्य भूनाथ विप्राय प्रतिपाद्य ताम् ।
अपक्वान्नाशिना स्थेयमहोरात्रमतः परम् ॥

कुम्भोऽत्र कलशः । न तु परिमाणविशेषः । परिमाणविशेषा नाम्नानेऽपि यथाशक्ति विधानम् । अत्र यद्यपि सुवर्णादीनि सामान्येनोक्तानि तथापि तत्सामान्यादितरेषु तथात्वमिति न्यायादितरधेनुवदविरुद्धधर्मानुष्ठानं वेदितव्यम् । ततश्च सुवर्णस्य शृङ्गाकृतित्वं रजतस्य खुराकृतित्वं तिलपात्राणां ताम्रमयत्वं दधिपात्रस्य कांस्यमयत्वं ज्ञेयम् । तथा धान्यानि पार्श्वद्वये, कुष्ठादीनि घ्राणदेशे, प्रियङ्गुपत्रं श्रवणे, यज्ञोपवीतं शिरसि स्थापयेत् । वत्सश्चतुर्थेन कार्यः । दक्षिणार्थेन सुवर्णमारभ्य यथाशक्ति सुवर्णं देयम् ।

अनेन विधिना दत्त्वा जलधेनुं नराधिप ।
सर्वान् कामानवाप्नोति ये दिव्या ये च मानुषाः ॥

शरीरारोग्यमाबाधाप्रशमः सार्वकालिकः ।
नृणां भवति दत्तायां जलधेन्वां न संशयः ॥

इति । आदित्यपुराणे तु जलधेनुदानमनेनैव समानार्थम् । विशेषस्तु —

ततः सम्पूज्य चादित्यं जलधेनुं सवत्सकाम् ।
दद्याद् द्विजाय देवाग्रे प्रीत्यर्थं मिहिरस्य तु ॥

[1]आदित्यश्च जगद्योनिः प्रीयतां मिहिरः सदा ।
इति चोच्चार्य तां गां तु विप्राय प्रतिपादयेत् ॥

हिरण्यरत्नधेनुश्च प्रदेया विधिनाऽमुना ।
मुच्यते सर्वपापेभ्यः सर्वान् कामानवाप्नुयात ॥

---

1. आदित्यस्य D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अनेन विधिना दत्त्वा जलधेनुं महामुने ।
सर्वान् कामानवाप्नोति यश्च ध्यायति मानवः ॥

सर्वपापविनिर्मुक्तः पितरं सपितामहम् ।
प्रपितामहं तथा पूर्वपुरुषाणां चतुष्टयम् ॥

आत्मानं तारयेत् पौत्रं तदधस्ताच् चतुष्टयम् ।
तारयेत् स मुनीन्द्रेन्द्र जलधेनुप्रदो नरः ॥

यश्च गृह्णाति विधिवत्तस्याऽप्येवंविधाः कुले ।
चतुर्दश तथा चैव ददतश्चानुमोदतः ॥

दीयमानां प्रपश्यन्ति जलधेनुं च ये नराः ।
तेऽप्यशेषावनिर्मुक्ताः प्रयान्ति परमां गतिम् ॥

इति जलधेनुदानविधिः ।

———(:o:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ क्षीरधेनुदानविधिः

स्कन्दपुराणे — विनीताश्व उवाच —

क्षीरधेनुं प्रवक्ष्यामि तां निबोध नराधिप ।
अनुलिप्ते महीपृष्ठे गोमयेन नरोत्तम ॥

गोचर्ममात्रमानेन कुशानास्तीर्य सर्वतः ।

गोचर्मशब्दोऽत्र गोऽजिनपरः ।

तत्रोपरि महाराज न्यसेत् कृष्णाजिनं ततः ॥

तत्रोपरि कुण्डलिकां गोमयेन कृतामपि ।
क्षीरकुम्भं ततः स्थाप्य चतुर्थांशेन वत्सकम् ॥

सुवर्णमुखशृङ्गाणि चन्दनागुरुकाणि च ।
प्रशस्तपत्रश्रवणां तिलपात्रोपरि न्यसेत् ॥

मुखं गुडमयं तस्या जिह्वा शर्करया तथा ।
फलप्रशस्तदन्तां च मुक्ताफलमयेक्षणाम् ॥

इक्षुपादा दर्भरोमां सितकम्बलकम्बलाम् ।
ताम्रपृष्ठां कांस्यदोहां पट्टसूत्रमयं तथा ॥

पुच्छं च नृपशार्दूल नवनीतमयस्तनीम् ।
स्वर्णशृङ्गीं रौप्यखुरां पञ्चरत्नमयीं भुवि ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चत्वारि तिलपात्राणि चतुर्दिक्ष्वपि [1]स्थापयेत् ।
सप्तव्रीहीन् समायुक्तो दिक्षु सर्वासु प्रक्षिपेत् ॥

एवंलक्षणसंयुक्तां क्षीरधेनुं प्रकल्पयेत् ।
आच्छाद्य वस्त्रयुग्मेन गन्धपुष्पैः समर्चयेत् ॥

[2]धूपदीपादिकं कृत्वा ब्राह्मणाय निवेदयेत् ।
आच्छाद्यालङ्कृतं कृत्वा मुद्रिकाकर्णमात्रकैः ॥

अलङ्कृतमलङ्करणम् । नपुंसके भावे क्तः (पा. ३. ३-११४) ।

पादुकोपानहच्छत्रं दत्त्वा दानं समर्पयेत् ।

दीयत इति दानम् ।

अनेनैव तु मन्त्रेण क्षीरधेनुं प्रकल्पयेत् ॥

या लक्ष्मीः सर्वभूतानामित्यादि नरपुङ्गव ।

प्रकल्पयेदामन्त्रयेत् ।

आप्यायस्वेति मन्त्रेण क्षीरधेनुं प्रसादयेत् ॥

प्रसादयेत् उपतिष्ठेतेत्यर्थः । ततो वाक्यप्रयोगेण दानम् ।

गृह्णामि त्वां देवि भक्त्या ग्राहको मन्त्रमुच्चरेत् ।

गृह्णामि त्वां देवि भक्त्या कुटुम्बार्थे विशेषतः ।
भरस्व कामैर्मां सर्वैः क्षीरधेनो नमोऽस्तु ते ॥

इति ॥

---

1. स्वापयेत्–D. 2. धूपदीणादिकं–D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं धेनुं प्रदायाथ क्षीराहारो दिनं [1]वसेत् ।
त्रिरात्रं तु पयोभक्षो ब्राह्मणो राजसत्तम ॥

दीयमानां प्रपश्यन्ति ते यान्ति परमां गतिम् ।
एनां हेमसहस्रेण शतेनाथ स्वशक्तितः ॥

शतार्धमथ वाप्यर्धं तत्रैवार्धं स्वशक्तितः ।
दद्याद् धेनुं [2]महाराज शृणु तस्यापि यत् फलम् ॥

दिव्यं वर्षसहस्रं तु रुद्रलोके महीयते ।
पितृपितामहैः सार्धं [3]ब्रह्मणो भवनं व्रजेत् ॥

दिव्यं विमानमारुह्य दिव्यगन्धानुलेपनः ।
क्रीडित्वा सुचिरं कालं विष्णुलोकं स गच्छति ॥

द्वादशादित्यसङ्काशैर्विमानैर्वरमण्डितैः ।
गीतवादित्रनिर्घोषैरप्सरोगणसेवितैः ॥

तत्रोपविष्टो राजाऽसौ विष्णुसायुज्यमाप्नुयात् ।
य इदं शृणुयान्नित्यं पठेद्वा भक्ति[4]भावितः ॥

सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ।

इति क्षीरधेनुदानम्

———(:o:)———

1. तवेत् D. 2. महाजं छृणु D. 3. थह्मणो D. 4. मावितः D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ दधिधेनुदानम्

स्कन्दपुराणे विनीताश्व उवाच —

दधिधेनोर्महाराज विधानं[1] श्रृणु साम्प्रतम् ।
अनुलिप्ते महीभागे गोमयेन नराधिप ॥

गोचर्ममात्रं तु पुनः पुष्पप्रकरसंयुतम् ।
कुशैरास्तीर्य वसुधां कृष्णाजिन[2]कृतास्तराम् ॥

दधिकुम्भं च संस्थाप्य सप्तधान्यस्य चोपरि ।
चतुर्थांशेन वत्सं तु सौवर्णमुखसंयुतम् ॥

प्रशस्तपत्रश्रवणां मुक्ताफलमयेक्षणाम् ।
चन्दनागरुशृङ्गां च मुखं वै गन्धमालिकाम् ॥

गन्धमालिका गन्धद्रव्यविशेषः ।

जिह्वा शर्करया राजन् घ्राणं श्रीखण्डकं तथा ।
फलमूलमया दन्ताः सितसूत्रस्य कम्बलः ॥

ताम्रपृष्ठा दर्भरोमा पुच्छं सूत्रमयं तथा ।
स्वर्णशृङ्गीं रौप्यखुरां नवनीतमयस्तनीम् ॥

इक्षुपादां सुसंस्कृत्य सर्वाभरणभूषिताम् ।
आच्छाद्य वस्त्रयुग्मेन पुष्पगन्धैः सुपूजिताम् ॥

1- धिधानं D. 2. कृतास्मराम D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ब्राह्मणाय कुलीनाय साधुवृत्ताय धीमते ।
शमादियमयुक्ताय तादृशाय प्रदापयेत् ॥

पुच्छदेशोपविष्टाय मुद्रिकाकर्णमानकैः ।
पादुकोपानहौ च्छत्रं दत्त्वा मन्त्रमनुस्मरेत् ॥

मन्त्रं 'या लक्ष्मीः' इत्यादिरूपमनुस्मरेत् ।
दधिक्राव्णेति मन्त्रेण दधिधेनुं प्रदापयेत् ॥

एवं दधिमयीं धेनुं दत्त्वा [1]राजर्षिसत्तम ।
एकाहारो दिनं [2]तिष्ठेद् दध्ना च नृपनन्दन ॥

यजमानो वसेद्राजंस्त्रिदिनं वा द्विजोत्तमः ।

द्विजोत्तमः प्रतिग्राहकः ।

दीयमानां प्रपश्यन्ति तेऽपि यान्ति परां गतिम् ॥

दश पूर्वान् दश परानात्मानं चैकविंशकम् ।
विष्णुलोकमवाप्नोति यावदाभूतसंप्लवम् ॥

दाता वा दायकश्चैव तेऽपि यान्ति परां गतिम् ।
यत्र मधुवहा नद्यो यत्र पायसकर्दमाः ॥

ऋषयो मुनयः सिद्धास्तत्र गच्छन्ति धेनुदाः ।
य इदं शृणुयाद् भक्त्या श्रावयेदपि मानवः ॥

सोऽश्वमेधफलं प्राप्य विष्णुलोकं प्रयास्यति ।

इति दधिधेनुदानम् ।

---

1. राजर्विसत्तम D. 2. तिष्ठेद्दभावनृपनन्दन D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ मधुधेनुदानम्

स्कन्दपुराणे —

मधुधेनुं प्रवक्ष्यामि सर्वपापप्रणाशिनीम् ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे ॥

धेनुं मधुमयीं कृत्वा सम्पूर्णघटपूरिताम् ।
तद्वच्चतुर्थभागेन वत्सकं परिकल्पयेत् ॥

सौवर्णं तु मुखं कृत्वा शृङ्गाण्यगरुचन्दनैः ।
पृष्ठं ताम्रमयं तस्याः पुच्छं सूत्रमयं तथा ॥

पादास्त्विक्षुमयाः कार्याः सितकम्बलकम्बला ।
मुखं गुडमयं कृत्वा जिह्वा शर्करयान्विता ॥

मौक्तिके नयने तस्या दन्ताः फलमयाः स्मृताः ।
दर्भरोमधरा देवी रौप्यखुरविभूषिता ॥

प्रशस्तपत्रश्रवणा नवनीतमयस्तनी ।

पत्रं पत्रकम् ।

सर्वलक्षणसंयुक्तां सप्तधान्यानि दापयेत् ॥

चत्वारि तिलपात्राणि चतुर्दिक्षु च विन्यसेत् ।
आच्छाद्य वस्त्रयुग्मेन घण्टाभरणभूषिताम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कांस्योपदोहनीं दत्त्वा गन्धपुष्पैस्तु पूजिताम् ।
अयने विषुवे चैव व्यतीपाते दिनक्षये ॥

सङ्क्रान्तावुपरागे च सर्वकालमतन्द्रितः ।
द्रव्यब्राह्मणसम्पत्तिर्दृष्टमात्रेण दापयेत् ॥

ब्राह्मणाय दरिद्राय श्रोत्रियाय कुटुम्बिने ।
आर्यावर्तसमुत्पन्ने वेदवेदाङ्गपारगे ॥

तादृशाय प्रदातव्या मधुधेनुर्नरोत्तम ।
पुच्छदेशोपविष्टाय गन्धपुष्पादिपूजिता ॥

आच्छाद्य वस्त्रयुग्मेन मुद्रिकाकर्णिकाचिताम् ।

कर्णिका कर्णभूषणम् ।

स्वशक्त्या दक्षिणां दत्त्वा वित्तशाठ्यविवर्जितः ॥

उदक्पूर्वं तु कर्तव्यं पश्चाद्दानं समर्पयेत् ।
रसज्ञाः सर्वदेवानां सर्वभूतहिते रताः ॥

[1]प्रीयन्तां पितृदेवाश्च मधुधेनो नमोऽस्तु ते ।
एवमुच्चार्य तां धेनुं ब्राह्मणाय निवेदयेत् ॥

अहं गृह्णामि त्वां देवि कुटुम्बार्थे विशेषतः ।
कामान् कामदुघे धुक्ष्व मधुधेनो नमोऽस्तु ते ॥

मधु वातेति मन्त्रेण [2]प्रदाप्या यतचेतसा ।
दत्त्वा धेनुं महाराज च्छत्रिकोपानहौ तथा ॥

---

1. प्रीयतां D. 2. प्रदापायतयेतसा D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं यः कुरुते भक्त्या मधुधेनुं नराधिप ।
दत्त्वा दानं पायसेन मधुना च दिनं नयेत् ॥

ब्राह्मणोऽपि त्रिरात्रं तु [1]मधुपायससंयुतः ।
एवं कृते तु यत् पुण्यं तन्निबोध नराधिप ॥

यत्र मधुवहा नद्यो यत्र पायसकर्दमाः ।
ऋषयो मुनयः सिद्धास्तत्र गच्छन्ति धेनुदाः ॥

तत्र भोगान् वरान् भुङ्क्ते ब्रह्मलोके स तिष्ठति ।
क्रीडित्वा सुचिरं कालं पुनर्मर्त्यमुपागतः ॥

स भुक्त्वा विपुलान् भोगान् विष्णुलोकं स गच्छति ।
दश पूर्वान् दश परानात्मानं चैकविंशकम् ॥

स नयेद् विष्णुसायुज्यं मधुधेनुप्रसादतः ।
य इदं शृणुयाद् विप्रः श्रावयेद्वा समाहितः ॥

सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥

इति मधुधेनुदानम् ।

———(:०:)———

1. मधुनायस D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ रसधेनुदानम्

स्कन्दपुराणे विनीताश्व उवाच —

रसधेनुं महाराज कथयामि समासतः ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे ॥

रसस्य तु घटं राजन् सम्पूर्णमैक्षवस्य तु ।
तद्वत् संकल्पयेत् प्राज्ञश्चतुर्थांशेन वत्सकम् ॥

इक्षुदण्डमयाः पादा राजतक्षुरसंयुताः ।
सुवर्णशृङ्गाभरणा वस्त्रपुच्छा घृतस्तनी ॥

पुष्पकम्बलसंयुक्ता शर्करामुखजिह्विका ।
दन्ताः फलमयास्तस्याः पृष्ठं ताम्रमयं शुभम् ॥

[1]पुष्परोमा तु राजेन्द्र मुक्ताफलकृतेक्षणाम् ।
सप्तव्रीहिसमायुक्तां चतुर्दिक्षु सदीपिकाम् ॥

सर्वोपस्करसंयुक्तां सर्वगन्धविभूषिताम् ।
चत्वारि तिलपात्राणि चतुर्दिक्षु निवेशयेत् ॥

ब्राह्मणे वेदविदुषे श्रोत्रियायाहिताग्नये ।
पुराणज्ञे विशेषेण साधुवृत्ताय धीमते ॥

अत्र [2]ब्राह्मणपुराणज्ञशब्दयोर्विभक्तिव्यत्ययश्छान्दसः ।

---

1. पष्पेरोमा तु राजेन्द्रनुक्ताफलकृतेक्षम् D. 2. ब्रह्मण D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तादृशाय प्रदातव्या [1]रसधेनुः कुटुम्बिने ।
दाता स्वर्गमवाप्नोति सर्वपापविवर्जितः ॥

दाता वा ग्राहको वाऽपि एकाहं रसभोजनः ।
सोमपानं भवेत्तस्य सर्वक्रतुफलं भवेत् ॥

दीयमानां तु पश्यन्ति ते यान्ति [2]परमां गतिम् ।
धेनुं च पूजयित्वाग्रे गन्धधूपस्रगादिभिः ॥

पूर्वोक्ता एव मन्त्राश्च तानेव प्रयतः स्मरेत् ।

पूर्वोक्ता मन्त्रा "या लक्ष्मीः" इत्यादयः ।

एवमुच्चारयित्वा तु दीयते वै द्विजोत्तमे ।
दश पूर्वान् परांश्चैव आत्मानं चैकविंशकम् ॥

नयेत्तु परमं स्थानं यस्मान्न वर्तयेत् पुनः ।
एषा ते कथिता राजन् रसधेनुरनुत्तमा ॥

ददस्व च महाराज पुण्यान् लोकानवाप्नुहि ।
य इदं पठते नित्यं शृणुयाद्वाथ भक्तितः ॥

सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥

इति रसधेनुदानम् ।

———(:0:)———

1. रसधेनुं D. 2. परमां गरमांगतिम् D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ शर्कराधेनुदानम्

स्कन्दपुराणे विनीताश्व उवाच —

[1]तद्वच्च शर्कराधेनुं शृणु राजन् यथार्थतः ।
[2]अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे ॥

धेनुः शर्करया राजन् सदा भारचतुष्टयम् ।
उत्तमा कथ्यते सद्भिश्चतुर्थांशेन वत्सकः ॥

तदर्धं मध्यमा प्रोक्ता चतुर्थांशेन कन्यसा ।
तद्वद्वत्सं प्रकुर्वीत चतुर्थांशेन मानवः ॥

अथ कुर्यादष्टांशेन चतुर्थांशेन वत्सकम् ।

अष्टांशेन अष्टमांशेन । अर्धभारेणेत्यर्थः ।

स्वशक्त्या कारयेद्धेनुं यथात्मानं न पीडयेत् ॥

सर्वबीजानि संस्थाप्य चतुर्दिक्षु समन्ततः ।

सर्वबीजानि सर्वधान्यानि ।

सौवर्णमुखशृङ्गाणि मौक्तिकैर्नयनानि तु ॥

गुडेन च मुखं कार्यं जिह्वा पिष्टमयी तथा ।
कम्बलं पटसूत्रेण कण्ठाभरणसंयुता ॥

पञ्चरत्नसमायुक्ता दर्भरोमसमन्विता ।
कांस्योपदोहना सम्यग्गन्धपुष्पैः समन्विता ॥

---

1. तद्वच्च D. 2. अनुलिदो D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ईदृग्विधानसंयुक्ता वस्त्रैराच्छादितोपरि ।
गन्धपुष्पैरलङ्कृत्य ब्राह्मणाय निवेदयेत् ॥

श्रोत्रियाय दरिद्राय साधुवृत्ताय धीमते ।
वेदवेदाङ्गविदुषे विशेषेणाग्निहोत्रिणे ॥

अनसूयवे प्रदातव्या न मत्सरयुताय वै ।
अयने विषुवे पुण्ये व्यतीपाते च षण्मुख ॥

एषु पुण्येषु कालेषु इच्छया वाऽपि दापयेत् ।
सत्पात्रं तु द्विजं दृष्ट्वा स्वागतं श्रोत्रियं गृहे ॥

तादृशाय प्रदातव्या पुच्छदेशे निवेदयेत् ।
पूर्वामुखः स्थितो दाता अथवा तु उदङ्मुखः ॥

धेनुं पूर्वामुखीं कृत्वा वत्समुत्तरतो न्यसेत् ।
दानकाले तु ये मन्त्रास्तान् पठित्वा समर्पयेत् ॥

मन्त्रा "या लक्ष्मीः" इत्यादयः प्रागुक्ताः ।

आच्छाद्य चैव तं विप्रं मुद्रिकाकर्णवेष्टकैः ।
स्वशक्त्या दक्षिणां दद्याद्गन्धं पुष्पं च चन्दनम् ॥
धेनुं समर्पयेत्त[1]स्या मुखं च न विलोकयेत् ।
एकाहं शर्कराऽहारो ब्राह्मणस्त्रिदिनं वसेत् ॥
सर्वपापहरा धेनुः सर्वकामप्रदायिनी ।
सर्वकामसमृद्धस्तु जायते नात्र संशयः ॥
दीयमानं प्रपश्यन्ति ते यान्ति परमां गतिम् ।
य इदं शृणुयाद्भक्त्या [2]पठते वाऽपि मानवः ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

इति शर्कराधेनुदानम् ।

---

1. त्तस्य D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ कार्पासधेनुदानम्

वराहपुराणे — वराह उवाच —

अतः परं प्रवक्ष्यामि धेनुं कार्पासकां शुभाम् ।
विश्वस्य गुह्यगुप्त्यर्थं ब्रह्मणा चांशुकं कृतम् ॥

कार्पासमूलं तच्चापि तेनाऽसावुत्तमः स्मृतः ।
सा च कार्पासभारेण धेनुः श्रेष्ठा प्रकीर्तिता ॥

मध्यमा च तदर्धेन तस्याऽप्यर्धेन कन्यसा ।
पूर्ववद्वस्त्रधान्यं च हिरण्यं च तथैव च ॥

वत्सकं तु[1] चतुर्थांशाद्दानमन्त्रो विधीयते ।
कुर्वीत पूर्ववद् वत्सवस्त्रधान्याद्युपस्करम् ॥

पूर्ववत् तिलधेनुदानवत् ।

दानमन्त्रः ।

हिमकुन्देन्दुसदृशे क्षीरार्णवसमुद्भवे ।
सोमप्रिये सुधेन्वाख्ये सौरभेयि नमोऽस्तु ते ॥

दत्तेयमिन्दुनाथाय शशांकायामृताय च ।
अत्रिनेत्रप्रजाताय सोमराजाय वै नमः ॥

इति दानमन्त्रः —

यस्त्वेवं परया भक्त्या ब्राह्मणाय प्रयच्छति ।
स याति चन्द्रलोकं तु सोमेन सह मोदते ॥

---

1. च D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न रोगी न ज्वरी कुष्टी कुले तस्य प्रजायते ।
पुत्रदारसमोपेतो जीवेच्च शरदां शतम् ॥

इति कार्पासधेनुदानम्

———(o)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ लवणधेनुदानम्

भविष्यत्पुराणे (१९९. ६-२३) कृष्ण उवाच —

श्रृणु राजन् प्रवक्ष्यामि लवणस्येह [1]कल्पिताम् ।
गोमयेनानुलिप्ते तु दर्भसंस्तरसंस्थितम् ॥

आविकं चर्म विन्यस्य पूर्वाशाभिमुखं स्थितम् ।
वस्त्रेणाच्छादितां कृत्वा धेनुं कुर्वीत बुद्धिमान् ॥

आढकेनैव कुर्वीत बहुवित्तोऽल्पवानपि ।
स्वर्णशृङ्गीं रौप्यखुरामिक्षुपादां फलस्तनीम् ॥

कार्या शर्करया जिह्वा गन्धघ्राणवती तथा ।
समुद्रोदरजे शुक्ती कर्णौ च परिकल्पयेत् ॥

शृङ्गे चन्दनकाष्ठाभ्यां मौक्तिके चाक्षिणी उभे ।
कपोलौ सक्तुपिण्डाभ्यां यवानास्ये प्रकल्पयेत् ॥

कम्बलं पटसूत्रेण ग्रीवायां कर्णिका[2] तथा ।
पृष्ठे वै ताम्रपात्रं स्यादपाने गुडपिण्डिकाम् ॥

लाङ्गूले कम्बलं दद्याद् रसान् [3]क्षीरप्रदेशतः ।
योनिप्रदेशे च मधु सर्वतस्तु फलान्विताम् ॥

एवं सम्यक् परिस्थाप्य लवणस्य कृतां तु गाम् ।
स्थापयेद् वत्सकं चापि चतुर्भागेन मानवः ॥

---

1. कल्पनम् भ. पु. पृ. ८३६. 2. घण्टिकां भ. पु. पृ. ८३६. 3. क्षार D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चतुर्भागेन चतुर्थांशेन ।

एवं धेनुं समभ्यर्च्य माल्यवस्त्रविभूषणैः ।
स्नात्वा देवार्चनं कृत्वा ब्राह्मणानभिपूज्य च ॥

कृत्वा प्रदक्षिणं गां च पुत्रभार्यासमन्वितः ।
ब्राह्मणाय सुशीलाय वृत्तयुक्ताय वै नृप ॥

दद्यात् पर्वसु सर्वेषु मन्त्रेणानेन मानवः ।
लवणे वै रसाः सर्वे लवणे सर्वदेवताः ॥

सर्वदेवमये देवि लवणाख्ये नमोऽस्तु ते ।
एवमुच्चार्य मन्त्रान्ते विप्राय प्रतिपादयेत् ॥

सम्यक् प्रदक्षिणीकृत्य दक्षिणासहितां नृप ।
प्रदक्षिणा मही तेन कृता भवति भारत ॥

सर्वदानानि दत्तानि सर्वर्तुकफलानि[1] च ।
सर्वे रसाः सर्वमत्र सर्वमेतच्चराचरम् ॥

सौभाग्यं च परा वृद्धिः शरीरारोग्यसम्पदः ।
नृणां भवति दत्त्वा तु रसधेनुं न संशयः ॥

स्वर्गे च नियतं वासो यावदाभूतसम्प्लवम् ।

[2]पत्रोर्णकम्बलगलां लवणोदकेन
कृत्वा फलस्तनवतीमपि चर्मपृष्ठे ।
दत्त्वा द्विजाय विधिवद् रसधेनुमेतां
लोकं गवां सकलसौख्ययुतं प्रयाति ॥

इति लवणधेनुदानम्

1. सर्वर्तुफलानि भ. पु. पृ. ८३७ 2. पत्तोर्ण D. पर्णोर्ण° भ. पु. पृ. १३७.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ कर्पूरादिधेनुदानानि

कर्पूरधेनुः

विष्णुधर्मोत्तरे —

कर्पूरधेनुं वक्ष्यामि सर्वगन्धमयीं शुभाम् ।
यां दत्त्वा सर्वगन्धास्तु प्रदत्ताः स्युर्न संशयः ॥

चन्द्रग्रहे तथा भानोः कार्तिक्यां [1]विषुवत्यथ ।
द्वादश्यामयने पुण्ये दद्यात् कर्पूरगां विभो ॥

ब्राह्मणाय दरिद्राय श्रुतवृत्तरताय च ।
[2]भूमावास्तीर्य नेत्रं तु शङ्खशुक्लाम्बरं शुभम् ॥

कार्या चतुःपला धेनुः पलमात्रस्तु वत्सकः ।
अथवा पलिका धेनुर्वत्सः कार्यस्तु कार्षिकः ॥

स्वर्णशृङ्गा रौप्यखुरा पुच्छं कुङ्कुमसम्भवम् ।

मृगनाभिमया दन्ता ग्रन्थिपर्णमयं मुखम् ॥

अक्षिणी सिह्लकमये कर्णौ चागुरुकाष्ठजौ ।
देवदारुमयं पुच्छं गुदं गुग्गुलुसम्भवम् ॥

कुष्ठं कपोलकं प्रोक्तमुशीरं चर्म चैव तु ।
उदरे चन्दनं दद्यात् खुराग्रे नखमेव च ॥

---

1. विषुवत्थप D. .2 भूवावास्तौर्यं D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं सङ्कल्प्य कर्पूरधेनुं वस्त्रेण पूजिताम् ।
विप्रं सम्पूज्य कर्पूरवस्त्रयुग्मेन चैव हि ॥

कर्पूरधेनुं विप्रेन्द्र[1] गृहाणेमां सुपूजिताम् ।
पुष्पगन्धस्थिता सा मे कमला प्रीयतामिति ॥

अनेनैव तु मन्त्रेण दानं विप्राय दापयेत् ।
दत्त्वा धेनुमिमां राजन् गन्धर्वाणां समो भवेत् ॥

कल्पत्रयं वसेत् स्वर्गे राजराजो भवेदिह ।
सर्वान् कामानवाप्नोति गौरीलोके महीयते ॥

तथा —

दत्त्वा गन्धमयीं धेनुं कामानां फलमाप्नुयात् ।
तथा कस्तूरिकां धेनुं श्रद्धावित्तसमन्वितः ॥

पात्रे दद्यान् नृपश्रेष्ठ मन्त्रमेतमुदीरयेत् ।

एनं कर्पूरधेनुदानोक्तं मन्त्रम् । तत्र कर्पूरपदस्थाने कस्तूर्यादिपदप्रक्षेपः ।

इति कर्पूरादिधेनुदानानि ।

———(०)———

1. विप्रेश दा. खं. P. 414; 2. फलमयीं दा. खं. P. 414.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ सुवर्णधेनुदानानि

विष्णुधर्मोत्तरे —

यद् ब्रह्मणापि राजेन्द्र [1]ऊहितं विष्णुना [2]पुरा ।
तत् ते विस्तरतो राजन् कथयाम्यनुपूर्वशः ॥

सुवर्णस्य सुवर्णस्य शुद्धस्य परिकल्पिताम् ।

अत्र द्वितीयः सुवर्णशब्दः परिमाणार्थः ।

रौप्यवत्सकसंयुक्तां मुक्ताफलविभूषिताम् ॥

प्रवालशृङ्गोपयुतां पद्मरागादिशालिनीम् ।
घृतपात्रस्तनवतीं कर्पूरागरुनासिकाम् ॥

शर्करारसनोपेतां मृष्टान्नमुखवासिताम् ।
शङ्खशृङ्गान्तरां शुक्तिललाटस्थानकल्पिताम् ॥

फलदन्तां वस्त्रयुग्मपार्श्वां क्षौमसुकम्बलाम् ।
कम्बलो गलकम्बलः ।

इक्षुपादां नालिकेरश्रवणां गुडजानुकाम् ॥

[4]पञ्चगव्यापानवतीं [5]ताम्रपृष्ठसमन्विताम् ।
सुपट्टसूत्रलाङ्गूलां सप्तधान्यसमन्विताम् ॥

---

1. विहितं दा.खं. P. 415. 2. परा A. 3. भृष्टान्नसुखसंमिताम् दा.खं. P. 415. 4. °व्यावनवतीं A. 5. कांस्य° दा.खं. P. 415

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

फलपुष्पसमोपेतां छत्रोपानत्समन्विताम् ।
सुवर्णधेनुं विप्राय प्रतिपाद्येदृशीं नरः ॥

हिरण्यरेताः पुरुषः पुराणः कृष्णपिङ्गलः ।
तप्तहेमच्छविः स्रष्टा विश्वात्मा प्रीयतामिति ॥

अनेनैव तु मन्त्रेण धेनोर्दानं प्रकीर्तितम् ।
अश्वमेधसहस्रस्य फलमाप्नोत्यसंशयम् ॥

[1]कुलानां तु सहस्रस्य फलमाप्नोत्यसंशयम् ।
[2]कुलानां तु सहस्रस्य स्वर्गे नयति तद् बुधः ॥

किमन्यैर्बहुभिर्दानैः पर्याप्तं हेमधेनुना ।
सुवर्णधेनुं [3]कृत्वा हि कृतकृत्यो भवेन् नरः ॥

हिरण्यगर्भो भगवान् प्रीयतामिति कीर्तयेत् ।
उपवासविशुद्धात्मा दद्यात् सोमरविग्रहे ॥

रक्षःपिशाचास्तद् गेहं न पश्यन्ति नराधिप ।
कार्तिक्यां प्रयतो दद्याद् द्वादश्यां कार्तिकस्य च ॥

दत्त्वा तत्पदमवाप्नोति यत्र गत्वा न शोचति ।

वह्निपुराणे —

सुवर्णधेनुश्चाप्यत्र सुवर्णाश्च चतुर्दश ।
[4]सुनिर्णिक्तसुवर्णैश्च सप्तभिर्मध्यमा [5]मता ॥

चतुर्भिः कन्यसा प्रोक्ता चतुर्थांशेन वत्सकः ।
गुडधेनुविधानेन दत्ता सर्वफलप्रदा ॥

---

1. Om दा.खं. 2. कुलानां च सहस्रं तु स्वर्गं नयति तद्बुधः ।दा. खं.
3. दत्त्वा दा.खं. 4. सुनिर्णुक्त° A. 5. मृता दा. खं.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विश्वामित्रः —

हिरण्यरेताः पुरुषः पुराणः कृष्णपिङ्गलः ।
रत्नहेमच्छविः स्रष्टा विश्वात्मा प्रीयतामिति ॥

इति कीर्तयेत् ।

सुवर्णधेनुं दत्त्वा च कृतकृत्यो भवेन्नरः ।

इति सुवर्णधेनुदानविधिः ।

—–(:o:)——

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ हेमवृषभदानम्

वह्निपुराणे —

वसिष्ठ उवाच —

येनेश्वरो दरिद्रो वा करोति विधिना नृप ।
दानं सर्वगुणोपेतं तच्छृणुष्व यथातथम् ॥

[1]भारादित्रिपलानां च वृषं कृत्वा विधानतः ।
युतं धेन्वाऽथ वा दद्याच् छक्तितो नृपसत्तम ॥

या मया [2]धेनवः प्रोक्ता वृषास्तावन्त एव हि ।
हरये ता नियोज्याः स्युर्हराय च तथा वृषाः ॥

सर्वाभावात् ततो राजन् तिलपात्राणि नित्यशः ।
सर्वपापविनाशाय दीयन्ते नृपसत्तम ॥

गोमयेन समालिप्ते पट्टवस्त्रसमावृते ।
वृषं हेममयं तत्र रौप्यं वा रत्नसंयुतम् ।
तस्य नीलमये शृङ्गे मौक्तिके चक्षुषी रदाः ॥
द्वात्रिंशच्छुभ[3]वस्त्राणि विद्रुमोष्ठौ तु नासिका ।
द्वात्रिंशन्मौक्तिकानि इति वचनव्यत्ययेनानुषंगः ।
मरकतं विनिर्दिष्टं कर्णौ च हरिताश्मके ॥
पद्मरागस्य वै पादाः खुरा रौप्यमयाः स्मृताः[4] ।
राजतानि च रोमाणि क्षौमवस्त्रेण कम्बलम् ॥

---

1. भारदौ दा.खं. 471. 2. धेनवः – नित्यशः om A. 3. °छुभ-वृतानि A. 4. शुभाः दा.खं.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पट्टेन पुच्छमुद्दिष्टं सर्वेषामप्ययं विधिः ।
वृषणौ स्फटिकस्यापि लिङ्गे मणिः प्रकीर्तितः ॥

तथा धेनुर्यथानड्वान् सुवर्णस्य तु कारयेत् ।
अभीष्टदेवतापूजां कुर्वीत तदनन्तरम् ॥

मन्त्रेणानेन राजेन्द्र तं द्विजाय निवेदयेत् ।
यो वृषो यज्ञदाने[1]ऽभूच्छतानीकस्य निष्कलः ॥

[2]जातरूपमयः सोऽयं तारिता मां न संशयः ।
एतस्य विभवाद्दानं भक्त्या यः प्रतिपादयेत् ॥

पृथुलं वाप्यशक्तं वा तदनन्तफलं स्मृतम् ।
निःस्वो वाप्येवमेवं हि कृत्वा दानमतन्द्रितः ॥

तत्फलं समवाप्नोति स्वल्पदानान्न संशयः ।

इति सुवर्णरूप्यवृषभदानम् ।

इति श्रीकोदण्डपरशुरामेत्यादिविविधविरुदावलीविराजमानोन्नतमहाराजाधिराजश्रीशक्तिसिंहात्मजमहाराजाधिराजश्रीमदनसिंहदेवविरचिते मदनरत्नप्रदीपे दानविवेकोद्द्योते गोदानविधिप्रकरणम् ॥

———(:०:)———

1. यज्ञदानो A. 2. ताजरूपमयः A. 3. एतत्सविभद्दानं A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ विद्यादानफलानि

अथ क्रमप्राप्तस्य पृथ्वीदानस्य दशमहादानप्रकरणे निरूपितत्वादनन्तरं विद्यादानं प्रस्तूयते ।

विष्णुधर्मोत्तरे (३. ३०२) —

विद्या कामुदुघा धेनुर्विद्या चक्षुरनुत्तमम् ।
विद्यादानात् परं दानं न भूतं न भविष्यति ॥

विद्यावान् सर्वकामानां भाजनं पुरुषो भवेत् ।
तस्माद् विद्यां हि ददता सर्वं दत्तं भवेदिह ॥

[1]पराध्यापनसक्तो हि पुरुषस्तु पदं श्रुतेः ।
तपस्तत् परमं तस्य ब्रह्मलोकसमं स्मृतम् ॥

बृहस्पतिः —

सहस्रमेव धेनूनां शतं चानड्वहां समम् ।
दशानड्वत्समं यानं दशयानसमो हयः ॥

दशवाजिसमा कन्या भूमिदानं ततोऽधिकम् ।
भूमिदानात् परं नास्ति विद्यादानं ततोऽधिकम् ॥

श्रुतिरपि —

स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः । तद्धि तपस्तद्धि तपः । प्रवचनं प्रकृष्टवचनमध्यापनमिति यावत् ।

1- पराध्यापनतः क्लेशं पुरुषस्तु यदश्नुते वि. धर्मोत्तरे.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नन्दिपुराणे —

विद्याश्चतुर्दश प्रोक्ताः क्रमेण च यथास्थिता ।
षडङ्गाश्चतुरो वेदा धर्मशास्त्रं पुरातनम् ॥

मीमांसा तर्कमिति च एता विद्याश्चतुर्दश ।

पुरातनं पुराणम् ।

आसामेवान्तरोत्पन्नाः परा विद्याः सहस्रशः ॥

आयुर्वेदः सस्यवेदो [1]बहुभेदः प्रकीर्तितः ।

सस्यवेदः कृषिशास्त्रम् ।

सर्वात्मा चात्मविद्या च संसारभयनाशिनी ॥

सर्वदुःखान्तकरणी सर्वपापविनाशिनी ।

तथा —

[2]यर्यको जीवति प्राणी कयाऽपि किल कुत्रचित् ॥

अप्रधानाऽपि सा विद्या कुलानां शतमुद्धरेत् ।

तथा —

शिल्पविद्यां [3]नरो दत्त्वा याति वै ब्रह्मणोऽन्तिकम् ॥

कलाविद्यां नरो दत्त्वा वैष्णवं लोकमाप्नुयात् ।
कल्पमेकं न सन्देहः स्वर्गभोगसमन्वितः ॥

---

1. वर्गभेदः मा. कां P. 208. 2. ययौको D. 3. तरो D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सस्यविद्यां नरो दत्त्वा तृप्तिमान् कामसंयुतः ।
प्रजापतिपुरं गच्छेन्न[1]रकात्तारयेत् पितॄन् ॥

आयुर्वेदं नरो दत्त्वा लोकान् प्राप्नोति निर्मलान् ।
[2]अश्विनोर्दिव्यकामान् यान् दिव्यमन्वन्तरं नरः ॥

तर्कविद्यां नरो दत्त्वा वारुणं लोकमाप्नुयात् ।
मीमांसां तु बुधो दत्त्वा शास्त्रमिन्द्रपुरे वसेत् ॥

धर्मशास्त्रं नरो दत्त्वा स्वर्गलोके महीयते ।
दश मन्वन्तरान् मर्त्यस्तारयेन्नरकात् पितॄन् ॥

वेदविद्यां नरो दत्त्वा स्वर्गे कल्पत्रयं वसेत् ।
आत्मविद्यां तु यो दद्यात्तस्य संख्या न विद्यते ॥

पुण्यस्य गदितुं सम्यगपि वर्षशतायुतैः ।
एतावच्छक्यते वक्तुं यत् कल्पायुतमुत्तमम् ॥

[3]सत्यलोके वसेन्मर्त्यो यत्र ब्रह्मा वसेत् प्रभुः ।

तथा —

पुराणविद्यादातारस्त्वनन्तफलभागिनः ॥

तथा —

श्लोकं प्रहेलिकां गाथामथान्यद्वा सुभाषितम् ।
दत्त्वा प्रीतिकरं याति लोकमप्सरसां सदा ॥

रामायणं भारतं च दत्त्वा स्वर्गे महीयते ।
पुराणं तर्कशास्त्रं च च्छन्दोऽलङ्कारलक्षणम् ॥

---

1. नरकानायेत्पितॄन् D. बुधे D. 2. आलोके नं. पु. 3. नस्य E. तस्त A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वेदमीमांसिकं दत्त्वा शिवधर्मं तथैव च ।
सप्तद्वीपपृथिव्यां तु राजराजो भवेत् तु सः ॥

पाणिनीयं निरुक्तादिवेदाङ्गानि स्मृतीस्तथा ।
दत्त्वा ज्ञानमवाप्नोति वेदान्तं च विशेषतः ॥

नित्यं देयानि राजेन्द्र गावः पृथ्वी सरस्वती ॥

इति विद्यादानफलानि ।

———(०)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथासां (विद्यानां) दानविधिः

गरुडपुराणे —

स्वयं शुचिः शुचीन् विप्रान् प्रातः स्नातो जितेन्द्रियः ।
दर्भानादाय पाणौ तु पाठयेत् तांस्तथाविधान् ॥

अनध्यायान् परिहरन्नीचानश्रावयन्नपि ।
एवं विधानतो यस्तु ऋचमेकां प्रयच्छति ॥

त्रिर्वित्तपूर्णपृथिवी तेन दत्ता न संशयः ।

तथा —

यावन्ति वेदगीतानि पुण्यवेदव्रतानि च ॥

तावन्ति वेददानेन प्राप्नुयाद् भक्तिभावितः ।
उपाध्यायस्य यो वृत्तिं दत्त्वाऽध्यापयते जनम् ॥

किं नन्दनं भवेत्तेन धर्मकामार्थदर्शितम् ।

छात्राणां भोजनाभ्यङ्गं वस्त्रं भिक्षामथापि वा ।
दत्त्वा प्राप्नोति पुरुषः सर्वकामान् न संशयः ॥

अथैतासां[1] प्रतिमादानानि तत्रैव —

अथ दानविधिं वक्ष्ये रहस्यं परमं मतम् ।
यं विधाय नरो [2]घोरं निरयं नोपसर्पति ॥

---

1. अथैतेषां A. D. 2. घोरान् निरयान् A. D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आम्नायरूपाणि विधाय सम्य —
ग्वैमानि पूर्वोदितलक्षणानि ।
विशुद्धनानामणिभूषितानि
प्रागादिवेदक्रमतो निवेश्य ॥

ऋग्वेदादिलक्षणं [1]महाभूतघटदाने दर्शितम् ।

वासांसि देयानि यथाक्रमेण
पीतानि शुक्लान्यथ लोहितानि ।
नीलानि चैवं कुसुमानि दत्त्वा
सम्पूज्य गन्धाक्षतपुष्पधूपैः ॥

आमोदिमोदकयुतं घृतपायसं च
सक्षौद्रमन्नमथ पूपघृतं क्रमेण ।
तेभ्यो निवेद्य विधिवत् प्रयतः प्रणम्य
सम्यक् प्रदक्षिणविधिं विदधीत विद्वान् ॥

तेषां पूजाविधिः कार्यो [2]गायत्र्या धीमतां वरैः ।
व्याहृत्य व्याहृतीः कुर्यादावाहनविसर्जने ॥

मन्त्रैरेतैस्ततः कुर्यादमीषामनुमन्त्रणम् ।
ऋग्वेद पद्मपत्राक्ष रक्ष रक्ष क्षिपाशुभम् ॥

शरणं त्वां प्रपन्नोऽस्मि देहि मे हितमद्भुतम् ।
यजुर्वेद नमस्तेऽस्तु लोकत्राणपरायण ॥

त्वत्प्रसादेन मे कामा निखिलाः सन्तु सन्ततम् ।
सामवेद महाबाहो त्वं हि साक्षादधोक्षजः ॥

---

1. महाभूट D. 2. गायत्री धीमतां वरा A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रसादसुमुखो भूत्वा कृपयानुगृहाण माम् ।
अथर्वन् सर्वभूतानां त्वया दत्ते हिताहिते ॥

शान्तिं कुरुष्व देवेश पुष्टिमिष्टां प्रयच्छ नः ।
इति सम्प्रार्थ्य देवेशान् विप्रेभ्यः प्रतिपादयेत् ॥

प्रदद्यादेकमेकस्मै सुवर्णत्रिपलान्वितम् ।
दद्यादेकपलोपेतमेकैकमिह दुर्बलः ॥

अथ स्वशक्तितो वापि दानमेषां विधीयते ।
एतदेव प्रमाणं स्यादेतेषां मूर्तिनिर्मितौ ॥

अनधीतवतो वेदान् वेददानविधिस्त्वयम् ।
सदाध्ययनयुक्तस्य शिष्याध्यापनमेव हि ॥

इति वेददानम् ।

———(:०:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ स्मृतिदानम्

अङ्गानामध्यापनविधिर्वेदाध्यापनविधिना व्याख्यातः ।

नन्दिपुराणे —

श्रुतिः स्मृतिश्च विप्राणां चक्षुषी द्वे प्रकीर्तिते ।
काणस्तत्रैकया हीनो द्वाभ्यामन्धः प्रकीर्तितः ॥

स्मृतयो धर्मशास्त्राणि । ताश्चाष्टादश मनुना दर्शिताः ।

विष्णुः पराशरो दक्षः संवर्तव्यासहारीताः ।
शातातपो वसिष्ठश्च यमापस्तम्बगौतमाः ॥

देवलः शङ्खलिखितौ भरद्वाजोशनोऽत्रयः ।
शौनको याज्ञवल्क्यश्च दशाष्टौ स्मृतिकारकाः ॥

तथा,

भार्गवी नारदीया च बार्हस्पत्यांगिरस्यपि ।
स्वायम्भुवस्य शास्त्रस्य चतस्रः संहिता मताः ॥

पैठीनसिना तु प्रणेतृमुखेन स्मृतयो दर्शिताः ।

[1]तेषां मन्वङ्गिरोव्यासगौतमा लिखितो यमः ॥

वसिष्ठदक्षसंवर्तशातातपपराशराः ।
विष्ण्वापस्तम्बहारीताः शङ्खः कात्यायनो गुरुः ॥

---

1. तेषा D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रचेता नारदो योगी बौधायनपितामहौ ।
सुमन्तुः काश्यपो बभ्रुः पैठीनो व्याघ्र एव च ॥

सत्यव्रतो भरद्वाजो गार्ग्यः कार्ष्णाजिनिस्तथा ।
जाबालिर्जमदग्निश्च लौगाक्षिर्ब्रह्मसम्भवः ॥

इति धर्मप्रणेतारः षट्त्रिंशदृषयः: स्मृताः ।

अङ्गिरसा तु षोडशोपस्मृतयो दर्शिताः ।

जाबालिर्नाचिकेतश्च स्कन्दो लौगाक्षिकाश्यपौ ॥

व्यासः सनत्कुमारश्च शतायुर्जनकस्तथा ।
व्याघ्रः कात्यायनश्चैव जातुकर्ण्यः कपिञ्जलः ॥

बौधायनः कणादश्च विश्वामित्रस्तथैव च ।
उपस्मृतय इत्येताः प्रवदन्ति मनीषिणः ॥

इति स्मृतिदानम् ।

———(:०:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथैतासां दानविधिः

वराहपुराणे —

विद्यादानविधिं वक्ष्ये यथातत्त्वेन ते पुनः ।
दत्तेन यत् फलं तच्च दातुरस्य समासतः ॥

उक्ते समारभेत् काले निम्नोन्नतविवर्जिते ।
सुसमे भूप्रदेशे च गोमयेनोपलेपिते ॥

पुष्पप्रकरसम्पन्ने गीतवाद्यसमाकुले ।
वेदिकां चतुरस्रां च चन्दनेनैव कारयेत् ॥

पुस्तकं तत्र संस्थाप्य गन्धपुष्पैः समर्चयेत् ।
सौवर्णी लेखिनी कार्या मषीभाण्डं च रौप्यकम् ॥

जयशब्दं समुद्घोष्य [1]प्रारभेल्लेखकः सुधीः ।
विनीतश्चाप्रमत्तश्च शास्त्रं निष्पत्तिमानयेत् ॥

निष्पत्तिः समापनम् ।

ब्राह्मणस्य सुवृत्तस्य वाचकस्य विजल्पतः ।

अत्रैवं नन्दिपुराणे —

उभयं वापि तल्लेख्यं समीकुर्याच्च वाचयन् ॥

उभयं लेख्यम् । द्वे पुस्तके वाचयन् समीकुर्यात् न्यूनादि प्रक्षेपापनयनाभ्यां शुद्धं कुर्यादित्यर्थः ।

---

1. व्यारमेल्ले D. 2. प्रकुक्तया D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ऊनाधिकैश्च संयुक्तं वर्णैर्मात्रादिभिस्तथा ।
अनुस्वारविसर्गैस्तु युक्तायुक्तैर्विचारयन् ॥

शास्त्र[1]प्रयुक्तया युक्त्या पुनरुक्त्या च शोधयेत् ।

तथा —

एवं विद्वांस्तु मेधावी शास्त्रं सत्कृत्य कृत्स्नशः ॥

प्रदद्याद् विभवैर्दिव्यैः सुरायतनवेश्मसु ।

वराहपुराणे —

लेखके दक्षिणां दद्याद्वस्त्वलङ्कारभूषणम् ॥

शुक्लं च वस्त्रयुग्मं तु दद्यात् शास्त्रसमाप्तितः ।
लिखापयित्वा तच्छास्त्रं देयं गुणवते सदा ॥

[2]तपस्विनि धर्मरते परिपालनतत्परे ।
वस्त्रयुग्मेन संवीतं पुस्तकं प्रतिपादयेत् ॥

वाचकं पूजयेच्चैव वस्त्रालङ्कारभूषणैः ।
क्षम्यतामिति वक्तव्यो लेखकः सुसमाहितः ॥

अनेनैव विधानेन विद्यादानफलं लभेत् ।
अनेनैव विधानेन दातुरन्नस्य यत् फलम् ॥

तत् फलं [3]कोटिगुणितं पुस्तकैकप्रदानतः ।
यत् पुण्यं तीर्थयात्राणां यत् पुण्यं यज्वनां नृणाम् ॥

तत् पुण्यं कोटिगुणितं विद्यादानान्न संशयः ।

वह्निपुराणे —

शुभेऽह्नि शुभनक्षत्रे मण्डपं शुभवेदिकम् ॥

---

1. प्रकुक्तया D. 2. तपस्विने D. 3. कोटिगोणितं A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चतुरस्रं वितानं च कृत्वा तत्रोपलेपयेत् ।
गोमयेनोपलिप्ते तु पुष्पप्रकरशोभिते ॥

तत्र न्यस्यासनं दिव्यं दिव्यगन्धाधिवासितम् ।
संस्थाप्य पुस्तकं तत्र धर्मशास्त्रस्य धीमतः ॥

ब्राह्मणान् वेदसम्पूर्णान् छन्दोलक्षणपारगान् ।
लिखापयित्वा यत्नेन तत् समग्रं शुभाक्षरैः ॥

चन्द्रसूर्योपरागे वा सङ्क्रांत्ययनवासरे ।
पुण्येऽह्नि तत् सुसम्पूज्य वस्त्रालङ्कारभूषणैः ॥

घृतधेन्वा युतं रत्नैर्दद्याद् गुणवते ततः ।
शास्त्रसद्भावविदुषे वाचकेऽतिप्रियंवदे ॥

तच्छास्त्रं शृण्वतां नित्यं जनानामघनाशनम् ।
दातुस्तस्माद् भवेन्नैकं फलं तच्छृणु भूपते ॥

यत् पुण्यं सर्वतीर्थानां विधिवद्यजतां तथा ।
तत् पुण्यं समवाप्नोति विधिवच्छास्त्रदः पुमान् ॥

इति स्मृतिदानविधिः ।

———(:o:)———

1. तच्छृण्वभूपते D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथाधीतशास्त्रस्य शिष्येभ्यो व्याख्यादानविधिः

नन्दिपुराणे —

अनेनैव विधानेन ब्राह्मणे शीलशालिनि ।
प्रबोधवति धीयुक्ते युक्तज्ञे वेदवादिनि ॥

विन्यसेत्तु शुभं शास्त्रं महापुण्यजिगीषया ।

अनेन पूर्वोक्तेन प्रकारेण । यथा —

गुरुश्च धर्मवान् प्राज्ञः श्रुतशास्त्रो[1] विमत्सरः ॥

विप्रः प्रकृतिसंशुद्धः शुचिस्मित[2]मुखः सदा ।
[3]सुव्रतो वृतशास्त्रज्ञः शब्दशास्त्रविशारदः ॥

अभ्यस्तशास्त्रसन्दोहः प्रकृतार्थप्रवर्तकः ।

प्रकृतेति प्रस्तुतार्थाभिधायी । तथा —

शास्त्रार्थपदविद्धीमान् पदश्लोकार्थबोधकः ॥

समुदायप्रकीर्णार्थमुख्यशास्त्रानुषङ्गजम् ।
[3]अलङ्कारं च हृद्वस्तु व्यपदिश्यार्थबोधकः ॥

प्रक्रान्तादिस्वशास्त्रार्थविभागपरिनिष्ठितः ।
कष्टाभिधानगूढार्थभङ्गेन तु सुविबोधकः ॥

---

1. श्रुतशास्त्रे A. 2. मुखं D. 3. सुधृत्तो A. वृतो वृतशास्त्रज्ञः शब्दणस्त्र-विशारदः D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रद्धेयवागनालस्यः श्रोतृचित्तप्रबोधकः ।
संस्कारैः संस्कृतां विद्यां प्राकृतैः प्राकृतामपि ॥

आलापमात्रैर्व्याख्यानैर्यश्च शिष्यान् प्रबोधयेत् ।

'पठेत्' इत्यादिवाक्योन्नीतविध्युक्तप्रकारेण इत्यर्थः ।

एवं व्याख्यां शुभां कृत्वा गुरुवक्त्रान्नरोत्तमः ॥

विधेयं चिन्तयेद्यत्तत् परत्र हितकारणात् ।
गुरुणा चोक्तमेकान्ते श्रद्धावान् वाक्यमाश्रयेत् ॥

तथा —

समाप्य वाचनेऽभीष्टं ब्रूयादेवं विचक्षणः ।
अवधार्य जगच्छान्तिमन्ते शान्त्युदकं सृजेत् ॥

ततश्च —

शिष्यैः परस्परं शास्त्रं चिन्तनीयं विचक्षणैः ।
कथावस्तुप्रसङ्गेन नानाव्याख्यानभावनैः ॥

युक्तिभिश्च चरेद् व्याख्यां चिह्नैश्चापि स्वयंकृतैः ।
एवं दिने दिने व्याख्यां शृणुयान्नियतो नरः ॥

अथ वा गुरुशिष्याणां कृत्यादिकल्पनेन तान् सुस्थितान् विधाया-ध्यापनप्रवर्तनेनाऽपि विद्यादानम् । तदपि तत्रैवोक्तम् —

धनैर्वा विपुलैर्दत्तैर्गुरुं कृत्वा सुतर्पितम् ।
अध्यापयेच्छुभान् शिष्यानाभिजातान् [2]सुमेधसः ॥

---

1. प्रबोधकः A. 2. त्सुमेधसः D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं विद्याप्रदानं तु सर्वदानोत्तमोत्तमम् ।
सर्वदा सर्ववर्णानां [1]नरकात् प्लवमुत्तमम् ॥

अयं दानप्रकारो विद्यादानमात्रो ज्ञातव्यः ।

इति अधीतशास्त्रस्य शिष्येभ्यो व्याख्यादानविधिः ।

————(:o:)————

1. नरकात्प्लुव D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ पुराणदानानि

पुराणानि परिगणितानि सौरपुराणे —

यदुक्तं भानुना पूर्वं पुत्राय मनवे द्विजाः ।
तदहं संप्रवक्ष्यामि शृणुध्वं वदतो मम ॥

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥

अत्र नोपपुराणानां खिलत्वाल्लक्षणं स्मृतम् ।
ब्राह्मं पुराणं तत्राद्यं संहिताभ्यां विभूषितम् ॥

श्लोकानां दशसाहस्रं नानापुण्यकथायुतम् ।
पाद्मं द्वितीयं कथितं तृतीयं वैष्णवं स्मृतम् ॥

चतुर्थं वायुना प्रोक्तं वायवीयमिति स्मृतम् ।
ततो भागवतं प्रोक्तं भागद्वयविभूषितम् ॥

चतुर्भिः पर्वभिः प्रोक्तं भविष्यं तदनन्तरम् ।
मार्कण्डेयमथाऽग्नेयं नारदीयमतः परम् ॥

दशमं ब्रह्म[1]वैवर्तं लैङ्गमेकादशं स्मृतम् ।
भागद्वयेन लैङ्गं च ततो वाराहमुत्तमम् ॥

संयुक्तमष्टभिः खण्डैः स्कान्दं चैव सविस्तरम् ।
ततस्तु वामनं कूर्मं भागद्वयविराजितम् ॥

1. ब्रवैवर्तं A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मात्स्यं च गारुडं प्रोक्तं ब्रह्माण्डं च ततः परम् ।
भागद्वयेन कथितं ब्रह्माण्डमभिसंज्ञितम् ॥

मत्स्यपुराणे (५३.११-५६)

पुराणानि दशाष्टौ च साम्प्रतं तदिहोच्यते ।
नामतस्तानि वक्ष्यामि शृणुध्वमृषिसत्तमाः ॥

ब्रह्मणाऽभिहितं पूर्वं यावन्मात्रं मरीचये ।
ब्राह्मं तद्दशसाहस्रं पुराणं परिकीर्त्यते ॥

लिखित्वा तच्च यो दद्याज्जलधेनुसमन्वितम् ।
वै[1]शाख्यां पौर्णमास्यां तु ब्रह्मलोके महीयते ॥

एतदेव यदा पद्ममभूद्धैरण्मयं[2] जगत् ।
तद्वृत्तान्ताश्रयं तद्वत्पाद्ममित्युच्यते बुधैः ॥

पाद्मं तत्पञ्चपञ्चाशत्सहस्राणीह पठ्यते ।
तत् पुराणं च यो दद्यात् सुवर्णकमलान्वितम् ॥

ज्येष्ठे मासि तिलैर्युक्तं सोऽश्वमेधफलं लभेत् ।
वाराहकल्पवृत्तान्तमधिकृत्य पराशरः ॥

यत्राह धर्मानखिलांस्तद्युक्तं वैष्णवं विदुः ।

तदाषाढे च यो दद्याद् घृतधेनुसमन्वितम् ।
[3]पौर्णमास्यां विपूतात्मा स पदं याति वारुणम् ॥

चतुर्विंशतिसाहस्रं तत्प्रमाणं विदुर्बुधाः ।
श्वेतकल्पप्रसङ्गेन धर्मान् वायुरिहाब्रवीत् ॥

---

1. वैशाख्यौ D; A. 2. हैरफयी A. 3. पैर्णमात्यां D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यत्र तद्वायवीयं स्याद् रुद्रमाहात्म्यसंयुतम् ।
चतुर्विंशत्सहस्राणि पुराणं तदिहोच्यते ॥

श्रावण्यां श्रावणे मासि गुडधेनुसमन्वितम् ।
यो दद्याद्विधिसंयुक्तं ब्राह्मणाय कुटुम्बिने ॥

शिवलोके स पूतात्मा कल्पमेकं वसेन्नरः ।
तत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ॥

वृत्रासुरवधोपेतं तद्भागवतमुच्यते ।
सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः ॥

तद्वृत्तान्तोद्भवं लोके तद् भागवतमुच्यते ।
लिखित्वा तच्च यो दद्याद्धेमसिंह[2] समन्वितम् ॥

पौर्णमास्यां प्रौष्ठपद्यां स याति परमं पदम् ।
अष्टादशसहस्राणि पुराणं तत् प्रकीर्तितम् ॥

यत्राह नारदो धर्मान् बृहत्कल्पाश्रितांस्त्विह ।
पञ्चविंशत्सहस्राणि नारदीयं तदुच्यते ॥

[4]तदिदं पञ्चदश्यां तु यो दद्याद्धेमसंयुतम् ।
उत्तमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम् ॥

यत्राधिकृत्य शकुनीन् धर्माधर्मविचारणम् ।
[5]पुराणं नवसाहस्रं मार्कण्डेयमिहोच्यते ॥

परिलिख्य च योदद्यात् सौवर्णकरिसंयुतम् ।
कार्तिक्यां पौण्डरीकस्य यज्ञस्य फलभाग् भवेत् ॥

---

1. दधि°. 2. शृङ्ग Printed. 3. बृहत्कल्पाश्रयांस्त्विह Printed. 4. तदिषे (आश्विने). Printed 5. व्याख्यातं वै मुनिप्रश्ने मुनिभिर्धर्मचारिभिः । मार्कण्डेयेन कथितं तत् सर्वं विस्तरेण तु ॥ (म. पु.)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यत्तदीशानकल्पस्य वृत्तान्तमधिकृत्य च ।
वसिष्ठायाग्निना प्रोक्तमाग्नेयं तत् प्रचक्षते ॥

[1]लिखापयित्वा यो दद्याद्धेमपद्मसमायुतम् ।
[2]मार्गशीर्षे विधानेन तिलधेन्वान्वितं तथा ॥

एतत् षोडशसाहस्रं सर्वक्रतुफलप्रदम् ।
यत्राधिकृत्य माहात्म्यमादित्यस्य चतुर्मुखः ॥

अघोरकल्पवृत्तान्तप्रसङ्गेन [3]जगत्पतिः ।
मनवे कथयामास भूतग्रामस्य लक्षणम् ॥

चतुर्दशसहस्राणि तथा पञ्चशतानि च ।
भविष्यच्चरितप्रायं भविष्यं तदिहोच्यते ॥

तत्पौषे मासि यो दद्यात् पौर्णमास्यां विमत्सरः ।

गुडकुम्भसमायुक्तमग्निष्टोमफलं लभेत् ।
रथन्तरस्य कल्पस्य वृत्तान्तमधिकृत्य च ॥

सावर्णिना नारदाय कृष्णमाहात्म्यसंयुतम् ।
यत्र ब्रह्मवराहस्य चरितं वर्ण्यते मुहुः ॥

तदष्टादशसाहस्रं ब्रह्मवैवर्तमुच्यते ।
पुराणं ब्रह्मवैवर्तं यो दद्यान् माघमासि च ॥

पौर्णमास्यां स भवनं ब्रह्मलोके महीयते ।
यत्राग्निलिङ्गमध्यस्थः प्राह देवो महेश्वरः ॥

---

1. लेखयित्वा च. (म. पु.) 2. मार्गशीर्ष्यां. 3. जगत्स्थितिम्.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धर्मार्थकाममोक्षार्थमाग्नेयमधिकृत्य च ।
[1]कल्पं तल्लैङ्गमित्युक्तं पुराणं ब्रह्मणा स्वयम् ॥

तदेकादशसाहस्रं [2]फाल्गुन्यां यः प्रयच्छति ।

तिलधेनुसमायुक्तं स याति शिवसा[3]त्म्यताम् ।
महावराहस्य पुनर्माहात्म्यमधिकृत्य च ॥

विष्णुनाभिहितं क्षौण्यां[4] तद्वाराहमिहोच्यते ।
मानवस्य प्रसङ्गेन कल्पस्य मुनिसत्तम ॥

चतुर्विंशत्सहस्राणि तत्पुराणमिहोच्यते ।
काञ्चनं गरुडं कृत्वा तिलधेनुसमन्वितम् ॥

पौर्णमास्यां मधौ दत्त्वा ब्राह्मणाय कुटुम्बिने ।
[5]वराहस्य [6]प्रदानेन पदमाप्नोति वैष्णवम् ॥

यत्र माहेश्वरान् धर्मानधिकृत्य च षण्मुखः ।
कल्पे तत्पुरुषे वृत्ते चरितैरुपबृंहितम् ॥

स्कान्दं नाम पुराणं तदेकाशीति [7]निगद्यते ।
सहस्राणि शतं चैकमिति मर्त्येषु पठ्यते ॥

[8]परिलिख्य च यो दद्याद्भेमशूलसमन्वितम् ।
शैवं च पदमाप्नोति [9]मकरोपगमे रवेः ॥

---

1. कल्पान्ते लैङ्ग°. म. पु. 2. फाल्गुण्यां D. 3. शिवसात्मताम. म. पु 4. क्षौण्यें. म. पु. 5. वाराहस्य D. 6. प्रसादेन. 7. एकाशीतिनि° 8. परिलिख D. 9. भीने चोपगते रवौ.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्रिविक्रमस्य माहात्म्यमधिकृत्य चतुर्मुखः ।
त्रिवर्गमभ्यधात्तत्र वामनं [1]परिकीर्त्यते ॥

पुराणं दशसाहस्रं [2]कूर्मकल्पानुगं शिवम् ।
यस्तु[3] तद्विषुवे दद्याद्वैष्णवं यात्यसौ पदम् ॥

यत्र धर्मार्थकामानां मोक्षस्य च रसातले ।
माहात्म्यं कथयामास कूर्मरूपी जनार्दनः ॥

इन्द्रद्युम्नप्रसङ्गेन ऋषीणां शक्रसन्निधौ ।
सप्तदशसहस्राणि लक्ष्मीकल्पानुषङ्गिकम् ॥

यो दद्यादयने [4]कूर्मं हेमकूर्मसमन्वितम् ।
गोसहस्रप्रदानस्य स फलं प्राप्नुयान्नरः ॥

श्रुतीनां यत्र कल्पादौ प्रवृत्त्यर्थं जनार्दनः ।
मत्स्यरूपी च मनवे नरसिंहोपवर्णनम् ॥

अधिकृत्याब्रवीत् सप्त[5]कल्पवृत्तं मुनिव्रतः[6] ।
तन्मात्स्यमिति जानीध्वं सहस्राणि [7]चतुर्दश ॥

विषुवे हेममत्स्येन धेन्वा चैव समन्वितम् ।
यो दद्यात् पृथिवी तेन दत्ता भवति चाखिला ॥

यदा च गारुडे कल्पे विश्वाण्डाद्गरुडोद्भवः[8] ॥

अधिकृत्याब्रवीत् कृष्णो गारुडं तदिहोच्यते ।
तदष्टादश चैकं च सहस्राणीह पठ्यते ॥

---

1. परिकीर्तितम्. 2. कौर्मं Printed. 3. यः शरद्विषुवे Printed. 4. कर्सं D. 5. सत्यकल्प D. 6. मुनिव्रताः दा.खं. 520. 7. त्रयोदशPrinted. 8. °द्भवम् Printed.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

[1]सौवर्णं हंसमिथुनसंयुक्तं विष्णवे नरः ।
यो ददाति परां सिद्धिमाप्नोति शिवसम्मिताम् ॥

ब्रह्मा [2]ब्रह्माण्डमाहात्म्यमधिकृत्याब्रवीत् पुनः ।
तच्च द्वादशसाहस्रं ब्रह्माण्डं द्विशताधिकम् ॥

भविष्याणां च कल्पानां श्रूयते यत्र विस्तरः ।
तद् ब्रह्माण्डपुराणं तु ब्रह्मणा समुदाहृतम् ॥

यो दद्यात्तद्व्रतीपाते पत्रोर्णयुगसंयुतम् ।
राजसूयसहस्रस्य फलमाप्नोति मानवः ॥

हेमधेन्वा युतं तच्च ब्रह्मलोक[3]फलप्रदम् ।

[4]वामनपुराणे—

खिलान्युपपुराणानि यानि चोक्तानि सूरिभिः ॥

इदं ब्रह्मपुराणस्य खिलं सौख्यमनुत्तमम् ।
संहिताद्वयसंयुक्तं पुण्यं शिवकथाश्रयम् ॥

आद्या सनत्कुमारोक्ता द्वितीया सूर्यभाषिता ।

कूर्मपुराणे —

अन्यान्युपपुराणानि मुनिभिः कथितानि तु ।
आद्यं सनत्कुमारोक्तं नारसिंहमतः परम् ॥

तृतीयं नारदमुद्दिष्टं कुमारेण तु साधितम् ।
चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम् ॥

---

1. सौवर्णं Printed. 2. यत्स्वाण्ड D. 3. कलप्रदम् D; A.
4. सौरपुराणे 572. दा.खं.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दूर्वाससोक्तमाश्चर्यं नारदोक्तमतः परम् ।
कापिलं मानवं चैवं तथैवेशानमीरितम् ॥

ब्रह्माण्डं वारुणं वाथ कालिकाह्वयमेव च ।
माहेश्वरं तथा [1]साम्बं सौरं सर्वार्थसञ्चयम् ॥

पराशरोक्तं प्रवरं तथा भागवताह्वयम्[2] ।
इदमष्टादशं प्रोक्तं पुराणं कौर्मसंज्ञितम् ॥

चतुर्धा [3]संस्थितं पुण्यं संहितानां प्रभेदतः ।

मत्स्यपुराणे —

पाद्मे पुराणे या प्रोक्ता नरसिंहोपवर्णना ॥

तच्चाष्टादशसाहस्रं नारसिंहमिहोच्यते ।
नन्दाया यत्र माहात्म्यं कार्त्तिकेयेन वर्ण्यते ॥

नन्दीपुराणं तल्लोकैराख्यातमिह कीर्त्यते ।
यत्र साम्बं पुरस्कृत्य भविष्येऽपि कथानकम् ॥

प्रोच्यते तत्पुनर्लोकैः[4] साम्बमेव मुनिव्रताः ।
एवमादित्यसंज्ञं च तत्रैव परिपठ्यते ॥

अष्टादशभ्यस्तु पृथक् पुराणं यत् प्रदृश्यते ।
विजानीध्वं द्विजश्रेष्ठास्तदेतेभ्यो विनिर्गतम् ॥

[5]पञ्चाङ्गं च पुराणं स्यादाख्यानमितरत् स्मृतम् ।
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ॥

---

1. सावं D. 2. भागवतं द्वयम् दा. खं. 515. 3. संस्वितं D.
4. °लोके Printed. 5. पञ्चाङ्गवत् दा. खं. 514.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ।
ब्रह्मविष्ण्वर्करुद्राणां माहात्म्यं भुवनस्य च ॥

ससंहारं प्रदृश्येत पुराणे पञ्चवर्ण्यता ।
[1]धर्मश्चार्थश्च कामश्च मोक्षश्च परिकीर्त्यते ॥

सर्वेष्वपि पुराणेषु तद्विरुद्धे च यत्फलम् ।
[2]ससात्त्विकेषु कल्पेषु माहात्म्यमधिकं हरेः ॥

राजसेषु च माहात्म्यमधिकं [3]ब्रह्मणो विदुः ।
तद्वदग्नेश्च माहात्म्यं तामसेषु शिवस्य च ॥

सङ्कीर्णेषु सरस्वत्याः पितॄणां च निगद्यते ।

सौरपुराणे —

दानमस्य पुराणस्य दानानामुत्तमं [4]द्विजाः ॥

अस्य सौरस्य यो दद्याच्छिवभक्ताय पर्वणि ।
लिखित्वा यः प्रयच्छेत्तु स विद्यापारगो भवेत् ॥

सर्वेषां फलमाप्नोति चतुर्दश्यां न संशयः ।
अन्यान्युपपुराणानि सहिरण्यानि पर्वणि ॥

लिखित्वा यः प्रयच्छेत्त स विद्यापारगो भवेत् ।

मत्स्यपुराणे —

अष्टादश पुराणानि कृत्वा सत्यवतीसुतः ॥

भारताख्यानमखिलं चक्रे तदुपबृंहितम् ।
लक्षेणैकेन तत् प्रोक्तं वेदार्थपरिबृंहितम् ॥

---

1. धर्मर्थश्चोश्च D. 2. सात्विकेषु च. 3. ब्राह्मणे D. दा. ख: 515.
4. द्विताः D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वाल्मीकिनापि यत् प्रोक्तं रामोपाख्यानमुत्तमम् ।
ब्रह्मणाभिहितं यच्च शतकोटिप्रविस्तरम् ॥

[1]आहृत्य तन्नारदेनैव वाल्मीकाय पुनः पुनः ।

वाल्मीकिना च लोकेषु धर्मकामार्थ[2]साधनम् ।
[3]एवं सपादाः पञ्चैव लक्षास्तेषु प्रकीर्तिताः ॥

ब्रह्मपुराणे —

धर्मार्थकाममोक्षाणां सारं भारतमुत्तमम् ।
तदेकस्य प्रदानेन वेदशाखाप्रदो भवेत् ॥

रामायणं लिखित्वा तु यः सस्वर्णं प्रयच्छति ।
तस्य प्रसन्ना भवति पद्मबन्धैः सरस्वती ॥

इति पुराणदानानि

———(:o:)———

1. आह स नारदेनैव D. 2. साधवम् D. 3. रचंसमादाः पञ्चैव-लक्षास्तेषप्रकीर्तिता D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

[1]भारतश्रवणविधिः

महाभारते —

अतः परं प्रवक्ष्यामि यानि देयानि भारत ।
वाच्यमाने तु विप्रेभ्यो राजन् पर्वणि पर्वणि ॥

स्वस्ति [2]वाच्यं द्विजानादौ ततः कार्यं प्रवर्तते ।
समाप्ते पर्वणि ततः स्वशक्त्या तर्पयेद् द्विजान् ॥

आदौ तु वाचकं पूज्य रसगन्धसमन्वितम् ।
विधिवद् भोजयेद्राजन् मधुपायसमुत्तमम् ॥

ततो मूलफलोपेतं[3] पायसं मधुसर्पिषी ।
आस्तिको[4] भोजयेद्राजन् दद्याच्चैव गुडोदनम् ॥

अथ धूपैश्च दीपैश्च मोदकैश्च समन्वितम् ।
सभापर्वणि राजेन्द्र हविष्यं भोजयेद् द्विजान् ॥

आरण्यके मूलफलैस्तर्पयेच्च द्विजोत्तमान् ।
आरण्यपर्व चासाद्य जलकुम्भान् प्रदापयेत् ॥

विराटपर्वणि तथा वासांसि विविधानि च ।
उद्योगे भारतश्रेष्ठ सर्वकामसमन्वितम् ॥

---

1. अथ देयपानानि D. 2. वाच्यं विधायादौ दा. खं. 521. 3. मूलप्रयोगेन A. मूलफलप्राय दा. खं. 521. 4. आस्तिके दा. खं. 521.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भोजनं भोजयेद्विप्रान् गन्धमाल्यैरलङ्कृतान् ।
भीष्मपर्वणि राजेन्द्र दत्त्वा पानमनुत्तमम् ॥

ततः सर्वगुणोपेतमन्नं दद्यात् सुसंस्कृतम् ।
द्रोणपर्वणि विप्रेभ्यो भोजनं परमूर्जितम् ॥

शराश्च देया राजेन्द्र चापान्यसिवरास्तथा[1] ।
कर्णपर्वण्यपि तथा भोजनं सार्वकामिकम् ॥

विप्रेभ्यः संस्कृतं सम्यग् दद्यात् संयतमानसः ।
शल्यपर्वणि राजेन्द्र मोदकैः सगुडोदनैः ॥

सधूपैस्तर्पणैश्चैव सर्वमन्नं प्रदापयेत् ।
गदापर्वण्यपि तथा मुद्गमिश्रं प्रदापयेत् ॥

स्त्रीपर्वणि तथा रत्नैस्तर्पयेद् विधिवद् द्विजान् ।
श्तत्रौदनं पुरस्ताच्च ऐषीके दापयेत् पुनः ॥

ततः सर्वगुणोपेतमन्नं दद्यात् सुसंस्कृतम् ।
शान्तिके[3] पर्वणि तथा हविष्यं भोजयेद् द्विजान् ॥

आश्वमेधिकमासाद्य भोजनं सार्वकामिकम् ।
[4]तथाश्रमणिवासांसि हविषा भोजयेद् द्विजान् ॥

मौसले सार्वगुणिकं गन्धमाल्यानुलेपनम् ।
हरिवंशे तथा पार्थ पायसं चारुभोजनम् ॥
पारणे पारणे राजन् यथावद् भरतर्षभ ।
समाप्य सर्वां प्रयतः संहितां शास्त्रकोविदः ॥

---

1. अपि शिवास्तथा A. 2. कृत्तौदनं दा. खं 522; घृतौदनं E. 3. शान्तिपर्वणि च दा. खं. 522. 4. अथाश्रमनिवासे तु. दा. खं. 522. This and the next line om A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शुभे देशे निवेश्याथ क्षौमवस्त्राभिसंवृतम् ।
शुक्लाम्बरधरस्तत्र शुचिर्भूत्वा स्वलङ्कृतः ॥

अर्चयेत्तु यथान्यायं गन्धमाल्यैः पृथक् पृथक् ।
संहितापुस्तकं[1] रागात् प्रयतः सुसमाहितः ॥

[2]भक्ष्यैर्भोज्यैश्च पेयैश्च कौतुकैर्विविधैः शुभैः ।
हिरण्यं च सुवर्णं च दक्षिणां तत्र दापयेत् ॥

देवताः कीर्तयेत् सर्वा नरनारायणौ तथा ।

ततो गन्धैश्च माल्यैश्च स्वलङ्कृत्य[3] द्विजोत्तमान् ।
तर्पयेद्विविधैः कामैर्दानै रत्नादिकैस्तथा ॥

भुक्तवत्सु च विप्रेषु यथावत् सम्प्रवाचयेत् ।
वाचकं भरतश्रेष्ठ भोजयित्वा स्वलङ्कृतम् ॥

ब्राह्मणेषु प्रसन्नेषु प्रसन्नास्तस्य देवताः ।

समग्रभारतश्रवणानन्तरं तत्रैव —

[4]वाचके परितुष्टे तु शुभा प्रीतिरनुत्तमा ॥

ततो विवरणं कार्यं संहितानां भरतर्षभ ।
इतिहासमिमं श्रुत्वा यथावदनुपूर्वशः ॥

संयतात्मा शुचिर्भूत्वा पारं गत्वा तु भारते ।
तेषां [5]श्राद्धानि देयानि श्रुत्वा भारतभारतम् ॥

---

1. संहितापुस्तकान्यारात् दा. खं. 522. 2. भोक्ष्यै D. A. 3. स्वलङ्कृता द्विजोत्तमाः A. 4. वाचके-भारतम् om D. 5. श्रद्धायुक्तानि वस्तूनि दा.खं.523.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ब्राह्मणेभ्यो यथाशक्ति दद्याच्च भरतर्षभ ।
महादानानि देयानि [1]रत्नानि विविधानि च ॥

[2]गावः कांस्योपदोहाश्च दोग्ध्र्यश्च सुमनोहराः ।
सर्वकामगुणोपेता यानानि विविधानि च ॥

भवनानि विचित्राणि भूमिर्वासांसि काञ्चनम् ।
वाहनानि च देयानि हृद्या मत्ताश्च वारणाः ॥

शयनं शिबिकाश्चैव स्यन्दनाश्च स्वलङ्कृताः ।

[3]यद्यद् गृहवरं किञ्चित् किञ्चिदस्ति महद्वसु ।
तत्तद्देयं द्विजातिभ्य आत्मा दासाश्च [4]सूदनः ॥

[5]श्रद्धया परया [6]दद्यात् क्रमशः पाठपारगः ।
शक्तितस्तन्मना[7] भूत्वा सुश्रुतश्च विमत्सरः ॥

एवं करोति यो विद्वान् दानं पर्वप्रतिष्ठितम् ।
सर्वयज्ञफलं प्राप्य स देवैः सह मोदते ॥

अत्र प्रसङ्गाच्छ्रावकस्यापि फलं दर्शितं तत्रैव —

यश्चानेन प्रकारेण भारतं श्रावयेन्नरः ।
तद्विद्यादानमाहात्म्याल्लोकानुद्धरत्यसौ ॥

इति ।

इति भारतश्रवणविधिः ।

———(:०:)———

1. यानानि-दा. खं. 523. महादानानि विचित्राणि भूमिवासांसिकानिच A. 2. गावः-विविधानि च om A. 3. द्यद्गृहेवरं D. A. दा. खं. 523. 4. सूनवः. 5. हृद्याक्रमशः पाठपारगाः. दा. खं. 523. 6. श्रद्धया-मोदते om D. A. 7. सुमना.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ शिवशास्त्रादिदानम्

नन्दिपुराणे —

शुभे नक्षत्रदिवसे शुभे वापि दिनग्रहे ।
लेखयेत् पूज्य देवेशान् रुद्रब्रह्मजनार्दनान् ॥

पूर्वदिग्वदनो भूत्वा लिपिज्ञो लेखकोत्तमः ।
निरोधो हस्तवाहश्च मषीवातावधारणा ॥

एकान्तश्चोपकरणं यस्यासौ [1]लेखकोत्तमः ।
[2]विद्याधारं प्रकुर्वीत हेमरूप्यमयं शुभम् ॥

नागदन्तमयं वापि शुभदारुमयं तथा ।
मनोज्ञमगुरुं रम्यं [3]श्लक्ष्णयन्त्रप्रयोगजम् ॥

सङ्कोचयन्त्रसंयुक्तं विकासेन समन्वितम् ।
[4]तत्र विद्यां विनिहितां कुर्यात् पुस्तकसंस्थिताम् ॥

तथा —

[5]लेखको बुद्धिमान्[6] प्रातः शुक्लमाल्याम्बरोज्ज्वलः ।
आरभेत् तूर्यघोषेण पूज्य देवान् पितॄंस्तथा ॥

ब्राह्मणान् स्वस्तिवाच्यादौ शास्त्रं सञ्चारयेत् सुधीः ।
श्लोकपञ्चकमादौ तु दशकं वापि लेखयेत् ॥

---

1. लेखकोनमः D. 2. विच्चाधार D. 3. शुक्लयन्तप्रयोगजम् Printed दा. सा. 480. 4. पत्रविद्याविनिहतां दा. सा. p. 478. 5. लेखिको. D. 6. मान्साः D. स्नातः दा. सा. 480.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ततो नक्षत्रयोगेन द्वितीयेऽहनि तल्लिखेत् ।
तादृशेनैव विधिना पुण्याहैः शुभसंयुतैः ॥

ततः समाप्ते शास्त्रे तु पुनः पुण्याहसंयुतम् ।
कुर्यात्तदहरम्यैश्च पानभोजनवस्तुभिः ॥

उभयं वापि तल्लेख्यं समीकुर्याच्च वाचयन् ।

उभयं पूर्वमुत्तरं च ।

न्यूनाधिकमात्रादिलेखनदूरीकरणाभ्यां पूर्वपुस्तकवच्छुद्धं कुर्यादित्यर्थः ।
तथा —

एवं विद्वांस्तु मेधावी शास्त्रं सत्कृत्य कृत्स्नशः ।
प्रदद्याद्विभवैर्दिव्यैः सु[1]रायतनवेश्मसु ॥

आरोप्य याने[2] रत्नाढ्ये शुभवस्त्रपरिष्कृते ।
घण्टाचामरशोभाढ्ये रत्नदण्डातपत्रिणि ॥

गजवाजिरथस्थं वा महाशोभासमन्वितम् ।
पुरतो गीतनृत्येन नानावाद्यरवेण च ॥

मङ्गलैर्वेदनिर्घोषैर्देवाय विनिवेदयेत् ।
नानारूपोपहारैश्च सम्पूज्य तु दिवौकसः ॥

दत्त्वा च पुस्तकं तत्र पितॄणां धर्ममुद्दिशेत् ।
बान्धवानां च हृद्यानामनन्तफलमिच्छता ॥

ततो दत्त्वा विधानेन तां विद्यां शिवमन्दिरे ।
ततश्च [3]दक्षयेद्विप्रान् रुद्रभक्तांश्च मानवान् ॥

---

1. पुरायतन° दा. सा. 491. 2. आरोग्ययाने दा. सा. 491. 3. पक्षयेत् कृतनिवेदनप्रतिष्ठार्थं दक्षिणादिभिः पूजयेत्–दानसागरे पृ. ५९१. अक्षयेत् दा. खं. ५३१.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यथाशक्ति च कर्तव्या उत्सवाः स्वेषु वेश्मसु ।

देवीपुराणे तु प्रकारान्तरेणैतत् सर्वमभिधायोक्तम् ।

सामान्यं सर्वतीर्थेषु मातॄणां भवनेषु च ।
तस्मिन् पूजां तथा कृत्वा देवदेवस्य शूलिनः ॥

समर्पयेत् प्रणम्येशं प्रीयन्तां मातरो मम ।
सदाध्ययनयुक्ताय विद्याध्यानरताय च ॥

विद्यासङ्ग्रहयुक्ताय कृतशास्त्रश्रमाय च ।
तेनैव वर्तयेद्यस्तु तस्य तं विनिवेदयेत् ॥

तं आगमम् । अत्राप्यधीततच्छास्त्रस्याध्यापनम् । गुर्वादिवृत्तिकल्पनया वाध्यापनमितिपूर्वोक्तं पक्षद्वयमनुसन्धेयम् । शास्त्रान्तरदानविधिस्तु प्रागुक्तस्मृतिदानेन व्याख्यातः ।

नन्दिपुराणे —

येऽपि पत्रमषीपात्रलेखनीसम्पुटादिकम् ।
दद्युः शास्त्राभियुक्ताय तेऽपि विद्याप्रदायिनाम् ॥

यान्ति लोकान् शुभान् मर्त्याः पुण्यभाजो नराधिप ।

इति श्रीकोदण्डपरशुरामेत्यादिविविधबिरुदावलीविराजमानोन्नतमहाराजाधिराजश्रीशक्तिसिंहात्मजश्रीमहाराजाधिराजश्रीमदनसिंहदेवविरचितेमदनरत्नप्रदीपे दानविवेकोद्द्योते अतिदानप्रकरणम् ।

इति अतिदानप्रकरणम् ।

———(:o.)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ त्रिमूर्तिदानम्

तत्र ब्रह्मविष्णुरुद्रदानम् —

ब्रह्माण्डपुराणे —

शौनकादिभिः पृष्टेन रोमहर्षणेन 'शृण्वन्तु मुनयः सर्वे' [1]इत्याद्युक्तिं प्रक्रम्योक्तम् —

त्रिमूर्तिदानं दानानामुत्तमोत्तममुच्यते ।
विषुवत्ययने वापि चन्द्रसूर्यग्रहेषु च ॥

नित्यं वा पञ्चदश्यां च जन्मर्क्षेषु समारभेत् ।
देवालये नदीतीरे पुण्येष्वायतनेषु च ॥

गृहे वा कारयेद्दानं यत्र भूमिः शुचिर्भवेत् ।
चतुरस्रां समां भूमिं गोमयेनोपलेपयेत् ॥

तत्राक्षताभिर्विकिरेत्[2] पुष्पाञ्जलिं समन्ततः ।
एकहस्ता द्विहस्ता वा त्रिगुणा दैर्घ्यतः स्मृता ॥

त्रिवेदिका भवेत्तिर्यक् श्वेततण्डुलमिश्रिता ।

ब्रह्माथ विष्णुर्भगवान् पुरारि —
हिरण्मयास्तत्र निवेशनीयाः ।
चतुर्भुजाः सायुधभूषणाढ्याः
किरीटिनश्चापि यथाक्रमेण ॥

---

1. इत्याद्युक्त D. 2. भ्युष्पाञ्जलिं D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एतत्प्रतिमालक्षणमुक्तं ब्रह्माण्डदाने ।

स्नानार्घ्यपाद्याचमनीयवस्त्रै –
गन्धादिभिस्तानभिपूज्य भक्त्या ।
प्रदक्षिणीकृत्य सपुष्पहस्तः
प्रणम्य चोद्वास्य ततः प्रदद्यात् ॥

प्रत्येकमेवं बहुमानपूर्वं
सम्पूज्य दातव्यमनुक्रमेण ।
त्वया जगत्सृष्टिकरात्तमेतत् –
त्वमेव सर्वस्य पितामहोऽसि ॥

त्वमेव कर्ता जगतां विहर्ता
त्वमेव धाता जगतां विधाता ।
त्वत्सम्प्रदानादनघो यथाऽहं
त्वया च सायुज्यमुपैमि देव ॥

तथा कुरु त्वं शरणं प्रपन्ने
मयि प्रभो देववर प्रसीद ।
त्वया जगद् व्याप्तमिदं समस्तं
त्वां विष्णुमेव प्रवदन्ति सन्तः ॥

त्वत्स्थानि सर्वाणि वदन्ति देव
त्वया धृतं विश्वमनन्तमूर्ते ।
त्वत्सम्प्रदानादनघो भवामि
यथा जगत्कारणकारणेश ॥

तथा कुरु त्वं शरणं प्रपन्ने
मयि प्रभो देववर प्रसीद ।
त्वयामराणाममृतं विहाय
हालाहलं संहृतमेव यस्मात् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तथाऽसुराणां त्रिपुरं च दग्धम् —
एकेषुणा लोकहितार्थमीश।
त्वद्रूपदानादहमप्यशेषैर् –
दोषैर्विमुक्तो[1] हि यथा भवेयम् ॥

तथा कुरु त्वं शरणं प्रपन्ने
मयि प्रभो देववर प्रसीद।
इत्येवमुक्त्वा विधिवद्ददाति
स याति सायुज्यमथ त्रिमूर्तेः ॥

यः कारयेद्विप्रवराय तस्मै
सुवर्णसंख्यागणितं हिरण्यम्।
दद्याच्च वासोयुगमादरेण
तथा कृतेऽयं लभते फलं तत् ॥

इति त्रिमूर्तिदानम्।



1. विमुक्तांस्तु गुणान् प्रपद्ये दा.खं. 732.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ त्रिपुरुषदानम्

मृत्युञ्जये —

सुवर्णरक्तिकानां तु शतेनैकेन शक्तितः ।
कार्यो ब्रह्माऽथ विष्णुश्च शङ्करश्च तथैव च ॥

पलद्वादशमानेन पीठं लोहेन कारयेत् ।
देवानां स्थापनार्थाय चक्रवत्परि[1]मण्डलम् ॥

तत्र ब्रह्मादयः स्थाप्या यमदूतं पुरो न्यसेत् ।
चतुर्मुखश्चतुर्बाहुः पद्महस्तः पितामहः ॥

शङ्करो द्विभुजः शूली वृषारूढस्त्रिलोचनः ।
विष्णुश्चतुर्भुजश्चक्री गदी गरुडवाहनः ॥

यमदूतः पाशपाणिर्दण्डवान् विकृताननः ।
स तु लोहमयः कार्यो [2]भीरुर्बद्ध इवाग्रतः ॥

ततो विधाय देवानां पूजां पुष्पफलादिभिः ।
यजमानः करे खड्गं गृहीत्वा निशितं नवम् ॥

इदं शिरश्छिनद्मीति दूतस्यास्य दुरात्मनः ।
इत्युच्चार्य शिरश्छिन्द्याद् दूतस्य यमदिङ्मुखः ॥

ततश्चतुर्भिर्विप्रैस्तु कार्यं ब्राह्मणवाचनम् ।
ततो ब्रह्मादिदेवानां दानं कुर्यात् प्रयत्नतः ॥

---

1. मण्डलं D. 2. भितो दा.खं. 133.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देवालये गृहे वापि तीर्थे वान्यत्र कुत्रचित् ।
ब्राह्मणाय च तां दद्यादव्यङ्गाय सुशीलिने ॥

सुवर्णदक्षिणायुक्तान् ब्रह्मादीननुपूर्वशः ।
अपमृत्यु[1]भयत्रस्तो यो दद्याद् देवतान्नयम् ॥

तस्य मृत्युर्विनश्येत दानादस्मान्न संशयः ।
मृत्युना [2]ग्रस्यमानोऽपि जीवत्येव नरः स्फुटम् ॥

चामीकरप्रतिकृतित्रितयं विधाय
ब्रह्मादिदानमिह यः पुरुषः करोति ।
रोगान्निरस्य सकलानपि दुर्निवारान्
नैवापमृत्युभयमेति नरः कदापि ॥

इति त्रिपुरुषदानम्

(:०:)

1. अपमृत्यु भयात् भस्तः दा.खं 734. 2. गृह्यमाणो दा. खं. 734.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ नवग्रहदानम्

ब्रह्माण्डपुराणे — ब्रह्मा उवाच —

ग्रहदानक्रमं[1] वक्ष्ये सर्वसिद्धिकरं परम् ।
सर्वशान्तिकरं नृणां सर्वपापप्रणाशनम् ॥

विषुवत्ययने राहुग्रहणे शशिसूर्ययोः ।
जन्मर्क्षे सौरवारे वा पञ्चदश्यां तथैव च ॥

पुण्यकालेषु सर्वेषु पुण्यदेशे विशेषतः ।
ग्रहदानं तु कर्तव्यं नित्यं श्रेयोभिकाङ्क्षिणा ॥

हस्तमात्रं द्विहस्तं वा त्रिहस्तं वाथ [1]नारद ।
चतुरस्रां समां भूमिं गोमयेनोपलेपयेत् ॥

रेखाः प्राच्य उदीच्यश्च स्युश्चतस्रस्तथा समाः ।
नवकोष्ठेषु पद्मानि विन्यसेच् श्वेततण्डुलैः ॥

आदित्यश्चन्द्रमा भौमो [2]बुधो जीवः सितोऽर्कजः ।
राहुः केतुरिति प्रोक्ता [3]ग्रहा लोकसुखावहाः ॥

एषां हिरण्यरूपाणि कारयित्वा यथाविधि ।
त्रिनिष्केणाथ वा कुर्याद्यथाशक्त्या पृथक् पृथक् ॥

हिरण्यरूपाणि हिरण्यप्रतिमाः । तल्लक्षणान्यत्रैवाग्रे वक्ष्यन्ते ।

---

1. मथो दा.खं. P. 747. 2. बुधजीवः D. 3. ग्रहलोक D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आदित्यं मध्यमे कोष्ठे दक्षिणेऽङ्गारकं न्यसेत् ।
उत्तरे तु गुरुं विद्याद् बुधमुत्तरपूर्वके ॥

भार्गवं पूर्वतो न्यस्य सोमं दक्षिणपूर्वके ।
पश्चिमेऽर्कसुतं न्यस्य राहुं दक्षिणपश्चिमे ॥

पश्चिमोत्तरतः केतुं सन्निवेश्य यथाविधि ।
तद्वर्णपुष्पगन्धाद्यैरर्चयेत् स्वस्वमन्त्रकैः ॥

दानं शूद्रोऽथवा कुर्यात् स्त्री वा तत्र तु नारद ।
भूलेपनादि यत् कार्यं सर्वं विप्रेण [1]कारयेत् ॥

स्नानकाले तु सम्प्राप्ते स्नात्वा कुशतिलोदकैः ।
प्रयतो यजमानस्तु धौतवस्त्रः प्रसन्नधीः ॥

अर्चयित्वा स्वयं दद्यादहस्करमुखान् ग्रहान् ।
प्रत्येकमेकं विप्रोऽसौ स्ववर्णं[2] मन्त्रमीरयेत् ॥

पद्मासनः पद्मकरो द्विबाहुः
पद्मद्युतिः सप्ततुरङ्गवाहः ।
दिवाकरो लोकगुरुः किरीटी
मयि प्रसादं विदधातु देवः ॥

रक्ताम्बरो रक्तवपुः किरीटी
चतुर्भुजो मेषगमो गदाभृत् ।
धरासुतः शक्तिधरश्च शूली
सदा मम स्याद् वरदः प्रशान्तः ॥

पीताम्बरः पीतवपुः किरीटी
चतुर्भुजो देवगुरुः प्रशान्तः ।

---

1. कारयेत्मस्नानकाले ... D. 2. स्वस्वमन्त्रमुदीरयेत् दा.खं. 748.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दधाति दण्डं च कमण्डलुं च
तथाक्षसूत्रं च वरदोऽस्तु मह्यम् ॥

श्वेताम्बरः श्वेतवपुः किरीटी
चतुर्भुजो दैत्यगुरुः प्रशान्तः ।
तथाऽक्षसूत्रं च कमण्डलुं च
दण्डं च बिभ्रद्वरदोऽस्तु मह्यम् ॥

नीलद्युतिः शूलधरः किरीटी
गृध्रस्थितस्त्रास[1]करो धनुष्मान् ।
चतुर्भुजः सूर्यसुतः प्रशान्तः
[2]स चास्तु मह्यं वरमन्दगामी ॥

नीलाम्बरो नीलवपुः किरीटी
करालवक्त्रः करवालशूली ।
चतुर्भुजश्चर्मधरश्च राहुः
सिंहासनस्थो वरदोऽस्तु मह्यम् ॥

धूम्रो द्विबाहुर्वरदो गदाभृत्
गृध्रासनस्थो विकृताननश्च ।
किरीटकेयूरविभूषिताङ्गः
सदाऽस्तु मे केतुगणः प्रशान्तः ॥

इत्युक्त्वा दापयेत् सर्वानादित्यादीन् नवग्रहान् ।
पुरुषो वाऽथवा नारी यथोक्तं फलमाप्नुयात् ॥

मध्यमं गुरवे दद्यादन्यस्मै वा प्रदापयेत् ।
गुरुरत्र पूजादिकर्ता ।
अथवा दक्षिणा देया सुवर्णं वाससी शुभे ॥

---

1. त्राणकरो दा.ख. 748. 2. वरप्रदो मेऽस्तु स मन्दगामी दा.ख. 748.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इत्याह भगवान् ब्रह्मा नारदाय महात्मने ।
तथाऽहमब्रवं दानं युष्माकं मुनिसत्तमाः ॥

इति नवग्रहदानम् ।

———(:०:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ दशावतारदानम्

दानानामुत्तमं दानं हैमं विष्णोः स्वरूपकम् ।
तस्मात् पुण्यार्थिना देयं[1] हैमं विष्णोः स्वरूपकम् ॥

मत्स्यः कूर्मो वराहश्च नारसिंहोऽथ वामनः ।
रामो रामश्च कृष्णश्च बुद्धः कल्की च ते दश ॥

वामे शङ्खं गदां दक्षे बिभ्रद्वै मत्स्यरूपधृक् ।
नराङ्घ्रिर्मत्स्यरूपी वा मत्स्यरूपी जनार्दनः ॥

मत्स्यपदस्थाने कूर्मपदप्रक्षेपेणतदेव कूर्मलक्षणम् ।

(वामे शङ्खं गदां दक्षे बिभ्रद्व कूर्मरूपधृक् ।
नराङ्घ्रिः कूर्मरूपी वा कूर्मरूपी जनार्दनः ॥)

सर्वेषामेतेषां लक्षणान्युक्तानि विश्वचक्रमहादाने ।

यथाशक्त्या प्रकुर्वीत सुवर्णेन विजानता ।
समाषषोडशेनैव समान्येतानि कारयेत् ॥

वित्तानुरूपतो राजन् तुल्यमाढ्य[3]दरिद्रयोः ।
सम्पूज्य नामभिस्तैस्तु पुष्पधूपनिवेदनैः ॥

भक्तिनम्रः [4]प्रणामार्थं निवेद्य श्रद्धया ततः ।
आहूय ब्राह्मणान् राजन् पादौ प्रक्षाल्य यत्नतः ॥

---

1. देया हैमी विष्णोः स्वरूपिका दा. खं. 750. 2. विश्वचक्रमहादाने E.
3. °माप्त° A. 4. प्रणम्यार्थं दा. खं. 752.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उपवेश्यासने सर्वांश्चन्दनेनानुलेपयेत् ।
सुगन्धकुसुमैश्चैव धूपदीपैस्तथैव च ॥

आच्छाद्य वस्त्रयुग्मैस्तु ग्रहणे चन्द्रसूर्ययोः ।
अयने विषुवे वापि द्वादश्यां तु विशेषतः ॥

उपोष्यैकादशीं कार्यं धर्मकार्यं च सर्वशः ।
अन्यथा नरकं यातीत्येवमाह[1] पितामहः ॥

प्राह्कान् विष्णुरूपांस्तानर्चयेत[2] विमत्सरः ।
एकैकं देवरूपं तमेकैकस्मै समर्पयेत् ॥

अथवा विदुषः सर्वान् दद्यात् सम्पूज्य मानवः ।
नाव्रतेऽपि कदाचिच्च दद्यात् पाखण्डिने तथा ॥

देवरूपं मया विप्र कारितं काञ्चनं शुभम् ।
तद् गृहाण प्रसादेन प्रीयतां विश्वरूपधृक् ॥

एतदुच्चार्य विप्रेभ्यो हस्ते तोयं क्षिपेत् स्वयम् ।
प्रदक्षिणं ततो यायात् सम्पूज्य प्रविशेद् गृहम् ॥

अस्य दानस्य माहात्म्यं वदाम्येकमुखः कथम् ।
सहस्रास्यः शतास्यो वा यदि शक्तोऽभिभाषितुम् ॥

उद्देशतः प्रवक्ष्यामि भक्तानां भक्तिवृद्धये ।

दशावतारदो राजन् विष्णोरैक्यं च गच्छति ।
[4]क्षरिक्षीरात् यथा क्षिप्रं पयः संहरतेऽनलः ॥

---

1. माहुः D. 2. तेमेकैकस्य D. A. 3. ग्राहयीत दा. खं. ७५२. 4. क्षरिक्षीरं A. (क्षरं=जलम्, तद्युक्तं=क्षरि, क्षरि च तत् क्षीरं च= क्षरिक्षीरम्, तस्मात्=क्षरिक्षीरात्).

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तथा विष्णोः स्वरूपत्वं नरो याति न संशयः ।
ब्रह्महा च सुरापश्च तस्करो गुरुतल्पगः ॥

यथा मुञ्जादिषीकान्तस्तथा पापात् प्रमुच्यते ।
सहस्रं [1]च स जन्तूनामुद्धरेत् स इदं जगत् ॥

तस्मात् प्रयच्छ राजेन्द्र विप्रेभ्यो विष्णुरूपकान् ।
येन सर्वस्य दानस्य फलं प्राप्नोति सत्वरम् ॥

न तत्तपोभिरत्युग्रैर्विविधैः[2] प्राप्नुयात् फलम् ।
विष्णोर्दशावताराणां दानेन यदवाप्यते ॥

यः काञ्चनेन शुभलक्षणलक्षिताङ्गं
विष्णोः स्वरूपदशकं विधिवद्विधाय ।
दद्यात् समस्तजगदेव[3] हि तेन दत्तं
यस्माज्जगन्मयवपुर्विभुरेष देवः ॥

इति दशावतारदानानि ।

———(:o:)———

1. चैव दा. खं. ७५३. 2. विहितैः दा. खं. ७५३. 3. द्विजेषु दा. खं. ७५३.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ द्वादशादित्यदानम्

ब्रह्माण्डपुराणे —

श्रृणु नारद भद्रं ते दानमादित्यसंज्ञितम् ।
यथोक्तं लोकगुरुणा विष्णुना प्रभविष्णुना ॥

कर्तुः पापहरं पुण्यमायुष्यं श्रीकरं शुभम् ।
आरोग्यं सर्वमाङ्गल्यं[1] दुःस्वप्नाद्भुतनाशनम् ॥

सर्वशान्तिकरं ह्येतत् सर्वसिद्धिफलप्रदम् ।
चक्षुष्यं[2] सर्वरोगघ्नं भुक्तिमुक्तिफलप्रदम् ॥

विषुवत्ययने राहुग्रहणे चन्द्रसूर्ययोः ।
जन्मर्क्षे सौरवारे वा पञ्चदश्यर्कसङ्क्रमे ॥

सौरवारे सूर्यसम्बन्धिनि वारे ।

सप्तम्यां वाऽथ नक्षत्रे सावित्रेऽद्भुतदर्शने ।
दुःस्वप्नदर्शने कुर्याद्दानमादित्यसंज्ञितम् ॥

देवालये नदीतीरे तडागे वरुणालये ।
अन्येषु पुण्यदेशेषु देवदानक्रमाचरेत् ॥

---

1. °मङ्गल्यं A. 2. चक्षुष्यं सर्वपापघ्नं दा. खं. ७५७.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आलिप्य वै द्वादशहस्तदैर्घ्यां
क्षितिं तथा गोमयसंयुताद्भिः[1] ।
तस्मिन् सितैस्तण्डुलपुंजकैश्च
विस्तारयेद् द्वादशपङ्कजानि ॥

प्रादेशमात्राणि शुभानि तानि
सकर्णिकान्यष्टदलेषु तेषु ।
हिरण्यरूपाणि रवेर्विधाय[3]
यथाक्रमादुत्तरतोपवर्गः ॥

प्रत्यङ्मुखान् प्राङ्मुख एव देवान्
तद्वर्णगन्धादिभिरर्चयित्वा ।
दद्यादपूपं सघृतं गुडाढ्यं
वस्त्रैरथावेष्ट्य यथाक्रमेण ॥

प्रत्येकमेकं द्विजपुङ्गवाना —
माराध्य गन्धादिभिरादरेण ।
सम्प्रीयतामित्यथ च क्रमेण
प्रत्येकमुच्चार्य तदीयनाम ॥

धाता च मित्रश्च ततः क्रमेण
मार्तण्डनामा च तथार्यमा च ।
शक्रश्च देवो वरुणस्तथाऽसौ
भगो विवस्वान् वसवस्तथैषाम् ॥

आदित्यनामा सविता तथान्यः
त्वष्टा तथैकादशश्च तेषाम् ।
विष्णुस्तथा द्वादशश्च स्वमन्त्रै –
राराधयेद्देववरान् द्विजांश्च ॥

---

1. संयुताभिः A. 2. युंजकै D. 3. निर्धोय दा. खं. ७५९.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पुरा देव[1]ऋषेर्दानं प्रोक्तं कमलयोनिना ।
तथा मयापि युष्माकं प्रोक्तं मुनिवरोत्तमाः ॥

द्वादशादित्यप्रतिमालक्षणं ब्रह्माण्डदाने प्रागुक्तं द्रष्टव्यम् ॥

इति द्वादशादित्यदानम् ।

———(:o:)———

1. देवर्षये दा. खं. ७५७.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ अथ चन्द्रादित्यदानम् ॥

विष्णुधर्मोत्तरे — भगवानुवाच —

अतः परं प्रवक्ष्यामि दानं राजन् नराधिप ।
यद् दत्त्वा तु बली राजा शक्रराज्यम[1]वाप ह ॥

शक्रश्च बलिराज्यं तु दत्त्वा पुनरवाप ह ।
चन्द्रसूर्योपरागेषु अयने विषुवे तथा ॥

चन्द्रक्षये च द्वादश्यां वैशाख्यां पुत्रजन्मनि ।
कार्तिक्यां च महामाघ्यां सप्तम्यां जयायां[2] तथा ॥

चन्द्रादित्यौ तु दातव्यौ सूर्यः सौवर्ण उच्यते ।
शुद्धस्य रजतस्यैव मण्डलं हिमरोचिषः ॥

द्वादशाङ्गुलवृत्तं तु उभयोरपि मण्डलम् ।
वृत्तौ पद्मसमाकारौ मध्ये चैव तु कर्णिकाम् ॥

भानुं ताम्रमये पात्रे घृतपूर्णे तु निक्षिपेत् ।
सोमं शङ्खे क्षीरपूर्णे उपरि स्थापयेद् बुधः ॥

सूर्यं तु रक्तकुसुमैः सोमं शुक्लैस्तथैव च ।
आदित्याय सुगन्धि च धूपं चैव प्रदापयेत् ॥

सोमस्य गुग्गुलुर्दद्यो गन्धः शुक्लस्तथैव च ।
कुङ्कुमं तु पतङ्गाय दीपं चैव घृतेन तु ॥

---

1. अपाहरद् E. 2. जयया A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं सम्पूज्य यत्नेन चन्द्रादित्यौ पृथक्कृतौ ।
अमृतमूर्तये सोमं नमोऽन्तेनैव पूजयेत् ॥

स्व [1]स्वोल्कायेति वै सूर्यं नमोऽन्तेन पुनः पुनः ।
आहूय ब्राह्मणं भक्त्या वेदवेदाङ्गपारगम् ॥

कुटुम्बिनं दरिद्रं वा आहिताग्निं तथैव च ।
रक्तेन वाससाच्छाद्य कुङ्कुमेनानुलेपयेत् ॥

सम्पूज्य पुष्पधूपैश्च द्विजं सूर्यमिवापरम् ।
रविं च चन्द्रबिम्बं च घृतस्थं तु निरीक्ष्य वै ॥

समर्पयेद् ब्राह्मणाय मन्त्रेणानेन भूमिप ।
रुक्मं च पुरुषं चैव पर्णं पुष्करमेव च ॥

त्रयी विद्या च साङ्गा तु यस्याङ्गं विश्वरूपिणः ।
स वै [2]दिवाकरो देवः प्रीयतां विप्र मा चिरम् ॥

एवमुच्चार्य भानुं तु ब्राह्मणाय निवेदयेत् ।

क्षीरजं देवदेवं तु द्विजराजं तथैव च ।
अमृतमूर्तिं शीतांशुं ददामि ते द्विजोत्तम ॥

गायत्र्या चैव सूर्यस्य ग्रहणं जायते विभोः ।
सोमंतरत्समन्दीयं जपन् शुद्धेन चेतसा ॥

एवं चन्द्ररविं दत्त्वा बली राज्यमवाप ह ।
सर्वं तेन तु दत्तं स्याद्यो दद्याच्चन्द्रभास्करौ ॥

---

1. खगोल्काय E. 2. चण्डकरो दा खं. ७२८.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सर्वं तेन कृतं राजन् सर्वं तेन च संस्कृतम् ।
सर्वं दक्षिणयावेष्टं संसारे तु नरोत्तमैः ॥

पूज्यते सिद्धगन्धर्वैर्ऋषिभिर्देवदानवैः ।

इति चन्द्रादित्यदानम् ।

——: o :——

1. चेष्टं E. यष्टं दा. खं. ७२८.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ कालपुरुषदानम्

भविष्योत्तरे (१.१.१) कृष्ण उवाच —

दानानि बहुरूपाणि कथितानि मया तव ।
पुनरेव प्रवक्ष्यामि यद्यस्ति तव कौतुकम् ॥

कथितानि मया तुभ्यं कथयिष्याम्यहं तथा ।
महतार्थेन सिध्यन्ति प्रयच्छन्ति महाफलम् ॥

काम्यो दानविधिः पार्थ क्रियमाणो यथातथम् ।
फलाय मुनिभिः प्रोक्तो विपरीतो भयावहः ॥

ज्ञेयं निष्कशतं पार्थ दानेषु विधिरुत्तमः ।
मध्यमस्तु तदर्धेन तदर्धेनावरः स्मृतः ॥

एवं[1] वृक्षे रथेन्द्रे च धेनोः कृष्णाजिनस्य च ।
[2]अशक्तस्यापि क्लृप्तोऽयं पंचसौवर्णिको विधिः ॥

अतोऽप्यल्पेन यो दद्यान्महादानं नरोत्तमः ।
प्रतिगृह्णाति वा तस्य दुःखशोक[3]भयावहम् ॥
(भ.पु. १२१. १. ८)

पुण्यं दिनमथासाद्य भूमिभागे समे शुभे ।
चतुर्दश्यां चतुर्थ्यां वा विष्ट्यां वा पाण्डुनन्दन ॥ भ. १८१.१४

---

1. वृक्षारथेन्द्रणां भ.पु. १८१.७. मेष्यां च कालपुरुषे तदान्येषुमहत्सु च एवं वृक्षे रथेण्डे च दा.खं. 715. 2. अशक्तः स्यापि D. 3. भयावहम् D. दुःखशोभावहं भवेत् भ. पु. १७१.८.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विष्टिर्भद्राकरम् —

पुमान् कृष्णतिलैः कार्यो रौप्यदन्तः सुवर्णदृक् ।

खड्गोद्यतकरो दीर्घो[1] जपाकुसुमकुण्डलः ।
रक्ताम्बरधरः स्रग्वी शङ्खमालाविभूषितः ॥

[2]तीक्ष्णासिपुत्रीबन्धेन विस्फारितकटीतटः ।

असिपुत्री छुरिका ।

उपानद्युगयुक्ताङ्घ्रिः[3] कृष्णकम्बलपार्श्वकः[4] ॥

गृहीतमांसपिण्डश्च वामे करतले तथा ।
[5]एवं तु पुरुषं कृत्वा गृहीतकुसुमाञ्जलिः ॥

यजमानः प्रसन्नात्मा इमं मन्त्रमुदीरयेत् ।
सम्पूज्य गन्धपुष्पाद्यैः [6]सम्पूज्य विनिवेद्य च ॥

सर्वं कलयसे यस्मात् कालस्त्वं तेन चोच्यसे[7] ।
ब्रह्मविष्णुशिवादीनां त्वमसाध्योऽसि सुव्रत ॥
पूजितस्त्वं मया भक्त्या प्रार्थितश्च यथासुखम् ।
यद्युज्यते तव विभो तत् कुरुष्व नमो नमः ॥

एवं सम्पूजयित्वा तं ब्राह्मणाय निवेदयेत् ।
ब्राह्मणं प्रथमं पूज्य वासोभिर्भूषणैस्तथा ॥

दक्षिणां शक्तितो दद्यात् प्रणिपत्य विसर्जयेत् ।

दक्षिणा पूर्वोक्ता निष्कशतादिका —

अनेन विधिना यस्तु दानमेतत् प्रयच्छति ॥

---

1. दोर्णो–भ.पु. १८१. १६. 2. तीक्ष्णासिपत्रधनुषा भ.पु. १८१. १७. 5. एवं विधं पुमान् कृत्वा D.A. एवं विधं नरं कृत्वा भ.पु. 3. °युक्तो हि भ.पु. १८१. १७. 7. भण्यसे भ.पु. १८१. २१. 4. °पार्श्वगः दा. ख. 6. नैवेद्यं दा.खं. ७१६.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नापमृत्युभयं तस्य न च व्याधिकृतं भवेत् ।
भवत्यव्याहतैश्वर्यः सर्वबाधाविवर्जितः ॥

देहान्ते सूर्यभवनं भित्त्वा याति परं पदम् ।
पुण्यक्षयादिहाभ्येत्य राजा भवति धार्मिकः ॥

[1]सत्रयाजी श्रिया युक्तः पुत्रपौत्रसमन्वितः ॥
सम्पूज्य कालपुरुषं विधिवद् द्विजाय
दत्त्वा शुभाशुभफलोदयहेतुभूतम्[2] ।
रोगातुरे[3] सकलदोषमयेऽत्र देहे
देही न मोहमुपगच्छति तत्प्रभावात् ॥

(भ.पु. १८१.१४-१७)

इति कालपुरुषदानम्

———(:o:)———

1. संतत्या च भ. पु. १८१. २६. 2. °हेतुभूतक भ. पु. १८१. २७
3. रोगान्तरे 717. रश्मि माभ्यन्तर D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ कालचक्रदानम्

मृत्युञ्जये —

चक्रं रूप्यमयं कृत्वा मुक्तारश्मिमयात्मकम् ।
कृत्वा मूर्ध्नि शरच्चन्द्रं [1]रश्मिमध्यान्तरस्थितम् ॥

[2]तमांस्यनेकरूपाणि गात्रेषु च समन्ततः ।
एवं ध्यानवतस्तस्य स चन्द्रः कृष्णतां व्रजेत् ॥

ततोप्यनन्तरं पश्चात् स्थित्वा विप्रः प्रदक्षिणम् ।
तं गृहीत्वा व्रजेद् दूर[3]मदृष्टत्वमपि व्रजेत् ॥

स्वयं वामृतसंघातपूर्णकाय इति स्थितः ।
कालचक्रमिदं नाम दानं मृत्युविनाशनम् ॥

इमं ते राजतं चन्द्रं रश्मिजालसमाकुलम् ।
अपमृत्यु[4]विनाशाय ददामीति समुच्चरेत् ॥

सुवर्णदक्षिणायुक्तं ब्राह्मणाय निवेदयेत् ।
एवं कृते विनश्येत अपमृत्युर्न संशयः ॥

तस्मादेतत् सदा देयमपमृत्युभयान्वितैः ।
ज्वरादिरोगग्रस्तैर्वा महापत्पतितैरपि ॥

---

1. रोगान्तरे भ.पु. रश्मिमाभ्यन्तर D. 2. त्वग्मांसानि तु रौप्याणि-दा. खं. 717. 3. मदृश्यत्वमपि-E. 4. विनाशाये त्येवमदि E.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ततो गृह्योक्तविधिना स्थापयेज्जातवेदसम् ।
जुहुयात् कालनाम्ना तु शतमष्टोत्तरं तिलैः ॥

ततस्तु भोजयेद्भक्त्या विप्रान् द्वादशसंख्यकान् ।
स्वयमक्षारलवणं भुञ्जीत सकृदेव हि ॥

एवं कृते नरो नूनं चिरं जीवेन्न संशयः ॥

इति कालचक्रदानम् ।

———(:o:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ पापपुरुषदानम्

स्कान्दे नागरखण्डे आनर्त उवाच —

मूर्खत्वाद्वा प्रमादाद्वा कामाद्वालस्यतोऽपि वा ।
यो नरः कुरुते पापं प्रायश्चित्तं करोति न ॥

तस्य पापविशुद्ध्यर्थं किञ्चिन् मे वद सत्तम ।
येन मुक्तिर्भवेत् सद्यो यदि तुष्टोऽसि मे प्रभो ॥

भर्तृयज्ञ उवाच —

अज्ञानात् ज्ञानतो वाऽपि यत्पापं कुरुते नरः ।
पापपुरुषदानेन मुच्यते नात्र संशयः ॥

आनर्त उवाच —

विधिना केन देयोऽसौ पापपिण्डो महामुने ।
ततो विस्तरतो ब्रूहि येन यच्छाम्यहं द्रुतम् ॥

भर्तृयज्ञ उवाच —

मन्वादिदिवसे प्राप्ते यदा सूर्यदिनं भवेत् ।
तदाऽस्य मूर्तिः कर्तव्या हैमी विप्रस्य तुष्टये ॥

तुलापुरुषवत् कार्यः कुण्डमण्डपयोर्विधिः ।
परं होमः प्रकर्तव्यो गायत्र्या केवलं नृप ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संस्नाप्य [1]पञ्चगव्येन ततः स्नात्वाभिपूजयेत् ।

संस्नाप्येति प्रतिमामिति शेषः ।

पञ्चविंशतिसंख्याभिः श्वेतपुष्पैर्नराधिप ॥

ॐ पृथिव्यै नमः । जलाय नमः । तेजसे नमः । वायवे नमः । आकाशाय नमः । श्रोत्राय नमः । ॐ त्वचे नमः । चक्षुषे नमः । ॐ जिह्वायै नमः । घ्राणाय नमः । ॐ शब्दाय नमः । स्पर्शाय नमः । रूपाय नमः । रसाय नमः । गन्धाय नमः । [2]ॐ वाचे नमः । पाणिभ्यां नमः । पादाभ्यां नमः । पायवे नमः । ॐ उपस्थाय नमः । ॐ मनसे नमः । ॐ बुद्ध्यै नमः । ॐ अहङ्काराय नमः । आत्मने नमः । परमात्मने नमः ।

एवं सम्पूज्य राजेन्द्र कर्पूरं दीपमाहरेत् ॥

धूरसीति मन्त्रेण अग्निर्ज्योतिरिति दीपकम् ।
युवा सुवासेति ततो वासांसि परिधापयेत् ॥

ततो ब्राह्मणमाहूय वेदवेदाङ्गपारगम् ।
प्रक्षाल्य चरणौ तस्य वस्त्राणि परिधापयेत् ॥

केयूरैः कटकैश्चैव अङ्गुलीयकभूषणैः ।
भूषयित्वा तनुं तस्य ततो मूर्तिं समानयेत् ॥

मन्त्रेणानेन राजेन्द्र ततस्तस्य निवेदयेत् ।
एष आत्मा मया दत्तस्तव हस्ते मया द्विज ॥

यत् किञ्चिद्विहितं पूर्वं पापं मे नाशयाखिलम् ।
(इति) दानमन्त्रः ।

ततस्तु ब्राह्मणो मन्त्रमिमं राजन् समुच्चरेत् ॥

---

1. पङ्कगव्येन D. 2. ओं पवेनमः D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यदेतद्विहितं पापं त्वया पूर्वं मया हि तत् ।
गृहीतं मूर्तिरूपं ते जातस्त्वं पापवर्जितः ॥

(इति) प्रतिग्रहमन्त्रः ।

एवं दत्त्वा विधानेन ततो विप्रं विसर्जयेत् ।
एवं कृते ततस्तस्य दत्त्वाथ दक्षिणां तथा ॥

यथा तुष्टिं समभ्येति ततः पापाज्जयत्यसौ ।
तस्मिन् कृते महाराज प्रत्ययस्तत्क्षणाद् भवेत् ॥

शरीरं लघुतामेति ततो वृद्धिश्च जायते ।
स्वप्नं च वीक्षते रात्रौ सन्तुष्टो मनसास्ति वा ॥

स्त्रियः सितैर्वा वस्त्रैश्च श्वेतमाल्यानुलेपनैः ।
श्वेता गौश्च वृषोऽनड्वान् तीर्थानि विविधानि च ॥

एतत्ते सर्वमाख्यातं पापपिण्डस्य दापनम् ।
श्रवणादपि राजेन्द्र यस्य पापैः प्रमुच्यते ॥

अन्यत्रापि महादानं पापपिण्डो हरेन्नरः ।
एकजन्मकृतं पापं निजकायेन निर्मितम् ॥

शिवालये तदेवास्य सहस्रगुणितं हरेत् ।

इति पापपुरुषदानम्

———(:०:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथात्मप्रतिकृतिदानम्

भविष्योत्तरे — (१८९.१.१६)

आत्मप्रतिकृतिर्नाम यस्योक्तं कस्यचित् पुरा ।
तत्तेऽहं संप्रवक्ष्यामि दानं मानविवर्धनम् ॥

दानकालः सदा तस्य मुनिभिः परिकीर्तितः ।
पुण्यैः पुण्यदिने पार्थ प्राप्यते जीवितेऽमले ॥

[1]हेमीं प्रतिकृतिं रम्यां कारयित्वात्मनो नृप ।
अभीष्टवाहनगता मिष्टालङ्कारसंयुताम् ॥

अभीष्टलोकसहितां [2]सर्वोपस्करसंयुताम् ।

अभीष्टा लोकाः प्रियजनाः ।

[3]तत्र पट्टपटीवस्त्रैश्छादितां स्रग्विभूषिताम् ।
कुङ्कुमेनानुलिप्ताङ्गीं कर्पूरागरुवासिताम् ॥

स्त्री चेद्ददाति शयने शयितां कारयेत् स्वयम् ।
यद्यदिष्टतमं किञ्चित् तत् सर्वं पार्श्वतो न्यसेत् ॥

उपकारकरं स्त्रीणां पुरुषाणां[4] च यद्भवेत् ।
तत् सर्वं स्थापयेत् पार्श्वे स्वयं सञ्चिन्त्य चेतसि ॥

---

1. लोहजां प्रकृतिं भ.पु.पृ. ८७४. 2. सर्वोपकर D. A. 3. ततः भ.पु.पृ. ८७४. 4. स्वशरीरे भ.पु.पृ. ८७४.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एतत् सर्वं स्थापयित्वा स्वे स्वे स्थाने नियोजयेत् ।
पूजयित्वा लोकपालान् ग्रहान् देवीं विनायकम् ॥

देवीं दुर्गाम् ।

ततः शुक्लाम्बरः स्नात्वा गृहीत[1]कुसुमाञ्जलिः ।
इममुच्चारयेन्मन्त्रं विप्रस्य पुरतः स्थितः ॥

आत्मनः प्रतिमा चेयं सर्वोपकरणैर्युता ।
सर्वरत्नसमायुक्ता तव विप्र निवेदिता ॥

आत्मा शम्भुः शिवः शौरिः शक्रः [2]शिवगणैर्युतः ।
तस्मादात्मप्रदानेन मम चात्मा प्रसीदतु ॥

[3]इत्युच्चार्य ततो दद्याद् ब्राह्मणाय युधिष्ठिर ।
ब्राह्मणश्चाथ गृह्णानः कोऽदादिति च कीर्तयेत् ॥

ततः प्रदक्षिणीकृत्य प्रणिपत्य विसर्जयेत् ।
विधिनानेन राजेन्द्र दानमेतत् प्रयच्छति ॥

यः पुमानथ वा नारी शृणु यत् फलमाप्नुयात् ।
साग्रं वर्षशतं दिव्यं [4]स्वर्गलोकैः सुरैर्वृतः ॥

अभीष्टफलदानेन सोऽभीष्टफलभाग् भवेत् ।
यत्रैवोत्पद्यते जन्तुः प्राप्तकर्मक्षयः क्षणे ॥

तत्रैव सर्वकामानां फलभाक् स भवेन्नृप ।
इष्टबन्धुजनैः सार्धं न वियोगं कथञ्चन ।
प्राप्नोति पुरुषो राजन् स्वर्गं चानन्त्यमश्नुते ॥

---

1. कुसुमाञ्जलिः D. 2. सुरगणैः भ.पु.पृ. ८७४. 3. इत्युधार्य D.
4. सर्वलोके D. 5. प्राप्ते कर्मक्षये पुनः भ.पु.पृ. ८७४.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यश्चात्मनः प्रतिकृतिं वरवाहनस्थां
हैमीं विधाय धनधान्यसमाकुलां च ।
सोपस्करां द्विजवराय ददाति भक्त्या
चन्द्रार्कवद्दिवि विभाति स राजराजः ॥

इत्यात्मप्रतिकृतिदानम्



CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथोदकुम्भदानम्

शौनकीये मार्कण्डेयं प्रति नारदवचनम्—

मार्कण्डेय शृणुष्वेदं ब्रह्मविष्णवोः पुरानव ॥

यदाह भगवान् शम्भुर्द्वयोः पृष्टस्तयोस्तदा ।
श्रूयतामुदकुम्भाख्यं दानं वक्ष्यामि सुव्रत ॥

यत् कृत्वा पुरुषः स्त्री वा न याति [1]नरकं क्वचित् ।
[2]स्वर्ग्यं यशस्यमायुष्यमारोग्यं पापनाशनम् ॥

मम प्रीतिकरं पुण्यं युवयोश्च प्रियं तथा ।
वैशाख्यां पौर्णमास्यां च कार्तिक्यामथ तद्दिने ॥

स्वजन्मदिवसे कार्यं दुःस्वप्नाद्भुतदर्शने ।
भूमौ गोमयलिप्तायामुदकुम्भं न्यसेद् बुधः ॥

पुष्पैः फलैश्च संवेष्ट्य वस्त्रेण सित[3]रूपिणम् ।
विधानेन तिलैर्मिश्रं गुडं प्रक्षिप्य तत्र वै ॥

धर्मराजं न्यसेद् देवं सौवर्णं शक्तितः कृतम् ।
सुमुखं द्विभुजं देवमासीनं दण्डहस्तकम् ॥

वरदं कृपयायुक्तं भक्तानां हितकारकम्[4] ।
एवं सप्तघटान् कृत्वा गन्धादिभिरथार्चयेत् ॥

---

1. मरकं D. 2. स्वर्यायाशस्य D; A. 3. रूप्येणं D. 4. हितकारिणम् दा.खं. ७२०.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विप्रेभ्यो दापयेत् कुम्भानितिमन्त्रैर्यथाक्रमम् ।
यमाय धर्मराजाय मृत्यवे चान्तकाय च ॥

वैवस्वताय कालाय सर्वभूतक्षयाय च ।
एवमाराध्य तान् कुम्भान् दद्यादुदकपूर्वकम् ॥

प्रीयतां भगवान् मेऽद्य मन्त्रानेतानुदीरयेत् ।
एवं कुम्भप्रदानेन देवदेवः [1]प्रतुष्यति ॥

कर्ता कारयिता स्वर्गं संप्राप्नोति न संशयः ।
न याति नरकं घोरं न प्राप्योत्यशुभं क्वचित् ॥

यमस्वरूपी भगवान् प्रीतो भवति तस्य वै ।
यः कुम्भदानं विप्रेभ्यो ददाति च यथाविधि ॥

स गच्छेत् स्वर्गलोकं तु नात्र कार्या विचारणा ॥

इति उदकुम्भदानम् ।

———(०)———

1. प्रदुष्यति दा.खं. ७२० A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ यमप्रतिमादानम्

मृत्युञ्जये —

लोहपात्रे[1] स्थितं कांस्यं तत्र पद्मं तु राजतम् ।
तस्मिन् कालेश्वरः स्वर्णः[2] पुरुषाकारतां गतः ॥

कांस्यं कांस्यपात्रम् । स्वर्णः स्वर्णमयः । तत्प्रतिमालक्षणमुक्तं ब्रह्माण्डदाने ।

वस्त्रालङ्कारसंयुक्तो भयदास्त्राणि सर्वतः ।
त्रिलोहाकारपुरुषैः कालदूतैश्च पार्श्वतः ॥

भयदास्त्राणि खड्गच्छुरिकादीनि सर्वतः कार्याणीति शेषः । त्रिलोहाकारेति ताम्रकांस्यपित्तलाख्यलोहत्रयाकारपुरुषैः कालदूतैस्त्रिभिर्दण्डहस्तैर्वृत इत्यर्थः ।

कृत्वा च महिषे पृष्ठे तं दद्याद्यममालपन् ।

यममालपन्निति महिषोपरिस्थितलोहपात्रमध्यस्थकांस्यनिविष्टराजतपद्मारूढां परितोभयदास्त्रांत्रिलोहमयदण्डहस्तकालदूतैर्वेष्टितामिमां सौवर्णीयप्रतिमां तुभ्यमित्यादिप्रयोगपूर्वकं दद्यादित्यर्थः ।

अष्टम्यां च चतुर्दश्यां करोति विधिना तु यः ॥

स मुच्यते ध्रुव नाशाद्दत्वा [3]घृतघटोत्तरम् ।

घृतघटोत्तरं घृतघट उत्तरो दक्षिणास्थानीयो यस्येति दानविवेके । अन्यत्र तु घृतकुम्भस्योपकरणत्वेनान्वयात् सुवर्णं दक्षिणेत्युक्तम् ॥

इति यमप्रतिमादानम् ।

---

1. लोहपात्रस्थित दा.खं. 718. 2. स्वर्णः दा.खं. 718. 3. घृतघतघटोत्तरम् । D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ [1]लोकपालाष्टकदानम्

ब्रह्माण्डपुराणे —

श्रृणु नारद भद्रं ते सदा सर्वाघनाशनम् ।
सर्वमङ्गलमायुष्यमारोग्यं श्रीकरं शुभम् ॥

दानानामुत्तमं ह्येतत् सर्वसिद्धिकरं [2]परम् ।
करोति दानं नारी वा सायुज्यं ब्रह्मणो व्रजेत् ॥

विषुवत्ययने राहुग्रहणे चन्द्रसूर्ययोः ।
अन्येषु पुण्यकालेषु जन्मर्क्षेषु विशेषतः ॥

देवालये नदीतीरे गृहे वा दानमाचरेत् ।
पुण्यदेशेषु सर्वेषु पुराणोक्तेषु नारद ॥

चतुरस्रां [3]समां भूमिं लिप्तां गोमयवारिणा ।
षट्करं वाष्टहस्तं वा दश द्वादश वा करान् ॥

प्राच्य उदीच्यश्च कर्तव्या रेखाश्चतसृकाः स्मृताः ।
नवकोष्ठानि तत्र स्युः श्वेततण्डुलपुञ्जकैः ॥

सितैरष्टदलैर्युक्तान् [4]कमलान् विलिखेच्छुभान् ।
जातरूपमयं देवं जगत्कर्तारमव्ययम् ॥

तेषां मध्यमकोष्ठे तु कमलस्थं निवेशयेत् ॥

---

1. लोकपालतृकदानमृ D. 2. om A. 3. सनां D. 4. कमलान्विसेछु-भानन् D. A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इन्द्रमग्निं यमं चैव निर्ऋतिं वरुणं तथा ।
[1]वायुं सोमं तथेशानं प्रागादिषु यथाक्रमम् ॥

जातरूपमयान् देवानष्टौ स्वायुधसंयुतान् ।
त्रिपलार्वाक्सुवर्णासु यथाशक्ति विनिर्मितान् ॥

ब्रह्मणोऽभिमुखान् सर्वान् सर्वेषु विनिवेशयेत् ।

जातरूपमयं स्वर्णमयम् । [3]कमलस्थ ब्रह्माणम् ।
ब्रह्मलोकपालप्रतिमालक्षणं ब्रह्माण्डदाने द्रष्टव्यम् ।

प्रत्येकं वाससाऽवेष्ट्य संप्रोक्ष्य कुशवारिणा ॥

योऽसौ कारयिता विप्रस्त्वेवमेतत् समाचरेत् ।
दानकाले तु सम्प्राप्ते दाता स्नात्वा कुशोदकैः ॥

प्रसन्नचित्तवदनः परमेष्ठिपुरोगमान् ॥

स्वनाममन्त्रैरभितो नमोऽन्तै —
राराध्य गन्धादिभिरादरेण ।
विप्रांस्तथाऽभ्यर्च्य यथाक्रमेण
[4]संप्रीयतां मेऽयमितीदमुक्त्वा ॥

योऽसौ कारयिता विप्रस्तस्मै दद्याच्च दक्षिणाम् ।
सुवर्णसंख्यागणितं हिरण्यं चैव वाससी ॥

प्रोक्तं देवऋषेर्दानं लोकपालाह्वयं मया ।
किमन्यच्छ्रोतुमिच्छा ते तदिदं वद साम्प्रतम् ॥
इति लोकपालाष्टकदानम् ।

——(:o:)——

1. वायुं चा वांक्सुवर्णातु D. वायुं चार्वासुवर्णेन E. 3. जातरूपयमे D
3. कमलस्य D. 4. सम्प्रीयतामयमित्येवमुक्त्वा D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथाऽजाविकदानम्

विष्णुधर्मोत्तरे —

अजाविकं च महिषं दत्त्वा विप्राय शक्तितः ।
घृतक्षीरवहा नद्यो यत्र तत्र स मोदते ॥

अजामलङ्कृतां दत्त्वा वह्निलोके महीयते ।
तमेव लोकमाप्नोति दत्त्वाऽजं विधिवन्नरः ॥
(वि. ध. ३०६-६०)

सर्वकामानवाप्नोति ये ये चेतसि संस्थिताः ॥

इत्यजाविकदानम् ।

------(:o:)------

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इन्द्रमग्निं यमं चैव निर्ऋतिं वरुणं तथा ।
[1]वायुं सोमं तथेशानं प्रागादिषु यथाक्रमम् ॥

जातरूपमयान् देवानष्टौ स्वायुधसंयुतान् ।
त्रिपलार्वाक्सुवर्णासु यथाशक्ति विनिर्मितान् ॥

ब्रह्मणोऽभिमुखान् सर्वान् सर्वेषु विनिवेशयेत् ।

जातरूपमयं स्वर्णमयम् । [3]कमलस्थ ब्रह्माणम् ।
ब्रह्मलोकपालप्रतिमालक्षणं ब्रह्माण्डदाने द्रष्टव्यम् ।

प्रत्येकं वाससाऽवेष्ट्य संप्रोक्ष्य कुशवारिणा ॥

योऽसौ कारयिता विप्रस्त्वेवमेतत् समाचरेत् ।
दानकाले तु सम्प्राप्ते दाता स्नात्वा कुशोदकैः ॥

प्रसन्नचित्तवदनः परमेष्ठिपुरोगमान् ॥

स्वनाममन्त्रैरभितो नमोऽन्तै —
राराध्य गन्धादिभिरादरेण ।
विप्रांस्तथाऽभ्यर्च्य यथाक्रमेण
[4]संप्रीयतां मेऽयमितीदमुक्त्वा ॥

योऽसौ कारयिता विप्रस्तस्मै दद्याच्च दक्षिणाम् ।
सुवर्णसंख्यागणितं हिरण्यं चैव वाससी ॥

प्रोक्तं देवऋषेर्दानं लोकपालाह्वयं मया ।
किमन्यच्छ्रोतुमिच्छा ते तदिदं वद साम्प्रतम् ॥
इति लोकपालाष्टकदानम् ।

——(:o:)——

1. वायुं चा वाँक्सुवर्णातु D. वायुं चार्वासुवर्णेन E. 3. जातरूपयमे D
3. कमलस्य D. 4. सम्प्रीयतामयमित्येवमुक्त्वा D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथाऽजाविकदानम्

विष्णुधर्मोत्तरे —

अजाविकं च महिषं दत्त्वा विप्राय शक्तितः ।
घृतक्षीरवहा नद्यो यत्र तत्र स मोदते ॥

अजामलङ्कृतां दत्त्वा वह्निलोके महीयते ।
तमेव लोकमाप्नोति दत्त्वाऽजं विधिवन्नरः ॥
(वि. ध. ३०६-६०)

सर्वकामानवाप्नोति ये ये चेतसि संस्थिताः ॥

इत्यजाविकदानम् ।

------(:o:)------

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ मेषीदानम्

भविष्योत्तरे (१६३.१.२२) श्रीभगवानुवाच —

शृणु पार्थ परं दानं सर्वकिल्बिषनाशनम् ।
यद्दत्त्वा विविधं पापं सद्यो विलयमृच्छति ॥

सुवर्णरोमां सौवर्णीं प्रत्यक्षां[1] वा सुशोभनाम् ।
सुवर्णतिलकोपेतां सर्वालङ्कारभूषिताम् ॥

कौशेयपरिधानां च दिव्यचन्दनभूषिताम् ।
दिव्यपुष्पोपहारां तु सर्वधातुरसैर्युताम् ॥

सप्तधान्यसमायुक्तां फलपुष्पवतीं तथा ।

धातुरसधान्यानि परिभाषायामुक्तानि ।

शतेन कारयेत् तां तु सुवर्णस्य प्रयत्नतः ॥

यथाशक्त्याऽथवा कुर्याद्वित्तशाठ्य न कारयेत् ।
अयने विषुवे चैव[2] ग्रहणे शशिसूर्ययोः ॥

दुःस्वप्नदर्शने चैव जन्मर्क्षे तिथिसंक्षये ।
यदा वा जायते वित्तं चितं श्रद्धासमन्वितम् ॥
तदैव दानकालः स्याद्यतोऽनित्यं हि जीवितम् ।
दद्यात्तीर्थे गृहे वापि यत्र वा रमते मनः ॥

---

1. प्रत्यक्षं भ. पु. पृ. ८४५. 2. पुण्ये दा. खं. ६७३.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्र संस्थाप्य देवेशमुमया सह शङ्करम् ।
ब्रह्माणं सह गायत्र्या सश्रीकं श्रीधरं तथा ॥

रत्या सह तथाऽनङ्गं लोकपालान् [1]ग्रहांस्तथा ।

उमाशङ्करयोः स्वरूपमाह विश्वकर्मा —

चर्माम्बरश्चतुर्बाहुः शूलखट्वाङ्गपाशभृत् ॥

वृषाङ्कः शङ्करो गौरी वामोत्सङ्गे स्थिता भवेत् ।

ब्रह्मगायत्रीस्वरूपमुक्तं नारदेन ।

सावित्री दक्षिणे पार्श्वे गायत्री वामभागतः ॥

विलोकयन्त्यौ ब्रह्माणं साक्षसूत्रकमण्डलुम् ।

लक्ष्मीनारायणरूपं हेमहस्तिरथदाने द्रष्टव्यम् । रत्यनङ्गलक्षणं कल्पपादपदाने द्रष्टव्यम् । लोकपाललक्षणं ब्रह्माण्डदाने द्रष्टव्यम् । ग्रहरूपाणि ग्रहदानेषूक्तानि । [3]एतानि च यथाशक्ति सुवर्णघटितानि कुर्यात् । मध्ये च तिलकुम्भोपरि पूर्वोक्तप्रकारेण घटितामुक्तोपकरणैः सह स्थापयित्वा गौरीशङ्करादिभिः सह पूजयेत् ।

तां तु पूज्य विधानेन गन्धपुष्पनिवेदनैः ॥

तदग्रे कारयेद्धोमं तिलाज्येन महीतले ।

महीतले स्थण्डिले ।

अलङ्कृत्य द्विजं शान्तं वासोभिः परिपूज्य च ॥

तल्लिङ्गमन्त्रैर्होमश्च कर्तव्यो [2]ज्वलितेऽनले ।
ततस्तां तिलकुम्भस्थां लवणाभिमुखीं स्थिताम् ॥

---

1. ग्रहानदि दा.खं. ६७३. 2. ज्वलितोऽनले D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पूजयित्वा विधानेन मन्त्रमेतमुदीरयेत् ।

लवणाभिमुखीमिति प्रतिमातः पश्चिमायां दिशि लवणासादनेन तदभिमुखं सम्पद्यते ।

[1]रोमत्वङ्मांसमज्जाद्यैः सर्वोपकरणैः सदा ॥

जगतः सम्प्र[2]वृत्तासि त्वामतः प्रार्थये शिवम् ।
वाङ्मनःकायजनितं यत् किञ्चिन् मम दुष्कृतम् ॥

तत् सर्वं विलयं यातु त्वद्दाना[3]दुपसेवितम् ।
एवमुच्चार्य तां दद्याद् ब्राह्मणाय कुटुम्बिने ॥

नाभिभाषेत तां दत्त्वा तन्मुखं नावलोकयेत् ।
दुष्टप्रतिग्रहहतो विप्रो भवति पातकी ॥

नोर्णायुर्दक्षिणाहीना दातव्या नाविधानतः ।
दक्षिणविधिना हीना दुःखशोकभ[5]यावहा ॥

पुरा दत्तमिदं दानं गौर्या दक्षगृहस्थया ।
तेन शम्भुः पतिर्लब्धः सर्वदेवनमस्कृतः ॥

इन्द्राण्या स्वर्णरोमाणां शतं दत्तं विधानतः ।
[5]पतिः सर्वपतिर्लब्धः साऽद्यापि दिवि मोदते ॥

नलेन दत्तमेतद्धि राज्यं कृत्वा दिवं गतः ।
रुक्मिण्याहं पतिर्लब्धः सौभाग्यमतुलं तथा ॥

---

1. रोमजत्वङ्मासमज्जाह्यै D. 2. °संप्रवृद्धासि भ. पु. पृ. ८४५. 3. °दानमुपसेवितम् दा.खं. ६७४. 4. भयावहेत् D. A. 5. सर्वदेवपतिं प्राप्य पतिं साद्यापि मोदते भ.पु.पृ. ८४५ सर्वदेवहतिर्लब्ध दा.ख.६७४.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दानस्यास्य प्रभावेण पुत्रा बहुबलान्विताः ।
अपुत्रो लभते पुत्रमधनो लभते धनम् ॥

दत्त्वा दानं शुभां कान्तिं विपुलां च तथा श्रियम् ।
य इमं शृणुयान्नित्यं दानकल्पमनुत्तमम् ॥

अहोरात्रकृतात् पापन् मुच्यते नाऽत्र संशयः ।

मेषीमशेष[1]कलुषापहरां सुशस्तां
दाने सदैव रसधातुयुतां सधान्याम् ।
तामादरेण कुरुनन्दन देहि दत्त्वा
[2]येनास्तपापतिमिरः सवितेव भासि ॥

इति मेषीदानम् ।

——:0:——

1. कलुषापराह D. 2. येनात्तपाप D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथाजादानम्

तत्र सुमन्तुः —

प्रजापतिस्तपस्तप्त्वा अजामुत्पाद्य यत्नतः ।
यज्ञार्थे तत्सुतं कल्प्य पशुयज्ञसमुद्धृतौ ॥

द्विरूपं त्रिपुरं[1] श्लक्ष्णं कृष्णसारं युवानकम् ।
असमाप्तं तु यज्ञानां सत्राणां पितृकर्मणाम् ॥

तत्समं विहितं देवैस्तद्दानं च निगद्यते ।
अजापालो महीपालो ह्यजादानैर्दिवं गतः ॥

अयने विषुवे चैव युगादौ ग्रहणेषु च ।
अमावास्यामजादानं पौर्णमास्यां च शस्यते ॥

विधिं तस्य प्रवक्ष्यामि विश्वामित्रेण निर्मितम् ।
सर्वरत्नोपसम्पन्नां सप्तधान्योपरिस्थिताम् ॥

वस्त्रमाल्योपमाल्यैस्तु भूषितां पशुजानकीम् ।
वज्रनेत्रां हेमशृङ्गीं ताम्रपृष्ठां सदोहनाम् ॥

[2]ससुतां रौप्यपादां च कुक्षौ दद्यात् तिलोदकम् ।
गोदानवत् [3]प्रयुञ्जीत मन्त्रेणानेन संयतः ॥

---

1. om A. 2. ससुतारौप्यपादात्रकुक्षौदयातिलोदकम् D. 3. त्प्रयुंतीन D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मन्त्रवासे अजे श्लक्ष्णे [1]यज्ञसम्पत्करे शुभे ।
स्पृष्टा त्वं हरसे पापं जन्मान्तरशतैः कृतम् ॥

इति दानमन्त्रः ।

एवं समुच्चरेद्भक्त्या द्विजहस्ते जलं क्षिपेत् ।
प्रीयतां यज्ञनाथाय वासुदेवाय वै नमः ॥

एवं प्रदक्षिणीकृत्य सूर्यं समवलोकयेत् ।
ततश्च गच्छेत् स्वगृहं हरिं [2]संस्मृत्य मानवः ॥

ये बालत्वे कृताः पापाः कामतो वाप्यकामतः ।
यौवने वार्धकोन्मादे प्रसङ्गेनापि [3]पातकम् ॥

अजादानस्य माहात्म्यान्निष्पापो जायते नरः ।
पुत्रपौत्रसमायुक्तः सदाचारमतिश्चिरम् ॥

विष्णुधर्मोत्तरे —

तस्मादजां प्रयच्छ त्वं ततः सर्वमवाप्स्यसि ॥

मन्त्रेणानेन विधिवदलङ्कृत्य स्वशक्तितः ।
त्वं पूर्वं ब्रह्मणा सृष्टा पवित्रं भवतीपरम् ॥

त्वत्प्रसूतौ स्थिता यज्ञास्तस्माच्छान्तिकरी भव ।
प्रतिगृह्णीत तां चैव पृष्ठदेशे द्विजोत्तमः ॥

एवं प्रदाय विप्राय सर्वपापैः प्रमुच्यते ।
अश्वमेधफलं प्राप्य मोदते वैष्णवे पुरे ॥

इत्यजादानम् ।

---

1. हरते D. रह मे पाप दा. खं. ६७७. 2. संस्पृश्य D. 3. पातके A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ महिषीदानम्

[1]भविष्योत्तरे (१६२.१-२१) भगवानुवाच —

महिषीदानमाहात्म्यं कथयामि युधिष्ठिर ।
पुण्यं पवित्रमायुष्यं सर्वकामफलप्रदम् ॥

चन्द्रसूर्यग्रहे पुण्ये कार्तिक्यामयने तथा ।
शुक्लपक्षे चतुर्दश्यां सूर्यसङ्क्रान्तिवासरे ॥

यदा वा जायते वित्तं चित्तं च कुरुनन्दन ।
तदैव [2]देया महिषी संसारभयभीरुणा ॥

सुपयोधरा सुजवना सुशृङ्गी सुखुरा तथा ।
प्रथमप्रसूता तरुणी सुशीला दोषवर्जिता ॥

सुवर्णशृङ्गतिलका घण्टाभरणभूषिता ।
रक्तवस्त्रावृता रम्या ताम्रदोहनकान्विता ॥

[3]पिण्याकपिष्टकोपेता सहिरण्या च शक्तितः ।
सप्तधान्ययुता देया ब्राह्मणे वेदपारगे ॥

पुराणपाठके तद्वज् ज्योतिश्शास्त्रविदे तथा ।
देया न वेदरहिते न च [3]कुव्रतिने क्वचित् ॥

---

1. आग्नेयपुराणे दा. सा. पृ. ५५५. 2. जीवितं दा. सा. पृ. ५५५.
3. पिण्याकपिठकोपेता तिलखलीपूर्णपिटकयुता दा. सा पृ. ५५५.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्रव्यैरेभिः समायुक्तां पुण्येऽह्नि विधिपूर्वकम् ।
दद्यान्मन्त्रेण राजेन्द्र पुराणपठितेन तु ॥

इन्द्रादिलोकपालानां [1]या राज्यमहिषी शुभा ।
महिषीदानमाहात्म्यात् साऽस्तु मे सर्वकामदा ॥

धर्मराजस्य साहाय्ये यस्याः पुत्रः प्रतिष्ठितः ।
महिषासुरस्य जननी या साऽस्तु वरदा मम ॥

इति दानमन्त्रः ।

दद्यात् प्रक्षिणीकृत्य ब्राह्मणे तां पयस्विनीम् ।
प्रतिग्रहः स्मृतस्तस्याः [2]पृष्ठदेशे स्वयंभुवा ॥

एवं दत्त्वा विधानेन ब्राह्मणस्य गृहं नयेत् ।
[3]क्षमापयेत् ततो विप्रं सुसन्तुष्टो भवेति च ॥

अनेन विधिना दत्त्वा महिषीं द्विजपुङ्गवे ।
सर्वान् कामानवाप्नोति इहलोके परत्र च ॥

या [4]स्त्री ददाति महिषीं सा राजमहिषी भवेत् ।
महाराजः पुमांश्च स्याद् व्यासस्य वचनं यथा ॥

यज्ञयाजी भवेद्विप्रः क्षत्रियो विजयी भवेत् ।
[5]वैश्यस्तु धान्यवान् शूद्रः सर्वकामार्थसंयुतः ॥

तस्मान्नरेण दातव्या महिषी विभवे सति ।
पुत्रपौत्रप्रपौत्रार्थमात्मनः शुभमिच्छता ॥

---

1. राजन् दा. सा पृ. ५५५. 2. पुच्छदेशे दा. सा. पृ. ५५६. 3. क्षमापयेत्ततो विप्र येन सन्तुष्टिमीयिवान् दा. सा. पृ. ५५६. 4. सा भ. पु. ८४४. 5. वैश्यस्तु धान्यधनवान् शूद्रः सर्वार्थसंयुतः दा.खं. पृ.५५६.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दशधेनुसमां राजन् महिषीं नारदोऽब्रवीत् ।
विंशद्धेनुसमां व्यासः सर्वदानोत्तमां [1]कविः ॥

सगरेण ककुत्स्थेन धुन्धुमारेण गाधिना ।
दत्ताः सत्कृत्य विप्रेभ्यो महिष्यः सर्वकामदाः ॥

महिषीदानमाहात्म्यं यः शृणोति सदा नरः ।
सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥

दुग्धाधिकां च महिषीं नवमेघवर्णां
सन्तुष्टतर्णकवतीं जवनाभिरामाम् ।
दत्त्वा सुवर्णतिलकां द्विजपुङ्गवाय
लोकद्वयं स जयतीति किमत्र चित्रम् ॥

विश्वामित्रः —

महिषीं सुप्रजां राजन् क्षीराढ्यां युवतीं तथा ।
दत्त्वा चैव तु कार्तिक्यां धेनूपस्करसंयुताम् ॥

दशधेनुप्रदानेन यत् फलं तत् समश्नुते ।
प्राप्नोति पुत्रपौत्रांश्च सूर्यलोकं स गच्छति ॥

इति महिषीदानम् ।

———(०)———

1. रमिः भ. पु. ८४५.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ यममहिषदानम्

मृत्युञ्जयप्रोक्तम् —

लोहपात्रे स्थितं कांस्यं तत्र पद्मं तु राजतम् ।
तस्मिन् कालेश्वरः स्वर्णपुरुषाकारतां गतः ॥

वस्त्रालंकारसंयुक्तो [1]भयदास्त्राणि सर्वतः ।
त्रिलोहाकारपुरुषैः [2]कालरूपैश्च पार्श्वतः ॥

कृत्वा च माहिषे पृष्ठे तं दद्याद्यममालपन् ।

पद्ममष्टदलम् । कालेश्वरो यमो दण्डपाशहस्तः । भयदास्त्राणि खड्गादीनि । सर्वतश्चतुर्दिक्षु । त्रिलोहं कांस्यताम्रपित्तलाख्यम् । [3]पुरुषैस्त्रिभिः पाशहस्तैः । एतैः सर्वैर्युक्तं यमं महिषपृष्ठे कृत्वा यथावत् सम्पूज्याद्येत्यादि (संकीर्त्य) [4]इमं महिषपृष्ठस्थितलोहपात्रोपरिस्थितकांस्यपात्रस्थराजतपद्मगतं यथोपवीतवस्त्रालङ्कारास्त्रदूतादिसहितं मृत्युञ्जयकामस्तुभ्यमित्यादि उच्चार्य दद्यादिति यममालपन्नित्यस्यार्थे

अष्टम्यां च चतुर्दश्यां करोति विधिना तु यः ।
स मुच्यते ुवं नाशाद्दत्वा घृतघटोत्तरम् ॥

अत्र घृतघटो*दक्षिणास्थाने ज्ञेयः । केचित्तु घृतघटसहितं दत्त्वा सुवर्णं दक्षिणां दद्यादित्याहुः ॥

इति यममहिषदानम् ।

---

1. भदोयेस्त्राणि D. 2. कालंरूपैश्च D. 3. पुरुवैस्त्रिभिः D. 4. द्रमं D.
*दक्षिणास्थराजतपद्मगतं यथोपवीतवस्त्रालङ्कारास्त्रदूतादिसहितं मृत्युञ्जयकामस्तुभ्यमित्यादि उच्चार्य दद्याति यममालपन्नित्यास्यार्थः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ कृष्णाजिनदानम्

मत्स्यपुराणे — (२०६.१.२१–२२.३०)

कृष्णाजिनस्य दानस्य विधिकालौ ममानघ ।
ब्राह्मणं च समाचक्ष्व तत्र मे संशयो महान् ॥

मत्स्य उवाच —

वैशाखी पौर्णमासी च ग्रहणं शशिसूर्ययोः ।
पौर्णमासी तु या माघे आषाढी कार्तिकी तथा ॥

उत्तरायणं द्वादशी च तस्यां दत्तं महाफलम् ।
आहिताग्निर्द्विजो यस्तु देयं वै तस्य पार्थिव ॥

यथा येन विधानेन तन् मे निगदतः शृणु ।
गोमयेनोपलिप्ते तु शुचौ देशे नराधिप ॥

आदावेव समास्तीर्य शोभनं वस्त्रमाविकम् ।
ततः सशृङ्गं सखुरमास्तरेत् कृष्णमार्गकम् ॥

कर्तव्यं रुक्मशृङ्गं तु रूप्य[1]दन्तं तथैव च ।
लाङ्गूलं मौक्तिकैर्युक्तं तिलच्छन्नं तथैव च ॥

[2]तिलैरात्मसमं कृत्वा वाससाच्छादयेद् बुधः ।

---

1. रौप्यदन्तं दा.खं. ६५१. 2. निलैरस्मसमं D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

[1]आत्मसममिति उपविष्टस्वात्मतुल्योच्चप्रमाणमित्यर्थः ।

सुवर्णनाभं तत् कुर्यादलंकुर्याद्विशेषतः ॥

रत्नैर्गन्धैर्यथाशक्त्या तस्य दिक्षु च विन्यसेत् ।
कांस्यपात्राणि चत्वारि दिक्षु दद्याद्यथाक्रमम् ॥

मृण्मयेषु च पात्रेषु पूर्वादिप्रक्रमेण तु ।
घृतं क्षीरं दधिक्षौद्रमेवं दत्त्वा यथाविधि ॥

सुवर्ण[2]नाभमित्यादि अलङ्कुर्यादित्यत्रालङ्करणसाधनाकाङ्क्षायां रत्नगन्धै-रित्यस्य सन्निहितत्वादलङ्करणसाधनतयान्वयेन [3]निराकाङ्क्षत्वान्न कांस्यपात्रसम्बन्धः। ततश्च तेषु चतुर्षु मृण्मयेषु चतुर्षु पात्रेषु पूर्वादिक्रमेण घृतक्षीरदधिमधुपूर्णानि यथाक्रमं पूर्वादिदिक्षु स्थापनीयानीति हेमाद्रिकाराः ।

चम्पकस्य [4]तथा शाखामव्रणं कुम्भमेव वा ।
वाह्योपस्थानकं[5] कृत्वा शुभंचित्तो निवेशयेत् ॥

जीर्णवस्त्रेण पीतेन सर्वाङ्गानि च मार्जयेत् ।

वाह्योपस्थानकमिति [6]बाह्ये दानदेशाद्बहिः । उपसमीपे स्थानं यस्य कुम्भस्य स तथोक्तः । निवेशयेद् दानान्तरं स्नानार्थमितिशेषः । मार्जयेद्दानान्तरं स्नात्वा जीर्णवस्त्रोणाङ्गानि [7]प्रोक्षयेदित्यर्थः ।

धातुमयानि पात्राणि पात्रेष्वस्य प्रदापयेत् ॥

वक्ष्यमाणप्रकारेण समन्त्रकं निवेशयेदित्यर्थः ।

यानि [8]कान्यपि पापानि मया लोभात् कृतानि वै ।
लोहपात्रप्रदानेन प्रणश्यन्तु ममाशु वै ॥

---

1. आत्मसमं कृत्वा सर्वतः कृष्णाजिनाच्छादकं तिलं दत्त्वा इत्यर्थः दा. स. पृ. ५२०. 2. नाभिम् A. 3. निराङ्क्षीसत्वात् A. 4. पञ्चकस्य A. 5. वात्द्योपस्थापनम् A. 6. वाह्योदान D. 7. प्रच्छादयेत् दा.खं. ६५८. 8. काम्यानि दाखं. ६५८.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तिलपूर्णं तु तत् कृत्वा वामपादे निवेशयेत् ।
यानि पापान्यकामानि कामोत्थानि[1] कृतानि च ॥

कांस्यपात्रप्रदानेन तानि नश्यन्तु मे सदा ।
मधुपूर्णं तु तत् कृत्वा पादे वै दक्षिणे न्यसेत् ॥

परापवादपैशुन्यात् [2]दुष्टमांसस्य भक्षणात् ।
तत्रोत्थितं च मे पापं ताम्रपात्रात् प्रणश्यतु ॥

[3]कन्यानृतं गवां चैव परदारप्रधर्षणम् ।
रौप्यपात्रप्रदानेन क्षिप्रं नाशं प्रयातु मे ॥

ऊर्ध्वपादे त्विमे कार्ये ताम्रस्य रजतस्य च ।

ऊर्ध्वपादे अग्रपादयोः । अत्रैकत्वमविवक्षितम् । अनेन पूर्वोक्तयोर्लोह-कांस्यपात्रयोः पश्चिमपादद्वये स्थापनमित्यर्थाल्लभ्यते । अनयोश्च पूर्वपात्रयोर्दक्षिणे वामे च क्रमेण न्यासः ।

जन्मजन्मसहस्रेषु कृतं पापं कुबुद्धिना ।
सुवर्णपात्रदानात्तन्नाशयाशु जनार्दन ॥

अत्र सुवर्णपात्रस्य स्थानान् निर्देशान् मध्ये च पात्रान्तराश्रयणान्मध्यदेश एव स्थापनम् । एतच्चाक्षतपूर्णं स्थापनीयमित्याहुः ।

हेममुद्रां[5]विद्रुमं च दाडिमं बीजपूरकम् ।
प्रशस्तपत्रं श्रवणे खुरे शृङ्गाटकानि च ॥

एवं कृत्वा यथोक्तेन सर्वशाकफलानि च ।
[6]प्रतिग्रहविद् विद्वानाहिताग्निर्द्विजोत्तमः ॥

---

1. कर्णोत्थानि दा. खं. ६५८. 2. वृथा म.पु. P. ५६९ दा.खं. पृ.६५८. 3. कन्यानृतात् गवांश्चैव परभिमर्शनाम् म.पु. ५६९. 4. अत्र ताम्रपात्रं मधुपूर्णं दक्षिणपादे, रजतपात्रं तिलपूर्णं वामपादे स्थापनीयत् दा.खं. ६५९. 5. हेममुक्ता-विद्रुमं च दा.ख. ६५९. 6. प्रशस्तात्रं दा.खं. ६५९.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्नातो वस्त्रयुगच्छन्नः स्वशक्त्या वाप्यलङ्कृतः ।
प्रतिग्रहश्च तस्योक्तः पुच्छदेशे महीपते ॥

तत एवं समीपे तु मन्त्रमेतमुदीरयेत् ।
कृष्ण कृष्ण विभो देव कृष्णाजिनधरस्तथा ॥

त्वद्दानाद्गतपापः स्यां प्रीयतां मे[1] नमो नमः ।
त्रयस्त्रिंशत्सुराणां त्वमाधारत्वे व्यवस्थित : ॥

कृष्णोऽसि मूर्तिमान् साक्षात् कृष्णाजिन नमोऽस्तु ते ।
सुवर्णनाभिकं दद्यात् प्रीयतां वृषभध्वजः ॥

[2]अनेन विधिना दद्याद् यथावत् कृष्णमार्गकम्[3] ।
न स्पृश्यः स द्विजो [4]राजन्निति यूपसमो हि सः ॥
दाने च श्राद्धकाले च दूरतः परिवर्जयेत् ।
स्वगृहात् प्रेष्य तं विप्रं तण्डुले[5] स्नानमाचरेत् ॥
पूर्णकुम्भेन राजेन्द्र शाखया चम्पकस्य च ।
कृत्वा चाचार्यकलशं मन्त्रेणानेन मूर्धनि ॥

आप्यायस्व समुद्रज्येष्ठा ऋचो जप्यास्तु षोडश ।

आप्यायस्वेत्यष्टौ, समुद्रज्येष्ठा इत्यष्टौ । एवं षोडशभिर्ऋग्भि[6]रभिमन्त्रितश्चम्पकशाखयाऽवसिक्तः संस्नायादित्यर्थः । ततः पूर्वोक्तपीतवस्त्रेणाङ्ग[7]प्रोञ्छनम् ।

अहते वाससी वीत आचान्तः शुचितामियात् ।
वीतकृतपरिधानः ।

[8]तद्वस्त्रकुम्भसहितं नीत्वा क्षेप्यं चतुष्पथे ।
इदं च दानं वाक्यप्रयोगेण कृत्वा यथाशक्त्या दक्षिणां दद्यात् ।

1. वृषभध्वजः म.पु. P. 600. 2. अ–पेन D. 3. विद्धि E. 4. °मार्गणम् दा. खं 600. 5. मण्डले दा. खं. 600. मङ्गलस्नानमाचरेत् म.पु. 600. 6. रभिमन्त्रिभिश्चम्पक D. 7. प्रोच्छनम् D. 8. तद्वस्व D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तिलपूर्णं तु तत् कृत्वा वामपादे निवेशयेत् ।
यानि पापान्यकामानि कामोत्थानि[1] कृतानि च ॥

कांस्यपात्रप्रदानेन तानि नश्यन्तु मे सदा ।
मधुपूर्णं तु तत् कृत्वा पादे वै दक्षिणे न्यसेत् ॥

परापवादपैशुन्यात् [2]दुष्टमांसस्य भक्षणात् ।
तत्रोत्थितं च मे पापं ताम्रपात्रात् प्रणश्यतु ॥

[3]कन्यानृतं गवां चैव परदारप्रधर्षणम् ।
रौप्यपात्रप्रदानेन क्षिप्रं नाशं प्रयातु मे ॥

ऊर्ध्वपादे त्विमे कार्ये ताम्रस्य रजतस्य च ।

ऊर्ध्वपादे अग्रपादयोः । अत्रैकत्वमविवक्षितम् । अनेन पूर्वोक्तयोर्लोह-कांस्यपात्रयोः पश्चिमपादद्वये स्थापनमित्यर्थाल्लभ्यते । अनयोश्च पूर्वपात्रयोर्दक्षिणे वामे च क्रमेण न्यासः ।

जन्मजन्मसहस्रेषु कृतं पापं कुबुद्धिना ।
सुवर्णपात्रदानात्तन्नाशयाशु जनार्दन ॥

अत्र सुवर्णपात्रस्य स्थानान् निर्देशान् मध्ये च पात्रान्तराश्रयणान्मध्यदेश एव स्थापनम् । एतच्चाक्षतपूर्णं स्थापनीयमित्याहुः ।

हेममुद्रां[5]विद्रुमं च दाडिमं बीजपूरकम् ।
प्रशस्तपत्रं श्रवणे खुरे शृङ्गाटकानि च ॥

एवं कृत्वा यथोक्तेन सर्वशाकफलानि च ।
[6]प्रतिग्रहविद् विद्वानाहिताग्निर्द्विजोत्तमः ॥

---

1. कर्णोत्थानि दा. खं. ६५८. 2. वृथा म.पु. P. ५६९ दा.खं. पृ.६५८. 3. कन्यानृतात् गवांश्चैव परभिमर्शनाम् म.पु. ५६९. 4. अत्र ताम्रपात्रं मधुपूर्णं दक्षिणपादे, रजतपात्रं तिलपूर्णं वामपादे स्थापनीयत् दा.खं. ६५९. 5. हेममुक्ता-विद्रुमं च दा.ख. ६५९. 6. प्रशस्तात्रं दा.खं. ६५९.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्नातो वस्त्रयुगच्छन्नः स्वशक्त्या वाप्यलङ्कृतः ।
प्रतिग्रहश्च तस्योक्तः पुच्छदेशे महीपते ॥

तत एवं समीपे तु मन्त्रमेतमुदीरयेत् ।
कृष्ण कृष्ण विभो देव कृष्णाजिनधरस्तथा ॥

त्वद्दानाद्गतपापः स्यां प्रीयतां मे[1] नमो नमः ।
त्रयस्त्रिंशत्सुराणां त्वमाधारत्वे व्यवस्थित : ॥

कृष्णोऽसि मूर्तिमान् साक्षात् कृष्णाजिन नमोऽस्तु ते ।
सुवर्णनाभिकं दद्यात् प्रीयतां वृषभध्वजः ॥

[2]अनेन विधिना दद्याद् यथावत् कृष्णमार्गकम्[3] ।
न स्पृश्यः स द्विजो [4]राजन्निति यूपसमो हि सः ॥

दाने च श्राद्धकाले च दूरतः परिवर्जयेत् ।
स्वगृहात् प्रेष्य तं विप्रं तण्डुले[5] स्नानमाचरेत् ॥

पूर्णकुम्भेन राजेन्द्र शाखया चम्पकस्य च ।
कृत्वा चाचार्यकलशं मन्त्रेणानेन मूर्धनि ॥

आप्यायस्व समुद्रज्येष्ठा ऋचो जप्यास्तु षोडश ।

आप्यायस्वेत्यष्टौ, समुद्रज्येष्ठा इत्यष्टौ । एवं षोडशभिर्ऋग्भि[6]रभिमन्त्रितश्चम्पकशाखयाऽवसिक्तः संस्नायादित्यर्थः । ततः पूर्वोक्तपीतवस्त्रेणाङ्ग[7]प्रोञ्छनम् ।

अहते वाससी वीत आचान्तः शुचितामियात् ।
वीतकृतपरिधानः ।

[8]तद्वस्त्रकुम्भसहितं नीत्वा क्षेप्यं चतुष्पथे ।
इदं च दानं वाक्यप्रयोगेण कृत्वा यथाशक्त्या दक्षिणां दद्यात् ।

---

1. वृषभध्वजः म.पु. P. 600. 2. अ–पेन D. 3. विद्धि E. 4. °मार्गणम् दा. खं 600. 5. मण्डले दा. खं. 600. मङ्गलस्नानमाचरेत् म.पु. 600. 6. रभिमन्त्रिभिश्चम्पक D. 7. प्रोच्छनम् D. 8. तद्वस्त्र D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गारुडपुराणे —

शतनिष्कसमोपेतं तदर्धार्धमथापि वा ।
अतो न्यूनं न दातव्यमधिके फलमूर्जितम् ॥

उत्तमं तु शतेनैव मध्यमं तु तदर्धतः ।
तदर्धेन कनिष्ठं तु देयं कृष्णमृगाजिनम् ॥

शतेन निष्काणामिति शेषः । सहार्थे तृतीया ।

न वित्तशाठ्यं कुर्वीत फलहानेस्तु कारणात् ॥

मत्स्यपुराणे (२०९. २८–३२) —

कृतेनानेन या व्युष्टिर्न सा शक्या सुरैरपि ।
वक्तुं च नृपतिश्रेष्ठ तथाप्युद्देशतः श्रृणु ॥

समग्रभूमिदानस्य फलमाप्नोति मानवः ।
सर्वांल्लोकांश्च जयति कामचारी विहङ्गमः ॥

[1]अभूतसंप्लवं यावत् [2]स्वर्गं प्राप्नोत्यसंशयम् ।
न पिता पुत्रमरणं वियोगं भार्यया सह ॥

धनदेशपरित्यागं न चैवेहाप्नुयात् क्वचित् ।

कृष्णाक्षतं कृष्णमृगस्य चर्म
दत्त्वा द्विजेन्द्राय समाहिताय ।
[3]यमोक्तमेतन्मरणं न शोचेत्
प्राप्नोत्यभीष्टं मनसा फलं तत् ॥

विष्णुनाप्यनेनाभिन्नार्थं कृष्णाजिनमुक्तम् ।

---

1. रभूतसप्लवं दा.ख. 2. सर्गं म.पु. 3. निलद्रोण D.

CC-0: Jangamwadi Math Collection. Digitized by eGangotri

कालिकापुराणे तु —

योऽपि रुक्मादिपात्रे च हुत्वा वह्निं ददाति वै ।
तिलद्रोणसंयुक्तं च वस्त्रयुग्मेन वेष्टितम् ॥

पलार्धार्धमथार्धं वा विभवाद्धेमसंयुतम् ।
सूक्ष्मवस्त्रेण युग्मेन अन्येनाच्छादयेद् द्विजम् ॥

सोदकं वाथ रुक्मं च सतिलं न्यस्य तत्करे ।
ततः कृष्णाजिनं दद्यात् तिलद्रोणान्वितं च यत् ॥

दत्त्वा तु भोजयेत्तत्र नत्वा चैव विसर्जयेत् ।

अनेनैव विधानेन दशद्रोणप्रदायकः ।
आब्रह्माण्डभवत्कालं मोदते स पुरोत्तमे ॥

आदित्यपुराणे —

वैशाख्यां पौर्णमास्यां च तिलदानं ददन्ति ये ।
कृष्णाजिनं च सम्पूर्णप्रस्थान्यष्टौ तिलस्य वै ॥

स्वर्णशृङ्गं रौप्यखुरं मुक्तालाङ्गूलभूषितम् ।
श्वेतवस्त्रयुगोपेतं कृष्णचैलाद्यलङ्कृतम् ॥

लोहपात्रचतुष्कं च घृतक्षौद्रप्रपूरितम् ।
दधिक्षीरं तथा चैव सम्पूर्णं च ततः परम् ॥

---

1. यथोक्तं दा.खं. 660. 2. मोदकं A. 3. भाजतचतुष्कं.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

परीक्षिते गुणाधारे ब्राह्मणे सुसमाहिते ।
अग्निहोत्रपरे शान्ते देवद्विजपरायणे ॥

तस्मिंस्तद् दीयते दानं कृष्णाजिनमनुत्तमम् ।

इति कृष्णाजिनदानम् ।

————(:०:)————

1. प्रच्छाद्याष्टौ दा.खं. 661. 2. तस्मै दा.खं. पृ. ६६२.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ गृष्टिकृष्णाजिनदानम्

विष्णुधर्मोत्तरे —

वैशाख्यां पौर्णमास्यां च कार्तिक्यां विषुवे तथा ।
अयने [1]विषुवे चापि दद्यात् कृष्णाजिनमनुत्तमम् ॥

भूमौ गोमयलिप्तायां दर्भानास्तीर्य मानवः ।
तत्राविकं तथा वस्त्रं प्रागग्रं तु प्रसारितम् ॥

अविकं वस्त्रं कम्बलः ।

तस्मिन् कृष्णाजिनं भूप निर्मांसं तु प्रसारयेत् ।
[2]प्राग्ग्रीवमुत्तरमुखं सशृङ्गं सखुरं तथा ॥

[3]प्राग्ग्रीवं प्राक्शिरस्कम् । उत्तरमुखं [4]उपरिस्थचक्षुर्घ्राणादिमुखावयवं उपरिलोमकमित्यर्थः ।

स्वर्णशृङ्गं रौप्यखुरं मुक्तालाङ्गूलभूषितम् ।
अत्र स्वर्णशृङ्गत्वादिकं यथाशक्ति सम्पादनीयम् ।

तिलैः संच्छाद्य कृष्णैस्तु यथाशक्त्या यथाविधि ।
सौवर्णक्षीरपात्रं तु पूर्वस्यां दिशि दापयेत् ॥

रजतं [5]दधिपात्रं तु दक्षिणस्यां निधापयेत् ।
ताम्रपात्रं घृतपूर्णं पश्चिमायां निधापयेत् ॥

---

1. विषुवे चापि दद्यात् कृष्ण मृगाजिनम् D. 2. ; 3. प्राग्ग्रीवं D. 4. उपरिष्टं A. ग्रहणे दा.खं. ६६६. 5. दधपात्रं D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शङ्खं सुनाभिं सुमुखं क्षौद्रपूर्णं तथोत्तरे ।
चतुसृषु तथा दिक्षु चतस्रो गृष्टिकाः क्रमात् ॥

गृष्टिः सकृत्प्रसूता गौः ।

तत्स्वरूपं तु राजेन्द्र तिलानाच्छाद्य वाससा ।
पश्चिमे तु तथा [1]चाङ्गविधिना स्थाप्य पावकम् ॥

तिलान् घृताक्ताञ् जुहुयाद् व्याहृतीभिः [2]समासतः ।
आहिताग्निं ततो विप्रमव्यङ्गाङ्गं [3]सुपावकम् ॥

प्रवक्तारं याज्ञिकं च दातारं स्मृति[4]वित्तरम् ।
सम्पूज्य वस्त्रयुग्मेन अलङ्कारैश्च [5]शोभितम् ॥

दिशः सम्प्रोक्ष्य गायत्र्या तिलमिश्रेण वारिणा ।
कृष्णाजिनं द्विजश्रेष्ठ सशिरो[6] गृष्टिभिर्युतम् ॥

ददामि प्रतिगृह्णीष्व प्रीयतां धर्मराडिति ।
नाभिं स्पृशन्तं निनयेत् प्रतिगृह्णात्वसाविति ॥

निनयेत् प्रतिगृह्णीयात् ।

अदितिर्द्यौरिति जपेत् प्रणवेनादितस्ततः ।
गोभूहिरण्यसंयुक्तं मार्गमेतद् ददाति यः ॥

स सर्वपापकर्मापि सायुज्यं ब्रह्मणो व्रजेत् ।

गोभूहिरण्येत्यादि यथाशक्त्या गोभूहिरण्ययुक्तगरुडपुराणोक्तदक्षिणासहितमित्यर्थः । पुलस्त्योक्तमपि गृष्टिकृष्णाजिनमनेन समानार्थम् । इयांस्तु

---

1. ततो भागे दा. खं. P. ६६५. 2. समाहितः दा. खं. P. ६६५. 3. सुपाठकम् दा.खं. ६६५. 4. स्मृतिवित् परम् दा.खं. ६६५. 5. शोभितैः दा.खं. ६६५. 6. सशिरं A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विशेषः । दिक्चतुष्टयस्थाप्यसौवर्णादिपात्रस्थानेषु प्रागादिक्रमात् ताम्रकांस्यरौप्य-सौवर्णपात्राणि क्षीरदधिघृतक्षौद्रपूर्णानि स्थापयेत् । हिरण्यनाभं कुर्यात् । सर्वगुणविशिष्टं कृष्णाजिनं ददामीति नाभिं स्पृशन् दद्यात् । प्रतिग्रहीता चादितये कृष्णाजिनं प्रतिगृह्णाम्यसाविति स्वनामगोत्राद्युच्चारयेत् । दानप्रति-ग्रहादिविधिः सर्वः समानः ॥

इति गृष्टिकृष्णाजिनदानम्

———(:o:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथार्द्रकृष्णाजिनदानम्

विष्णुधर्मोत्तरे भगवानुवाच —

मुण्डितेन तु या प्रोक्ता [1]प्रायश्चित्तिः पुराऽभवत् ।
हत्यायां ब्राह्मणस्यैव तां प्रवक्ष्यामि नारद ॥

भूमिं प्राक्प्रवणां शुद्धां गोमयेनानुलेपयेत् ।
[2]तस्यां हरितदर्भांस्तु घनानास्तीर्य यत्नतः ॥

मध्ये कृष्णाजिनं राजन्नार्द्रसर्वाङ्गिकं [3]दृढम् ।
आस्तीर्य शृङ्गसहितं प्राग्ग्रीवं शिरसा सह ॥

केतितं ब्राह्मणं पूर्वं पात्रलक्षणलक्षितम् ।

केतितं निमन्त्रितम् ।

प्रक्षाल्य पादौ तस्यैव दद्यात् कृष्णे तु वाससी ॥

सौवर्णे कुण्डले देये हस्ताभरणमेव च ।
स्रग्दामभिस्तु सम्पूज्य शृङ्गयोर्मध्यदेशतः ॥

प्राङ्मुखं ब्राह्मणं स्थाप्य मृगं सौवर्णशृङ्ग[4]कम् ।
तिलैः प्रच्छादयेत् कृष्णैर्ब्राह्मणं शिरसा सह ॥

---

1. मुण्डिते यातना प्रोक्ता प्रायश्चित्तपरा भवेत् दा.खं. ६६६. 2. तस्यां D. 3. दृदम् D. 4. शृङ्गिकम् दा.खं. ६६६.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यदा शिरो ब्राह्मणस्य मग्नं भवति [1]भूभुज ।
जपेद् वै मूलमन्त्रं तु गायत्रीं वा समाहितः ॥

पापं सञ्चिन्त्य चित्तेन हननं ब्राह्मणस्य तु ।
नाभिमात्रं समुद्धृत्य तिलैः सञ्छादयेत् पुनः ॥

सञ्छादिते [2]पुनर्विप्रे जपेन्मन्त्रं तु पूर्ववत् ।
पुनरुद्धृत्य विप्रं तु नाभिं [3]यावत्तु पार्थिव ॥

पुनः सञ्छादयेत्तस्य शिरःकृष्णैस्तिलैस्तथा ।
[4]त्रिःकृत्वा स्तुतिमस्यैव दानं दद्यान्मृगाजिनम् ॥

पात्रं मनसि सञ्चिन्त्य तोयमप्सु विनिक्षिपेत् ।
प्रीयतां विश्वकर्मा तु विश्वात्मा विश्वरूपधृक् ॥

एवं कृष्णाजिनं दत्त्वा ब्रह्महत्यां व्यपोहति ।
[5]पापिष्ठः परमं स्थानं याति यत्र न शोचति ॥

इति ते गुह्यमाख्यातं दानं सर्वाघनाशनम् ।
मुण्डितेन तु वत्साय [6]ब्राह्मणे घातिते सति ॥

सहस्रं दक्षिणां दद्यान्नियतं ब्राह्मणाय तु ।

इत्यार्द्रकृष्णाजिनदानम् ।

इति श्रीकोदण्डपरशुरामेत्यादिविविधबिरुदावलीविराजमानोन्नत-महाराजाधिराजश्रीशक्तिसिंहात्मजश्रीमहाराजाधिराजश्रीमदनसिंहदेवविरचिते मदनरत्नप्रदीपे दानविवेकोद्द्योते देवतादानप्रकरणम् ॥

---

1. भूभुजः D;A. 2. पुनर्विप्र D. 3. यावतु D. 4. त्रिकृत्वा D. 5. पापिष्ठपरमं D. 6. ब्रह्मणे घातिते सत्ति D;A. कृच्छ्राय° दा.खं.P ६६७.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ कालविशेषविहितदानानि

(तिथिदानानि)

वह्निपुराणे —

यो ददाति द्विजेभ्यस्तु तृतीयायामुपानहौ ।
वैशाखे शुक्लपक्षे तु [1]सुच्छत्रं करकान्वितम् ॥

न तस्य मानसो दाहो मर्त्यलोके [2]विजायते ।
सर्वव्याधिविनिर्मुक्तः श्रियं पुत्रांश्च विन्दति ॥

विष्णुधर्मोत्तरे —

वैशाखे शुक्लपक्षे तु तृतीयायां विशेषतः ।
यद्ददाति नरश्रेष्ठ तदक्षय्यं समश्नुते ॥

भविष्यत्पुराणे —

माघमासे तृतीयायां गुडस्य लवणस्य च ।
दानं श्रेयस्करं राजन् स्त्रीणां च पुरुषस्य च ॥

तथा वैशाखशुक्लतृतीयां प्रकृत्य —

यत् किञ्चिद्दीयते दानं स्वल्पं वा यदि वा बहु ।
तत् सर्वमभयं स्याद्वै तेनेयमक्षया स्मृता ॥

---

1. सच्छत्रं दा. खं. ७८७. 2. अभिजायते दा. खं. ७८७.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

योऽस्यां ददाति करकान् वारिपात्रसमन्वितान् ।
स याति पुरुषो वीरलोकं वै हेलिमालिनः[1] ॥

विष्णुधर्मोत्तरे —

द्वादश्यां चैत्रशुक्लस्य चित्रवस्त्रप्रदो नरः ।
अक्षयं फलमाप्नोति नागलोकं च गच्छति ॥

वाराहपुराणे —

[2]मार्गशीर्षोऽथ वैशाखो द्वौ मासौ मम वल्लभौ ।
अनयोर्मासयोर्यस्तु द्वादश्यां नियतात्मवान् ॥

द्वादशानां तु विप्राणां प्रददाति वसुन्धरे ।
एकैकस्य तु गां श्रेष्ठां सर्वोपस्करसंयुताम् ॥

वस्त्रोपानद्युगं चैव कर्णालङ्कारमेव च ।
आतपत्रं पादुके च अङ्गलीयकमेव च ॥

विलिप्य चोपवीतं च मां ध्यायन् [3]शक्तिसंयुतः ।
दद्यादशक्तो पञ्चानां त्रयाणां च द्वयोरथ ॥

अशक्तौ त्वथवैकस्मिन् वेदवेदाङ्गपारगे ।

अस्य फलं तेनैवोक्तम् ।

मन्वन्तराणां कोटयस्तु दश सप्त च पञ्च च ।
मच्छरीरगतश्चास्ते सर्वद्वन्द्वविवर्जितः ॥

---

1. हेममालिनः दा. खं. ७८९. 2. मार्गशीर्षाऽथ D. 3. भक्तिसंयुतः दा. खं. ७९४.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यद्यदि स्युर्ग्रहाः सर्वे मूर्ध्नि लिङ्गे शनैश्चरः ।
सर्वे ते सौम्यतां यान्ति द्वादश्यां [1]विधिनामुना ॥

यमः —

माघान्धकारद्वादश्यां तिलैर्हुत्वा हुताशनम् ।
तिलान् दत्त्वा च विप्रेभ्यः सर्वपापात् प्रमुच्यते ॥

विष्णुधर्मोत्तरे —

श्रावणे शुक्लपक्षे तु द्वादश्यां प्रीयते नृप ।
गोप्रदानेन गोविन्दो यत् पूर्वकथितं फलम् ॥
तत् सर्वं समवाप्नोति नात्र कार्या विचारणा ।

विष्णुधर्मोत्तरे --

वैशाख्यां पौर्णमास्यां तु ब्राह्मणान् पञ्च सप्त वा ॥
क्षौद्रयुक्तैस्तिलैः कृष्णैर्वार्चयेद् यदि वै नरः[2] ।
प्रीयतां धर्मराजेति यद्वा मनसि वर्तते ॥

तिलैर्दत्तैरिति शेषः ।

यावज्जीवकृतात् पापात् तत्क्षणादेव मुच्यते ।

तत्रैव —

सोपवासस्तथा ज्येष्ठे पूर्णं तु शशलक्षणे ।
उपानहौ तथा च्छत्रं दत्त्वात्यन्तं सुखी भवेत् ॥
[3]आषाढ्यामन्नदानेन प्राप्नोत्यन्नं तथा बहु ।
जलधेनुप्रदानेन श्रावण्यां स्वर्गमाप्नुयात् ॥
गोदानं प्रोष्ठपद्यां च पौर्णमास्यां महाफलम् ।
आश्वयुज्यां कांस्यपात्रं घृतपूर्णं द्विजातये ॥

1. विधिनामुनु D. 2. वेतरैः दा. खं. ७९७. 3. आषात्यामंन D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स सुवर्णं तथा दत्त्वा दीप्तौजास्त्विह जायते ।
कार्तिक्यां चन्द्रवर्णाभमन्यवर्णमथापि वा ॥

रत्नैर्गन्धैस्तथा धान्यैर्बीजैर्वस्त्रैस्तथैव च ।

एतैर्युक्तमिति शेषः ।

कृत्वा चोक्तमथोक्षाणं दत्त्वा [1]दीपं समन्ततः ॥

चन्द्रोदये नरो दत्त्वा सर्वपापैः प्रमुच्यते ।
कान्तारे यममार्गे तु तेनाऽसौ व्रजते सुखम् ॥

प्राप्नोति पुत्रपौत्रांश्च सूर्यलोकं स गच्छति ।
मार्गशीर्षे तथा मासि पूर्णे च शशलक्षणे[2] ॥

महारजनरक्तेन वाससा तु महीपते ।
आच्छाद्य कांस्यपात्रे तु कृत्वा सोमं समाहितः ॥

महारजनं लाक्षारसः । शशलक्षणे चन्द्रे । चन्द्रलक्षणं परिभाषायां द्रष्टव्यम् ।

लवणस्य तु मुख्यस्य सम्पूर्णं कृष्णमार्गकम् ।
दत्त्वा सुवर्णनाभस्य तस्मिन्नेव द्विजातये ॥

सौभाग्यरूपलावण्ययुक्तो भवति मानवः ।
गौरसर्षपकल्केन पौष [3]उत्साहितो जनः ॥

नवाव्रणेन कुम्भेन सोऽभिषिक्तश्च तत्परम् ।
विरूपितस्ततः स्नातः सर्वबीजयुतैर्जलैः ॥

---

1. दापं D. 2. शिशिरदीधितो दा. खं ७९९. 3. उच्छादितो दा. खं. ७९९.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गन्धरत्नफलोपेतं घृतं च तदनन्तरम् ।
सुवर्णं च ततः कृत्वा तत् प्रदद्याद् द्विजातये ॥

सुवर्णमध्ये कृत्वा घृतेनाभिषिक्त इत्यन्वयः ।

कर्त्रे वस्त्रयुगं दद्यात् सोपवासः समाहितः ॥

कर्मणानेन धर्मज्ञः सर्वपापैः प्रमुच्यते ।
माघ्यां [1]कृष्णतिलैः श्राद्धं कृत्वा पापैः प्रमुच्यते ॥

स्वास्तीर्णं शयनं दत्त्वा फाल्गुन्यां ब्राह्मणाय च ।
रूपद्रविणसंयुक्तां भार्यां पक्षवतीं तथा ॥

पक्षवतीं भ्रात्रादिबन्धुवर्गोपेताम् ।

नरः प्राप्नोति धर्मज्ञः श्रियं चैव तथोत्तमाम् ।
तथा नार्यपि भर्तारं नात्र कार्या विचारणा ॥

भविष्योत्तरे —

पौर्णमास्यां वृषोत्सर्ग कारयित्वा विधानतः ।
चन्द्रं रजतनिष्पन्नं पलेनैकेन शोभनम् ॥

पूजयित्वा च कुसुमैर्नैवेद्यं विनिवेद्य च ।
दद्याद् विप्राय सत्कृत्य वासोऽलङ्कारभूषणैः ॥

मन्त्रेणानेन राजेन्द्र तं निबोध मयोदितम् ।
क्षीरोदार्णवसम्भूत त्रैलोक्यगणदीपक ॥

उमापतिशिरोरत्नशिवायाश्च नमो नमः ।
दानेनानेन नृपतिर्भ्राजते चन्द्रवद् दिवि ॥

---

1. कृत्वा दा. खं. ७९९.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अप्सरोभिः परिवृतो यावदाभूतसम्प्लवम् ।

विष्णुधर्मोत्तरे —

यानि चान्यानि दानानि दत्तानि सुबहून्यपि ।
युगादिषु महाराज अक्षयाणि भवन्ति हि ॥

अल्पमल्पं च यत् किञ्चित् [2]प्रदद्यान्निर्धनोऽपि सन् ।
अक्षय्यं तद् भवेत् सर्वं युगादिषु [3]न संशयः ॥

इति तिथिदानानि ।

———(:o:)———

1. आहूतसम्प्लवन् दा. खं. ८०१. 2. त्पदद्यात् D. 3. मसंशयः D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ वारदानानि

ग्रहं स्वर्णमयं कृत्वा यो विप्रेभ्यः प्रयच्छति ।
तद् दिनेषु यथाशक्त्या सर्वान् कामान् स विन्दति ॥

एतेषां प्रतिमालक्षणानि तुलापुरुषप्रकरणे द्रष्टव्यानि ।

स्कन्दपुराणे —

आदित्यादिषु वारेषु सहिरण्याः [1]सदैव तु ।
यः प्रयच्छति तन्मूर्तीस्तस्य तुष्यन्ति वै ग्रहाः ॥

इति वारदानानि ।

———(:o:)———

1. सवदै तु D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ नक्षत्रदानानि

विष्णुधर्मोत्तरे —

कृत्तिकासु सुवर्णस्य दानं बहुफलं स्मृतम् ।
[1]रक्तवस्त्रस्य रोहिण्यां सौम्यभे लवणस्य च ॥

कृशरस्य तथार्द्रायामादित्ये रजतस्य च ।
घृतस्य तु तथा पुष्ये गन्धानामथ [2]सर्पभे ॥

तिलानां च तथा पैत्र्ये प्रियङ्गोर्भगदैवते ।
[3]अर्यम्णे वाप्यपूपानां सावित्रे पायसस्य तु ॥

चित्रायां चित्रवस्त्रस्य सक्तूनां वायुदैवते ।
ऐन्द्राग्ने चैव लोहानां मैत्रे माल्यफलस्य च ॥

क्षत्रस्य च तथा शाक्रे मूले मूलफलस्य च ।
[4]हेम्नश्च मधुयुक्तस्य दानमाथो महाफलम् ॥

विश्वेश्वरेऽन्नपानस्य श्रवणे वसनस्य च ।

धान्यस्य वासवे विप्रा वारुणे [5]चौषधस्य च ।
[6]अजे पुराणबीजानां सस्यानां तदनन्तरे ॥

गोरसानां तथा पौष्णे स्नानानामथ [7]चाश्विने ।
तिलानां च महादानं भरणीषु महाफलम् ॥

इति नक्षत्रदानानि

---

1. रक्तत्वस्त्रस्य D. 2. सर्पभे D. 3. अर्यम्पो D. 4. हिमस्य E. 5. वोषधस्य D. 6. अजपादे च बीजानां वि. ध. 7. याश्विने D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ योगदानानि

विष्णुधर्मोत्तरे —

[1]विप्लवे सर्वधान्यानां दानं सर्वाघनाशनम् ।
प्राप्ते तथान्नपानानामायुष्मति घृतस्य च ॥

कुङ्कुमस्य च सौभाग्ये यवदानं च शोभने ।
अतिगण्डे च वस्त्राणां पायसस्य तु कर्मणि ॥

धृतौ रजतदानं च शूले मूलादिदानकम् ।
गण्डे मण्डनदानं च वृद्धौ गोदानमिष्यते ॥

ध्रुवे च पञ्चरत्नानां व्याघाते फाणितस्य च ।
हर्षणे गन्धदानं स्याद्वज्रे दद्यान्मणीनपि ॥

सिद्धौ सिद्धार्थका देया व्यतीपाते तु काञ्चनम् ।
वरीयसि तिलान् दद्याद् शस्त्राणि परिघे तथा ॥

जलकुम्भाः शिवे देयाः सिद्धे सिद्धान्नमिष्यते ।
साध्येऽलङ्करणानां च छत्रदानं शुभे शुभम् ॥

शुक्ले चोपानहोर्दानं शस्तं ब्रह्मणि सर्पिषः ।
ऐन्द्रे च दीपकान् दद्याद् वैधृतौ कनकं हितम् ॥

[2]दानान्येतेषु योगेषु तथाशक्त्या द्विजोत्तमः ।
भक्तियुक्तो द्विजे दत्त्वा लोके वसति चक्रिणः ॥

इति योगदानानि ।

---

1. विष्कुम्भे दा.खं. ६१३. 2. ना दान्येतेषु D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ करणदानानि

विष्णुधर्मोत्तरे —

करणेषु प्रवक्ष्यामि दानानि द्विजोत्तमाः ।
बवे पायसदानं स्यात् सक्तुदानं च बालवे ॥

कौलवे गोरसं दद्यात्तिलान् तैतिलनामनि ।

गराभिधाने लवणं वणिजे देयमम्बरम् ।
विष्टौ च षष्टिकान्नानि शकुनौ सर्पिरेव च ॥

मधुदानं चतुष्पादे [1]शङ्खं नागे च वाससी ।
दानं प्रियङ्गोः किंस्तुघ्ने श्रेष्ठं शुल्कं द्विजोत्तमाः ॥

इति करणदानानि ।

----------(:o:)----------

1. शस्त्रं दा.खं. ८१४.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ सङ्क्रान्तिदानानि

विश्वामित्रः —

मेषसङ्क्रमणे भानोर्मेषदानं महाफलम् ।
वृषसङ्क्रमणे दानं गवां प्रोक्तं तथैव च ॥

[1]वस्त्रान्नदीपदानानि मिथुने विहितानि तु ।
घृतधेनुप्रदानं च कर्कटे परिशस्यते ॥

ससुवर्णं छत्रदानं सिंहेऽपि विहितं सदा ।
कन्याप्रवेशे वस्त्राणां [2]सुरभीणां तथैव च ॥

तुलाप्रवेशे धान्यानां बीजानामेव चोत्तमम् ।
कीटप्रवेशे वस्त्राणां वेश्मनां दानमेव च ॥

कीटो वृश्चिकः ।

धनुःप्रवेशे वस्त्राणां यानानां च महाफलम् ।
झषप्रवेशे दारूणां दानमग्नेस्तथैव च ॥

झषो मकरः ।

कुम्भप्रवेशे दानं तु गवामम्बु तृणस्य तु ।
मीनप्रवेशे स्नानानां माल्यानामपि चोत्तमम् ॥

दानान्यथैतानि मया द्विजेन्द्राः
प्रोक्तानि काले तु नरः प्रदद्यात् ।
प्राप्नोति [4]कामान् मनसस्त्वभीष्टां –
स्तस्मात् प्रशंसन्ति त्रिकालदानम् ॥

इति सङ्क्रान्तिदानम् ।

---

1. वस्त्रान्नदापाननानि D. वस्त्रान्नपानदानानि दा.खं. ८१४. 2. स्वरम्भाणां D.
3. सषप्रवेशे D. 4. कामान्नसांस्त्वभीष्टांतस्मात् D; A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ मासदानानि

वामनपुराणे —

माघे मासि तिलाः शस्तास्तिलधेनोश्च दानव ।
इध्मेन्धनादयश्चान्ये माधवप्रीणनाय तु ॥

फाल्गुने व्रीहयो गावो वस्त्रं कृष्णाजिनान्वितम् ।
गोविन्दप्रीणनार्थाय दातव्यं [1]पुरुषर्षभैः ॥

चैत्रे विचित्रवस्त्राणि शयनान्यासनानि च ।
विष्णोः प्रीत्यर्थमेतानि देयानि ब्राह्मणे तथा ॥

गन्धश्च माल्यानि तथा वैशाखे सुरभीणि च ।
देयानि द्विजमुख्येभ्यो मधुसूदनतुष्टये ॥

उदकुम्भाम्बुधेनुश्च तालवृन्तं सचन्दनम् ।
[2]त्रिविक्रमस्य प्रीत्यर्थं दातव्यं साधुभिः सदा ॥

उपानद्युगलं च्छत्रं लवणामलकानि च ।
आषाढे वामनप्रीत्यै दातव्यानि तु भक्तित[3]ः ॥

घृतं च क्षीरकुम्भश्च वृतधेनुः फलानि च ।
श्रावणे श्रीधरप्रीत्यै दातव्यानि विपश्चिते ॥

मासि भाद्रपदे दद्यात् पायसं मधुसर्षिषा[4] ।
हृषीकेशप्रीणनार्थं लवणं सगुडौदनम् ॥

---

1. भरतर्षभ दा.खं. ८१६. 2. त्रिविक्रमप्रीत्यर्थं D. 3. स्वशक्तित दा.सागरे. 4. मधुसर्पिषी दा.खं. ८१६.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तिलास्तुरङ्गवृषभा दधिताम्रायसादिकम् ।
प्रीत्यर्थं पद्मनाभस्य देयमाश्वयुजे नरैः ॥

रजतं कनकं दीपान् मणिमुक्ताफलादिकाम् ।
दामोदरस्य प्रीत्यर्थं प्रदद्यात् कार्तिके नरः ॥

खरोष्ट्राश्वतरान् नागान् [1]शकटोक्षमजाविकम् ।
दातव्यं केशवप्रीत्यै मासि मार्गशिरे नरैः ॥

प्रासादनगरादीनि गृहप्रावरणानि च ।
नारायणस्य तुष्ट्यर्थं पौषे देयानि यत्नतः ॥

[2]प्रासादसमलङ्करणमन्नं षड्रससंयुतम् ।
पुरुषोत्तमतुष्ट्यर्थं प्रदेयं सार्वकालिकम् ॥

देवीपुराणे —

मार्गे रसोत्तमं दद्याद् घृतं पौषे महाफलम् ।

रसोत्तमं लवणम् ।

तिलान् माघे मुनिश्रेष्ठ सप्तधान्यानि फाल्गुने ॥

विचित्राणि च वस्त्राणि चैत्रे दद्याद्द्विजोत्तमे ।
वैशाखे द्विजगोधूमान् ज्येष्ठे [3]तोयभृतं घटम् ॥

आषाढे चन्दनं देयं सकर्पूरं महाफलम् ।
नवनीतं नभोमासि च्छत्रं प्रोष्ठपदे परम् ॥

---

1. शूकराश्वमजावकम् दा. खं. P. ८१७. 2. प्रासादासमलकर D. दासीदासमलंकारमन्नं दा.खं. ८१७. 3. तोदयभृतं D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गुडशर्करवर्णाढ्यान् [1]लड्डुकानाश्विने मुने ।
दीपदानं महापुयं कार्तिके यः प्रयच्छति ॥

सर्वकामानवाप्नोति क्रमेणेदमुदाहृतम् ।
व्रतान्ते गां शुभां दद्यात् सवत्सां कांस्यदो[2]हनीम् ॥

सयुगां सस्रजं वत्स दापयेद्विधिनाऽमुना[3] ।
देवीं विरिञ्चिनं सूर्यं विष्णुं वाथ यथाविधि ॥

स्वभावशुद्धो विधिवत् पूजयित्वा द्विजोत्तमे[4] ।
दातव्या वीतरागे तु कामक्रोधविवर्जिते ॥

व्रतान्ते [5]मासदानरूपनियमसमाप्तौ ।

इति मासदानानि ।

——(:0:)——

1. लड्डुकानाश्विने D. 2. कांस्यदोहनाम दा.खं. ८१७. 3. मुने दा.का. पृ. २३९. 4. द्विजोत्तमम् दा.खं. ८१८. 5. मासदानरुपनियमाप्तौ D; A. व्रतान्ते मासदानाख्ये समाप्तौ नियमे तथा दा.खं. ८१८.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथर्तुदानानि

विष्णुधर्मोत्तरे —

स्नानानुलेपनादीनां वसन्ते दानमिष्यते ।
पानकानां तथां ग्रीष्मे च्छत्राणां तदनन्तरम् ॥

शरद्यन्नस्य धर्मज्ञ वस्त्राणामपि हैमने ।
[1]वह्नेर्दानं नरः कृत्वा सूर्यस्योदयनं प्रति ॥

[1]वन्हिरग्निः ।

शिशिरे सततं वह्निं तर्पयित्वा तथा तिलैः ।
कुल्माषं सघृतं दत्त्वा यथाशक्त्या द्विजातिषु ॥

कार्याग्निदीप्तिप्राकाश्यं शत्रुनाशं च विन्दति ।

कुल्साषाः स्विन्नधान्यानि । यमः —

कृशरं भोजयित्वा तु स्वशक्त्या शिशिरे द्विजान् ।
[3]दीप्ताग्नित्वमवाप्नोति स्वर्गलोकं च विन्दति ॥

इत्यृतुदानानि ।

——(:०:)——

---

1. वर्हिर्दानं दा. खं ८१९. 2. वहिर्दानं शीतापनुत्यर्थं वह्निदानम् दा. खं. ८१९. 3. दीप्त्वाग्नि D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथायनदानम्

स्कन्दपुराणे —

धेनुं तिलमयीं राजन् दद्याद्यश्चोत्तरायणे ।
सर्वकामानवाप्नोति विन्दते परमं सुखम् ॥

विष्णुधर्मोत्तरे —

उत्तरे त्वयने विप्रा वस्त्रदानं महाफलम् ।
तिलपूर्णमनड्वाहं दत्त्वा रोगैः प्रमुच्यते ॥

इत्ययनदानम् ।

———(:o:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ संवत्सरदानानि

विष्णुधर्मोत्तरे (३.३१५.२) —

संवत्सरे तु[1] दातॄणां तिलदानं महाफलम् ।
परिपूर्वे तथा दानं [2]यवानां द्विजसत्तमाः ॥

परिपूर्वे परिवत्सरे । एवमुत्तरत्रापि व्याख्येयम् ।

[3]इदा पूर्वे च वस्त्राणां धान्यानां चानुपूर्वके ॥

इत्पूर्वे रजतस्यापि दानं प्रोक्तं महाफलम् ।

[4]एते च ज्योतिश्शास्त्रे प्रसिद्धाः ॥

इति संवत्सरदानानि ।

इति श्रीकोदण्डपरशुरामेत्यादिविविधविरुदावलीविराजमानोन्नत-महाराजाधिराजश्रीशक्तिसिंहात्मजश्रीमहाराजाधिराजश्रीमदनसिंहदेवविरचिते मदनरत्नप्रदीपे दानविवेकोद्द्योते कालविशेषविहित[5]दानप्रकरणम् ॥

——(:०:)——

1. तथा दानं तिलस्य च वि. ध. (३-३१५-२). 2. यवद्विनांजसम D. 3. इदापूर्वे च वस्त्राणां धान्यमां चानुपूर्वके D. 4. इदा पूर्वे इत्यादि इदावत्सरः, अनुवत्सरः इद्वत्सरः इति संवत्सरादयश्च दा. खं. ८२०. 5. दानानि D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ प्रकीर्णकदानानि

तत्रारोग्यदानम्

नन्दिपुराणे —

धर्मार्थकाममोक्षाणामारोग्यं साधनं[1] यतः ।
अतस्त्वारोग्यदानेन नरो भवति सर्वदा ॥

आरोग्यशालां कुर्वीत महौषधिपरिच्छदाम् ।
विदग्धवैद्यसंयुक्तां भृत्यावसथसंयुताम् ॥

तथा ।

सम्यगारोग्यशालायामौषधैः स्नेहपाचनैः ।
व्याधितं विरुजीकृत्य अप्येकं करुणान्वितः ॥

[2]प्रयाति ब्रह्मसदनं कुलसप्तकसंयुतः ।

सौरपुराणे —

रोगिणां रोगशान्त्यर्थमौषधं यः प्रयच्छति ।
रोगहीनः स दीर्घायुः सुखीभवति सर्वदा ॥

स्कन्दपुराणे —

[3]अप्येकमार्तं विद्वांसं स्वस्तीकृत्य प्रयत्नतः ।
प्राप्नोति सुसहत् पुण्यमनन्वं क्षयवर्जितम् ॥

---

1. साधनैर्युतः दा. खं. 822. 2. प्रयच्चित्त A. 3. अथैक दा. खं 823.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तथा —

आकाशस्य यथा नान्तः सुरैरप्युपलभ्यते ।
तद्वदारोग्यदानस्य नान्तो विद्येत वै क्वचित् ॥

इत्यारोग्यदानम् ।

——:(0):——

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ रत्नदानम्

विश्वामित्रः —

यः प्रयत्नेन रत्नानि विप्रेभ्यः सम्प्रयच्छति ।
स सर्वगुणसम्पन्नान् पुत्रान् पौत्रांश्च विन्दति ॥

संवर्तः —

समुद्रजानि रत्नानि नरो विगतकल्मषः ।
दत्त्वा विप्राय महते प्राप्नोति महतीं श्रियम् ॥

स्कन्दपुराणे —

विद्रुमाणां प्रदानेन रुद्रलोकं व्रजेन्नरः ।
सर्वपातकनिर्मुक्तो मुक्तादानेन जायते ॥

लोकमाप्नोति दानेन नरो देवस्य[1] वज्रिणः ।
तथा प्रदत्तैर्गोमेदैर्मोदते नन्दने वने ॥

सर्वे ग्रहाः प्रतुष्यन्ति पुष्परागस्य दानतः ।
गारुत्मतैर्मरुत्वन्तं नियतं जयति श्रिया ॥

वैडूर्यैः सूर्यसालोक्यं पद्मरागैररोगताम् ।
प्रदानैरिन्द्रलोकानां नीलानां भाजनं भवेत् ॥

सुखी शङ्खप्रदानेन शक्तिः शुक्तिप्रदानतः ।

इति रत्नदानम् ।

---

1. वतस्य A. वज्रस्य दा.खं. ८२७.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथालङ्कारदानम्

[1]ब्रह्मवैवर्ते —

द्विजातिभ्यस्तु यो दद्यादलङ्कारान् समुज्ज्वलान् ।
सोऽलङ्कृतः स्वर्गलोके क्रीडत्यप्सरसां गणैः ॥

[2]अलङ्कारप्रदानेन दीर्घायुश्चैव विन्दति ।

इत्यलङ्कारदानम् ।

———(:०:)———

1. ब्रह्मथैर्वर्तो D. 2. अलङ्कारप्रदानेन सुरूपः सुभगो भवेत् दा.खं ८३०.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ वस्त्रदानम्

नन्दिपुराणे —

वस्त्रं यश्चार्थिने दद्याच्छुभं[1] वापि यदृच्छया ।
स भवेद्धनवान् श्रीमान् बृहस्पतिपुरे वसेत् ॥

विष्णुधर्मोत्तरे —

दानानामुत्तमं लोके वस्त्रदानं प्रकीर्तितम् ।
वासो हि सर्वदैवत्यं सर्वप्रायोज्यमुच्यते ॥

[2]वस्त्रदानात् सुवेषः स्याद्रूपद्रविणसंयुतः ।
युक्तो लावण्यसौभाग्यै[3]र्विरोगश्च तथा द्विजः ॥

तथा —

दत्त्वा कार्पासिकं वस्त्रं स्वर्गलोके महीयते ।
दत्त्वा सरोमं तत्राऽपि फलं दशगुणं भवेत् ॥

आविकं वसनं दत्त्वा भृगूणां लोकमाप्नुयात् ।
छागं दत्त्वाचाङ्गिरसे क्षौमं दत्त्वा बृहस्पतेः ॥

वसूनां लोकमाप्नोति कुशकौशेयवाससा[4] ।
कृमिजं च तथा दत्त्वा सोमलोके महीयते ॥

---

1. शुभ्रं दा.ख. ८३१. 2. वस्त्रादाता वि.पु. (दा.खं. ८३१) 3. त्रीरोगः दा.खं. ८३१. 4. °वारुस्त्री दा.खं. ८३२.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अग्निष्टोममवाप्नोति दत्त्वा च मृगलोमिकम् ।

तथा —

सर्वदो वस्त्रदः प्रोक्तो यतः सर्वत्र वस्त्रवान् ।
अवाप्नोति च धर्मज्ञस्तद्धि तस्माद्विशिष्यते ॥

अथ भविष्यत्पुराणे —

यो वस्त्रं भानवे दद्यादहतं च महाधनम् ।
स हेलिलोकमासाद्य वन्द्यते त्रिदशैरपि ॥

आदित्यपुराणे —

वह्नेर्वस्त्रप्रदानेन ब्रह्मलोकं प्रपद्यते ।

नन्दिपुराणे —

वासांसि सुविचित्राणि सारवन्ति बृहन्ति च ॥

स्नापितानि शिवे दद्यात् सकोशानि नवानि च ।
यावत्तद्वस्त्रतन्तूनां परिमाणं विधीयते ॥

तावद्वर्षसहस्राणि [1]स्वर्गलोके महीयते ।

स्त्रापितानि प्रक्षालितानि ।

वराहपुराणे —

क्षौमाम्बराणि यो दद्यात् पत्तोर्णानि च चक्रिणे ।
कार्पासजानि वा दद्याद्भक्तो[2] वित्तानुसारतः ॥

---

1. शिवलोके दा.खं. ८३४. 2. भक्त्या दा.खं. ८३४.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्र वाससि यावन्तस्तन्तूनां परमाणवः ।
तावद्वर्षसहस्राणि [1]विष्णुलोके महीयते ॥

देवीपुराणे —

[2]अण्डजैर्वाऽनण्डजैर्वा वस्त्रैरभ्यर्च्य शैलजाम् ।
सम्भूष्याभरणैः [3]शक्तश्चक्रवर्तित्वमाप्नुयात् ॥

अथ उष्णीषदानम् नन्दिपुराणे —

उष्णीषदायिनो मर्त्या जायन्ते [4]कुक्कुटोज्ज्वलाः ।
विस्तीर्णराजवंशेषु सितच्छत्राभ्यलक्षणाः ॥

नारदीये —

निष्काञ्चनेभ्यो दीनेभ्यः शीतवातमहातपैः ।
अर्दितेभ्यः करुणया वस्त्रमौर्णं ददाति यः ॥

न तस्य सुकृतं वक्तुं शक्यते त्रिदशैरपि ।
आधिव्याधिविनिर्मुक्तः सोऽक्षयं सुखमश्नुते ॥

इति वस्त्रदानम् ।

---

1. स्वर्मलोके दा.खं. ८३४. 2. अण्डजैर्वाण्डजैर्वापि D;A. अण्डजैर्वोर्णजैर्वापि दा.ख. पृ ८३१. 3. शक्रचक्रवर्ति D. on A. 4. मुकुटोज्ज्वलाः दा.खं. पृ. ८३६.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ शय्यादानम्

महाभारते —

शय्यामास्तरणोपेतां सुप्रच्छादनसंयुताम् ।
प्रदद्याद्यस्तु विप्राय शृणु तस्यापि यत् फलम् ॥

सुरूपः सुभगः श्रीमान् स्त्रीसहस्राभिसंवृतः ।
दशवर्षसहस्राणि स्वर्गलोके महीयते ॥

भविष्योत्तरे —

शय्यादानं [1]प्रयच्छन्ति सर्वदैव द्विजोत्तमाः ।
अनित्यं जीवितं [2]यस्मात् पश्चात् कोऽन्यः प्रदास्यति ॥

तावत् सबन्धुः सपिता यावज्जीवति भारत ।
मृतो मृत इति ज्ञात्वा [3]पश्चात् स्नेहो निवर्तते ॥

तस्मात् स्वयं प्रदातव्यं शय्याभोज्यजलादिकम् ।
आत्मैव ह्यात्मनो बन्धुरिति सञ्चिन्त्य चेतसि ॥

आत्मैव [4]यदि नात्मानं दानभोगेन पूजयेत् ।
कोऽन्यो हिततरस्त[5]स्माद्यः पश्चात् पूजयिष्यति ॥

तस्माच्छय्यां समासाद्य सारदारुमयीं दृढाम् ।
दन्तपत्रचितां रम्यां [6]हेमपट्टैरलङ्कृताम् ॥

---

1. प्रशंसन्ति D. दा.खं. ८३९ on upto. आसनरानं A. 2. यस्मात्कोन्यः पश्चात् भ. 3. क्षणात्स्नेहो भ.पु. 4. यो हि नात्मानं दानभोगौस्समर्चयेत् भ. 5. स्तस्मात्कः भ. 6. हिमपट्टैः भ.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हंसतूलीप्रतिच्छन्नां [1]शुभगण्डोपधानकाम् ।
प्रच्छादनपटीयुक्तां [2]धूपगन्धाधिवासिताम् ॥

तस्यां संस्थापयेद्धैमं हरिं [3]लक्ष्म्या समन्वितम् ।
उच्छीर्षके [4]घृतभृतं कलशं परिकल्पयेत् ॥

[5]विज्ञेयः पाण्डवश्रेष्ठ स निद्राकलशो बुधैः ।
[6]ताम्बूलकुङ्कुमक्षोदकर्पूरागरुचन्दनम् ॥

दीपिकोपानहच्छत्रं चामरासन[7]भाजनम् ।
पार्श्वेषु स्थापयेद्भक्त्या[8] सप्तधान्यानि चैव हि ॥

शयनस्थस्य भवति यदन्यदुपकारकम् ।
[9]भृङ्गारकरकाद्यं तु पञ्चवर्णवितानकम् ॥

शय्यामेवंविधां कृत्वा ब्राह्मणायोपपादयेत् ।
सपत्नीकाय सम्पूज्य पुण्येऽह्नि विधिपूर्वकम् ॥

यथा न कृष्णशयनं शून्यं सागरजातया ।
शय्या ममाप्यशून्याऽस्तु तथा जन्मनि जन्मनि ॥

दत्त्वैवं तल्पममलं प्रणिपत्य विसर्जयेत् ।
[10]एवं शय्याप्रदाने तु विधिरेष प्रकीर्तितः ॥

स्वर्गे पुरन्दरगृहे [11]सूर्यपुत्रालये तथा ।
सुखं वसत्यसौ जन्तुः शय्यादानप्रभावतः ॥

---

1. सुभगां सोपधानिकम् भ. 2. गन्धधूपाधि भ. 3. लक्ष्मीसमन्वितम् भ. 4. घृतं चौव भ. 5. विज्ञेयं पाडव सदा सनिद्राकल्पकं बुधैः भ. 6. ताम्बूलं भ. 7. भोजनम् भ. 8. च्छक्त्या भ. 9, भृङ्गारकाद्यपुष्पाणि भ. 10. एकादशाहेऽवि तथा भ. 11. सूर्यपूत्रालयेऽथ वा भ.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पीडयन्ति न तं याम्याः पुरुषा भीषणाननाः ।
विमानवरमारूढं सेव्यमानोऽप्सरोगणैः ॥

आभूतसम्प्लवं यावत् तिष्ठेत् पातकवर्जितः ।

शय्याप्रदानममलं तव पाण्डुपुत्र
सङ्कीर्तितं सकलसौख्यनिधान[1]भूतम् ।
[2]यो वै ददाति विधिवत् स्वयमेव नाके
[3]कल्पं विकल्परहितः स विभाति [4]मर्त्यः ॥

इति शय्यदानम्

———(:०:)———

1. मेतत् भ. 2. तयो भ. 3. तल्पे भ. 4. सत्यम् भ.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथासनदानम्

स्कन्दपुराणे —

[1]आसनं तु प्रयच्छेद्यः प्रयच्छति च भक्तितः ।
स दिव्यभोगसंभोगमनोगः सर्वदाऽश्नुते ॥

इत्यासनदानम् ।

———(०)———

1. आसनं यः D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ चामरदानम्

महाभारते —

यस्तु दद्याद् द्विजाग्र्येभ्यो भक्त्या चामरमुज्ज्वलम् ।
स [1]भूपत्वमवाप्नोति निःशेषेऽवनिमण्डले ॥

इति चामरदानम् ।

———(: • :)———

1. भौपत्वं दा. खं 843.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ वितानदानम्

पद्मपुराणे —

चन्द्रोदयं तु यो भक्त्या प्रयच्छति सुपुण्यधीः ।
न तस्य श्रेयसामन्तः कदाचिदपि जायते ॥

चन्द्रोदयो वितानम् ।

इति वितानदानम् ।

—:o:—

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ गन्धद्रव्यदानम्

स्कन्दपुराणे —

नरः [1]सुवर्णदेहत्वं गन्धदानादवाप्नुते ।
भोगवान् जायते नित्यं शरीरं नाऽस्य तप्यति ॥

विष्णुधर्मोत्तरे —

सौभाग्यकारकं प्रोक्तं प्रदानं कुङ्कुमस्य तु ।
तथा कर्पूरदानेन सर्वान् कामानवाप्नुयात् ॥

मृगदर्पप्रदानेन यशसा [2]भुवि राजते ।
यक्षकर्दमदानेन साम्राज्यं प्राज्यमश्नुते ॥

इति गन्धद्रव्यदानम् ।

——(:•:)——

1. सुगन्धदेहत्वं दा. खं. 844. 2. भुवि राजते D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ ताम्बूलादिदानम्

ब्रह्माण्डपुराणे —

ताम्बूलं चोज्ज्वलं दद्याद्यो [2]विप्रेभ्यः समाहितः ।
शिवाय केशवायाथ नागलोके स पूज्यते ॥

[3]स्कन्दपुराणे —

ताम्बूलं ब्राह्मणेन्द्राय यो दत्त्वा प्राक् तु भक्षयेत् ।
सुरूपो भोगवान् दक्षो भवेज्जन्मनि जन्मनि ॥

नन्दिपुराणे —

धूपदः सुरभिर्नित्यं पुष्पदः सुभगः सदा ।
तस्माद्देवाय विप्राय दातव्यं तद् सुखार्थिभिः ॥

विष्णुधर्मोत्तरे —

देवताग्रे द्विजाग्रे वा नित्यं नृत्यं समाचरेत् ।
विनोदयन्ति तं स्वर्गे [4]नित्यमप्सरसां गणाः ॥

यो गीतवाद्यनृत्यादि मूल्यं दत्त्वा तु कारयेत् ।
स शक्रभवने तिष्ठेद्यावदाभूतसम्प्लवम् ॥

इति ताम्बूलादिदानम् ।

---

1. Added दा. खं. 845. om A. 2. विप्रेभ्यासुसमाहितः D. 3. om A.
4. मप्सतांगणाः D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथोपानच्छत्रदानम्

बृहस्पतिः ---

असिपत्रवनं मार्गं[1] क्षुरधारासमन्वितम् ।
तीक्ष्णातपं च तरति छत्रोपानत्प्रदो नरः ॥

महाभारते --

उपानहौ प्रयत्नाद्यो ब्राह्मणेभ्यः प्रयच्छति ।
मर्दने कण्टकान् सर्वान् विषमान् सन्तरत्यपि ॥

तत्रैव सूर्येण जमदग्नेरुपदेशे —

तस्मात् प्रयच्छ विप्रेभ्यः छत्रोपानहमुत्तमम् ।
धर्मस्ते सुमहान् भावी न सेऽत्रास्ति विचारणा ॥

देवलः —

छत्रदश्छायया याति यानेनोपानहप्रदः ।

इत्युपानच्छत्रदानम् ।

———(:o:)———

1. मार्गं दा. खं. 848. चत्रोद्यानतदे नरः D. 3. सन्तरत्यपि D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ भाजनदानम्

स्कन्दपुराणे —

भाजनं यः प्रयच्छेत्तु हैमं रत्नविभूषितम् ।
सोऽप्सरःशतसङ्कीर्णे विमाने दिवि मोदते ॥

राजतं यः प्रयच्छेत्तु विप्रेभ्यो भाजनं शुभम् ।
स गन्धर्वपदं प्राप्य उर्वश्या सह मोदते ॥

ताम्रं यो भाजनं दद्याद् ब्राह्मणेभ्यो विशेषतः ।
स भवेद् यक्षराजस्य प्रभुर्बलसमन्वितः ॥

ब्रह्मपुराणे —

औदुम्बराणि भाण्डानि यो दद्यादायसानि वा ।

औदुम्बराणि ताम्रमयानि ।

महतीं [1]वृद्धिमाप्नोति दुर्लभां त्रिदशैरपि ॥

इति भाजनदानम् ।

———(०)———

1. महतीमृद्धि दा. खं. 852.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथापाकदानम्

भविष्योत्तरे —

[1]भगवानुवाच —

आपाकाख्यं महादानं कथयामि युधिष्ठिर ।
दत्तेन येन कामानां पुमान् भवति भाजनम् ॥

प्रहतारावलं लब्ध्वा [2]कुम्भकारं प्रपूजयेत् ।
वासोभिर्भूषणैश्चैव [3]पुष्पैश्चागुरुचन्दनैः ॥

[4]ब्रूयात्तथेदं सामान्यं यथा तुष्टोऽभिजायते ।
कुरुष्व[5]त्वं मे भाण्डानि गुरूणि च लघूनि च ॥

मणिकादीनि शुभ्राणि स्थालीश्च सुमनोहराः ।

घटकान् करकांश्चैव [6]प्रणीताः कुण्डकानि च ।
शरावादीनि पात्राणि [7]भाण्डान्युच्चावचानि च ॥

अलिञ्जरा प्रतिघटा मन्थनीकडहानि च ।
एवमन्यच्च यत् किञ्चिदुपभोग्यं भवेद् गृहे ॥

सम्पादय महाभाग विश्वकर्मा त्वमेव हि ।
भा[illegible]वोऽपि प्रयत्नेन [8]भाण्डौघैरन्वितं शुभम् ॥

---

1. श्रीकृष्ण उवाच भ. पु. 2. कुभकारं D. भार्गवं पूजयेच्छुभम् भ.पु. 3. पुष्पैः च गुरुचन्दनैः D. पुष्पैरगरुचन्दनैः भ.पु. 4. कुर्यात्तथेदं भ. 5. कुरुष्वत्व मे भाण्डानि भ. 6. गलन्त्यः कुण्डलानि च भ. 7. भाण्डान्युच्चावचं बहु भं.पु. 8. नानाभाण्डान्वितं शुभम् भ..

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आपाकं [1]कल्पयेदेवं विधिदृष्टेन कर्मणा ।

भार्गवः कुम्भकारः ।

सहस्रमेकं भाण्डानां स्थापयित्वा विचक्षणः ॥

सन्ध्याकाले [2]मथित्वा तु दद्यादथ हुताशनम् ।
रात्रौ जागरणं कुर्याद् गीतमङ्गलनिःस्वनैः ॥

ततः प्रभाते विमले ज्ञात्वा निर्वापितं शनैः ।
रक्तवस्त्रैः [3]समाच्छाद्य पुष्पमालाभिरर्चयेत् ॥

यजमानस्ततः स्नात्वा शुक्लाम्बरधरः शुचिः ।
हैमरौप्याणि भाण्डानि ताम्रलोहमयानि च ॥

परितः स्थापयित्वा च स्वशक्त्या [4]वाऽपि षोडश ।
[5]तानि चत्वारि चत्वारि न्यसेत् पूर्वादितः क्रमात् ॥

पूजयित्वा प्रयत्नेन कृत्वा चारुप्रदक्षिणाम् ।
ब्राह्मणान् पूजयित्वा च भार्गवं चापि [6]यत्नतः ॥

नारीश्चाविधवास्तत्र समानीय [7]प्रपूजयेत् ।
प्रदक्षिणं ततः कृत्वा मन्त्रेणानेन पूजयेत् ॥

आपाक ब्रह्मरूपोऽसि भाण्डानीमानि जन्तवः ।
प्रदानात्ते प्रजापुष्टिः [8]सर्वत्रास्तु ममाक्षया ॥

भाण्डरूपाणि यान्यत्र कल्पितानि मया किल ।
भूत्वा [9]सत्त्वानि रूपाणि उपतिष्ठन्तु तानि वै ॥

---

1. कल्पयेद्दिव्यं भ. 2. ज्वलित्वा तु दद्याच्चाधिहुताशनम् भ. 3. समासाद्य D. 4. तानि दा. खं. P. 833. 5. श्लोकार्धमिदं नास्ति भ. 6. प्रयत्नतः D. 7. प्रपूज्य च भ. 8. स्वर्गश्चास्तु ममाक्षयः भ. दा.खं. 857. 9. सम्पात्ररूपाणि भ. सत्त्वानुरूपाणि दा. खं 857.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दानवाक्यं तु —

ओं अद्येत्यादि इममापाकं नानाभाण्डनिर्मितं यथोपक्लृप्तहेमादिपात्रसहितं विष्णुदैवतं सौभाग्यावैधव्यसर्वगुणोपेतभृत्यमित्रजनयुतगृहसदाभर्त्रवियोगसदासुखानुत्तमरूपावाप्तिकामोऽहं नानाजनेभ्य उत्सृजामीति दत्त्वा यथाशक्ति सुवर्णादिदक्षिणा देया ।

[1]यो ह्यर्थी येन भाण्डेन तत् तस्य प्रतिपादयेत् ।
स्वेच्छया चैव [2]गृह्णातु न [3]निवार्यस्तु कश्चन ॥

अनेन विधिना यस्तु दानमेतत् प्रयच्छति ।
विश्वकर्मा भवेत्तस्य जन्मत्रयं नृप ॥

नारी च दत्त्वा सौभाग्यमतुलं प्रतिपद्यते ।
गृहं सर्वगुणोपेतं भृत्यमित्रजनैर्युतम्[4] ॥

अवियोगं सदा भर्त्रा रूपं चानुत्तमं लभेत् ।
[5]प्रदानमेतन्निर्दिष्टं प्रकारेण तथानघ ॥

भिद्यते बहुभिर्भेदैर्भूमिरेषा नरोत्तम ॥

निष्पाद्य [6]भाण्डनिचयं प्रवरं प्रयत्नाद्
[7]आपाकदानमिह या कुरुते वरस्त्री ।
सा पुत्रपौत्रपशुवृद्धिसुखानि लब्ध्वा
[8]प्रेत्यापि भर्तृसहिता सुखिनी सदाऽस्ते ॥

इत्यापाकदानम् ।

---

1. यो ह्यर्थी येन भांजेन D. या च यद्भाण्डमादत्ते तस्यै तद्दापयेत्ततः भ. 2. गृह्णन्तु D. 3. निवार्यास्तु कश्चन भ. 4. र्युतम् भ. 5. भूदानमेत भ. 6. भाण्डनिचयोच्चतरं भ. 7. दापाके D. 8. प्रेत्य स्वभर्तु भ.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथान्नदानम्

अन्नदः प्राणदः प्रोक्तः प्राणदश्चापि सर्वतः ।
तस्मादन्नप्रदानेन सर्वदानफलं लभेत् ॥

धर्मार्थकाममोक्षाणां देहः[1] परमसाधनम् ।
स्थितिस्तस्यान्नपानाभ्यां मनस्तत् स्वर्गसाधनम् ॥

अन्नं प्रजापतिः साक्षादन्नं विष्णुः शिवः स्वयम् ।
तस्मादन्नसमं दानं न भूतं न भविष्यति ॥

ब्रह्मवैवर्ते —

तस्मादहरहर्देयमन्नमेव विचक्षणैः ।
अपरीक्ष्यैव सर्वेभ्य इति स्वायम्भुशासनम् ॥

तथा —

आममन्नं गृहस्थाय नैव पक्वं कदाचन ।
नाभ्यगाय निषिद्धं तदिति देवोऽब्रवीद्धरिः ॥

अभ्यगाय न निषिद्धम् ।

विष्णुधर्मोत्तरे —

नात्र पात्रपरीक्षा स्यान्न कालनियमस्तथा ।
न च देशः परीक्ष्योऽत्र देयमन्नं सदैव तत् ॥

---

1. अन्नं दा.खं. पृ. ८९५. 2. साधनम् D.A. सर्वसाधनम् दा.खं.पृ. ८९७.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्वभ्यश्च श्वपचेभ्यश्च पतितेभ्यस्तथैव च ।
कृमिकीटपतङ्गेभ्यो देयमन्नं सदैव तु ॥

यस्यान्नेनोदरस्थेन ब्राह्मणः प्रीयते द्विजाः ।
तांतु योनिमवाप्नोति नात्र कार्या विचारणा ॥

भक्ष्यदः स्वर्गमाप्नोति शक्रलोकं तु भोज्यदः ।
लेह्यदोऽप्सरसां लोकं वसूनामपि चोष्यदः ॥

वारुणं लोकमाप्नोति तथा पानप्रदो नरः ।
परमान्नप्रदानेन तृप्तिर्भवति शाश्वती ॥

ब्रह्माण्डपुराणे —

यस्य ह्यन्नमुपाश्नाति ब्राह्मणानां शतं सदा ।
हृष्टेन मनसा दत्तं न स तिर्यग् तिर्भवेत् ॥

यस्यान्नपान[3]पुष्टाङ्गो लभते पुण्यसञ्चयम् ।
अन्नप्रदातुस्तस्यार्धं [4]कर्तुश्चार्धं न संशयः ॥

ब्राह्मणानां सहस्राणि दश भोज्य नरर्षभ ।
नरोऽधर्मात् प्रमुच्येत पापेष्वपि रतः सदा ॥

भोजयित्वा दशशतं नरो वेदविदां नृप ।
न्यायविद्वेदविद्वुषां स्मृतिभाष्यविदां तथा ॥

न याति नरकं घोरं संसारं न च सेवते ।
पापं गृही क्षालयति [5]ददद् भिक्षां दिनं प्रति ॥

ग्रासमात्रा भवेद्भिक्षा सा नित्या तत्र दीयते ।
तद्गृहं गृहमन्यत्र श्मशानमिव दृश्यते ॥

---

1. क्रिमिकीटपतङ्गानां वि.पु. 2. ब्राह्मण प्रीयो A. 3. पुष्ट्याष्टागो D. 4. कर्तुश्चाद्धानन संशयः D. 5. °पुपश्नन्ति ब्राह्मणानां शतं समाः दा. खं. P. ८९९ 6. तिर्यगांतिर्भवेत् D.. 7. ददद्भिक्षांदिनं प्रति D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्कान्दे —

एकं पाशुपतं भक्त्या भोजयित्वा प्रणम्य च ।
नानाविधैर्महाभक्ष्यैर्विहायसि स मोदते ॥

देवलः —

मृष्टमन्नं स्वयं भुक्त्वा पश्चात् कदशनं लघु ।
ब्राह्मणान् भोजयेन् मूर्खो निरये चिरमाविशेत ॥

... ... भिक्षां यतिभ्यो न प्रयच्छति ।
विमुक्तः सर्वपापेभ्यो नाऽसौ मुक्तिमवाप्नुयात् ॥

व्यासः —

यस्त्वेकपङ्क्त्यां [1]विषमं ददाति
स्नेहाद्भयाद्वा यदि वाऽर्थहेतोः ।
दैवैश्च दृष्टा मुनिभिः प्रगीता
तां ब्रह्महत्यां मुनयो वदन्ति ॥

इत्यन्नदानम् ।

———(:०:)———

1. विषमं D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथामान्नदानम्

विष्णुधर्मोत्तरे —

धान्यानामुत्तमं दानं [1]कथितं मुनिपुङ्गवाः ।
[2]धान्येभ्योऽपि परं धान्यं रक्तशालिः प्रकीर्तितम् ॥

[3]षष्टिकान्नप्रदानेन लोकं नैर्ऋतिकं लभेत् ।
सर्वीपाचणकं दत्त्वा लोकं [4]वारुणमाप्नुयात् ॥

वायव्यं च मसूराणि राजमाषाणि धानदम् ।

धानदं कौबेरम् ।

[5]अन्येषां शिम्बिधान्यानां दानात् स्वर्गमवाप्नुयात् ॥

काष्ठशालिं तथा दत्त्वा [6]अलकायां [7]प्रमोदते ।
रक्तशालिं नगे दत्त्वा सूर्यलोके महीयते ॥

दत्त्वा तथा [8]सुगन्धांश्च गन्धर्वैः सह मोदते ।
यवप्रदानेन नरः शक्रलोके महीयते ॥

यथा गोधूमदानेन वसूनां लोकमाप्नुयात् ।
प्रियो भवति लोकस्य प्रियङ्गुं यः प्रयच्छति ॥

---

1. वदन्ति द्विजपुङ्गवाः D.A. द्विजपुंगवैः दा.खं. ९०२. 2. धान्येभ्योपि परं दानं रक्तशालेः प्रकीर्तितम् D; A. 3. रक्तशालि दा.खं ९०२. 4. वारुपामाप्नुयात् D. 5. अन्येषाशिविधान्यानां D.A. 6. प्रलकायां D. 7. प्रसीदति वि. 8. सुगन्धाढ्यं D.A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ददाति यस्तु [1]श्यामाकांस्तस्य प्रीणन्ति देवताः ।
मुदः शक्रलोकं तु [2]मलोकं तु माषदः ॥

यथेष्टं लोकमाप्नोति तथा [3]विप्रास्तिलप्रदः ।

पक्वान्नदानात् फलदं [3]त्रिलोके
शुक्लान्नमुक्तं [4]हितदाप्तिरस्मात् ।
यजन्ति [5]यज्ञैश्च ततो द्विजेन्द्राः
[6]तस्मात्तु तत् पुण्यतमं प्रदिष्टम् ॥

इति आमान्नदानम् ।

———(:o:)———

1. श्यामाकं तस्य प्रीयन्ति वि.ध. 2. विद्याः D.A. 3. नृलोके वि.
4. तदप्य यस्मात् वि. 5. यज्ञैस्सततं वि. 6. स्तस्माच्च वि.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ धर्मघटदानम्

विष्णुः —

शीतलेन सुगन्धेन वारिणा पूरितं घटम् ।
शुक्लचन्दनदिग्धाङ्गं [1]पुष्परागोपशोभितम् ॥

[2]दध्योदनभृतं कुर्याच्छरावं तस्य चोपरि ।
उपानच्छत्रसंयुक्तं धर्माख्यं कल्पयेद् घटम् ॥

पुष्पाक्षतं गृहीत्वा तु इमं मन्त्रमुदीरयेत् ।

ॐ नमो विष्णुरूपाय नमः सागरसम्भव ।
अपां पूर्णोद्धरास्मांस्त्वं दुःखसंसारसागरात् ॥

उदकुम्भो मया दत्तो ग्रीष्मकाले दिने दिने ।
उदकुम्भप्रदानेन प्रीयतां मधुसूदनः ॥

भविष्योत्तरे —

प्रत्यहं धर्मघटको [3]वस्त्रसंवेष्टितो नवः ।
ब्राह्मणस्य गृहे नेयः शीतामलजलः शुचिः ॥

वसन्तग्रीष्मयोर्मध्ये यः पानीयं प्रयच्छति ।
पले पले सुवर्णस्य फलमाप्नोति मानवः ॥

---

1. पुष्पदामोपशोभितं दा.खं. ९०७. पुष्परामोपशोभितं D. 2. दध्योधनमृतं D. 3. कर्पटावेष्टिताननः भ. वस्त्रसंवैष्टिताननः दा.खं. ९०७.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मार्गशीर्षात् समारभ्य उदकुम्भं तु यः क्षिपेत् ।
*दिने दिने सहस्रस्य गवां पुण्यफलं लभेत् ॥

तस्यैवोपायनं कार्यं मासि मासि नृपोत्तम ।
[1]मण्डकावेष्टकाभिश्च रसैर्न्नैश्च कामिकैः ॥

उद्दिश्य शङ्करं विष्णुं [2]ब्रह्माणमथ वा पितॄन् ।
सतिलं प्रोक्षयित्वा तु मन्त्रेणानेन मानवः ॥

एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ।
अस्य [3]प्रदानात् सततं मम सन्तु मनोरथाः ॥

अनेन विधिना यस्तु धर्मकुम्भं प्रयच्छति ।
[4]वसन्तग्रीष्मसमये प्रपादानफलं लभेत् ॥

इति धर्मघटदानम् ।

----(:o:)----

1. *नास्ति भ. मण्डकावेष्टिकाभिश्च पक्वान्नैः सर्वकामिकैः भ. 2. ब्रह्माणं कुरुनन्दन भ. 3. °सादात् D; A दा.खं. ९०७. 4. प्रपादानफलं सोऽपि प्राप्नोतीह न संशयः भ.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथाश्वत्थसेवनम्

भविष्योत्तरे —

उदकुम्भप्रदानेऽपि ह्यशक्तो यः पुमान् भवेत् ।
तेनाश्वत्थतरोर्मूले सेव्यं नित्यं [1]यतात्मना ॥

[2]सर्वपापप्रशमनं सर्वदुःख[3]प्रनाशनम् ।
सर्वरोगप्रशमनं नित्यं सन्ततिवर्धनम् ॥

[4]अश्वत्थरूपी भगवान् प्रीयतां मे जनार्दनः ।
इत्युच्चार्य नमस्कृत्य प्रत्यहं पापनाशनम् ॥

यः करोति तरोर्मूले सेकं मासचतुष्टयम् ।
सोऽपि तत् फलमाप्नोति श्रुतिरेषा सनातनी ॥

इत्यश्वत्थसेवनम् ।

—:(o):—

---

1. जितात्मना दा.खं. ९०७. 2. सर्वप्रपापशनं D. 3. प्रनाशनं D.
4. अश्वत्थरूपो दा.खं. ९०८.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ तरुपुत्रकविधिः

नन्दिपुराणे--

तरुपुत्रं तु यः कुर्याद्विधिवद्वह्निसन्निधौ ।
स महापातकैर्मुक्तः समुद्धृत्य कुलत्रयम् ॥

नरकेभ्यो नरो याति प्रजापतिपुरं शुभम् ।

पद्मपुराणे--

अपुत्रस्य च पुत्रत्वं पादपा इह कुर्वते ।
यच्छन्ति रोपकेभ्यस्ते सत्तीर्थे तर्पणादिकम् ॥

तीर्थे पुत्रसहस्राणामेक एव करिष्यति ।

पुत्रसहस्राणां कर्तव्यमिति शेषः ।

धनी चाश्वत्थवृक्षेण ह्यशोकः शोकनाशनः[1] ॥

वृक्षो यज्ञप्रदः प्रोक्तश्चिञ्चा चायुःप्रदा स्मृता ।
जम्बूकी कन्यदा प्रोक्ता भार्यादा दाडिमी तथा ॥

[2]अरलू रोगनाशाय पलाशो ब्रह्मदस्तथा ।
प्रीतत्वं जायते पुंसो रोपयेद्यो बिभीतकम् ॥

कक्कोलैः कुलवृद्धिः स्यात् खदिरे चाप्यरोगता ।

---

1. शोकनाशकः दा.का. ३०७. 2. अरणू दा.का. ३०७.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निम्बप्ररोपको यस्तु तस्य तुष्टो दिवाकरः ।
श्रीवृक्षे शङ्करो देवः पाटलायां तु पार्वती ॥

शिंशपायामप्सरसः कुन्दे गन्धर्वसत्तमाः ।
तितिलीके दासवर्गो वकुलो दस्युदस्तथा ॥

तित्तिलीकोऽम्लवृक्षः ।

[1]पण्यस्त्रीदायकश्चैव चन्दनः [2]शोकनाशनः ।

तथा—

सौभाग्यदश्चम्पकश्च कदीरः पारदारिकः ॥

अपत्यनाशकस्तालो [3]शिंशपः कुलवर्धनः ।
बहुभार्या [4]नारिकेली चेक्षुः सर्वाङ्गसुन्दरः ॥

[5]सुखप्रदा तथा केली मोचकी शत्रुनाशनी ।

मोचकी शाल्मलिः ।

इत्यादयस्तथा चान्ये ये नोक्तास्तेऽपि दायकाः ॥

प्रतिष्ठां ते गमिष्यन्ति ये नरा वृक्षदायकाः ।

स्कन्दपुराणे —

महादेवो महादेवीमिदं वचनमब्रवीत् ।
शृणुष्व येन विधिना गृह्यतेऽवनिजः सुतः ॥

---

1. पुण्यस्त्रीदायकश्चैव दा.का. ३०८ दा.खं. ९३५. 2. पनसस्तथा दा.का. ३०८ दा.खं. ९३५ 3. नादेयः दा. का. ३०८ दा. खं. ९३५ 4. नारिकेरी D. 5. रतिप्रदा दा.का. दा.खं.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अवनिजो वृक्षः ।

सुपुत्रार्थं भूमिरुहं ग्रहीष्यामीति पार्वति ।
सोपवासा भवेन्नारी [1]शुचिचित्ता शुचिव्रता ॥

ततश्चैव सहस्रांशावस्तशृङ्गं गते रवौ ।
उदिते विमले चन्द्रे तथैन्द्रविन्दुसन्निभे ॥

विप्रानामन्त्रयेद्रात्रौ पावनान् वेदवादिनः ।
विप्रानामन्त्रयित्वा तु शुचिवस्त्रा शुचिव्रता ॥

शयीत सनमस्कारा सदर्भा भूमिमाश्रिता ।
गमयित्वा तथा रात्रिं सवितर्युदिते सति ॥

भक्ष्यभोज्यं समादाय व्रजेद्यत्र भवेत्तरुः ।
तत्र तं [2]स्नापयित्वा तु सातःत्रं सुभूषणम् ॥

तं तरुं तरुणीकृत्य ततश्छायानुगामिनः ।
यथोपपन्नमन्नं तान् भोजयित्वा द्विजांस्ततः ॥

पुण्याहं वाचयित्वा तु ऋत्विग्भिरथवात्मना ।
तृप्तानां ब्राह्मणानां वै चैतत् ते कृत्यमात्मनः ॥

निवेद्य कृतमुद्दिश्य सद्भावेन परेण ह ।
अपुत्रा भगवन्तोऽहं पुत्रप्रतिकृतिं तरुम् ॥

ग्रहीष्यामि ममानुज्ञां कर्तुमर्हथ सत्तमाः ।

पुत्रप्रतिकृतिं पुत्रसदृशम् ।

---

1. शुचिवृत्ता दा.का. ३०९. 2. स्थापयित्वा A. 3. तद्वेलाकृतमात्मनः दा.का. ३६९.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ततस्तैरनुज्ञातं भूमिजं तरुणायुषम् ।
भूमिदेवसमक्षं वै गृह्णीयात् तन्त्रं प्रिये ॥

तरुणायुषि वर्तमान इति शेषः ।

अनेन विधिना यस्तु गृहीततरुपुत्रकः ।
पितॄणां निरयस्थानां मधुधारां स वर्षति ॥

गृहीतो विधिनाऽनेन [1]सुभ्रु भूमिरुहात्मजः ।
शुभावहो हि भवति विपरीते तु दुःखदः ॥

सत्पुत्राणां शतं चापि पीनश्रोणीपयोधरे ।
एकोऽपि भूरुहः श्रेष्ठः पुत्रत्वे कल्पितः [2]शुभः ॥

इति तरुपुत्रग्रहणविधिः ।

———(:०:)———

1. शुभ° दा.खं. 2. सुतः दा.का. दा.खं. ४५६.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथाश्वत्थोपनायनम्

तत्र शौनकः —

शौनकोऽहं प्रवक्ष्यामि अश्वत्थस्योपनायनम् ।
स्थापनादष्टमे वर्षे द्वादशेकादशेऽथ वा ॥

शस्ताः कालास्त्रयस्तेषु कुर्यात्तस्योपनायनम् ।
तत्रोत्तरायणं श्रेष्ठं गुरौ शुक्रे प्रकाशिते ॥

माघफाल्गुनयोः [1]कुर्याच्चैत्रवैशाखमासयोः ।
मलमासेऽधिमासे च न कुर्यान्मौञ्जिबन्धनम् ॥

तत्तत्स्थानीयतया तत्तद्वर्णतायतौ तत्तद्वर्णवटसंस्कारकालस्यैवोचितत्वात् । अत एव शूद्रादियजमानकाश्वत्थसंस्कारे पौराणिकाराम्प्रतिष्ठामात्रमेव कर्तव्यं नोपनयनम् । शूद्रसम्बन्धिनस्तस्य प्रागुक्तन्यायेनोपनयनसंस्कारानर्हत्वादिल्लभियुक्ता आहुः ।

न कुर्याच्छेदितश्वत्थे विद्युद्वाग्निना हते ।
उपनयनं प्रकुर्वीत स्कन्धपर्णाङ्कुरान्विते ॥

शुक्लपक्षे शुभर्क्षे च सुवारतिथिलग्नके ।
चन्द्रानुकूल्ये कर्तुश्च दिवा कुर्यात् प्रयत्नतः ॥

अत्र दिवेति पूर्वाह्णस्योपलक्षणम् ।
'अपराह्णे चोपनीतः पुनः संस्कारमर्हति'
इति वाक्यात् —

---

1. कुर्याच्चैत्रे वैशाखमासयोः D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दन्तानां धावनं कृत्वा कर्ता स्नात्वा सचैलकम् ।
कृत्वा च नित्यकर्माणि पूजयित्वेष्टदेवताम् ॥

नान्दीश्राद्धं प्रकुर्वीत गृहे पुण्याहपूर्वकम् ।

नान्दीश्राद्धपुण्याहवाचनयोः प्रयोगः तुलापुरुषदाने द्रष्टव्यः ।

तस्मिन्नेव दिने कर्ता चान्नहेमफलादिभिः ।
कृत्वाशीर्वचनं गृह्य ततो गच्छेत् समाहितः ॥

तूर्यघोषैश्च विविधैः पुण्यस्त्रीभिः समन्वितः ।
ब्राह्मणैर्वेदघोषैश्च पुण्यवादित्रनिस्वनैः ॥

वस्त्रयज्ञोपवीतादीन् मौञ्जीदण्डाजिनादिकान् ।
पूजाद्रव्यं च हौम्यं च गृहीत्वाऽश्वत्थसन्निधौ ॥

गत्वा प्रक्षालिताङ्घ्रिश्च ह्याचम्योपविशेद् भुवि ।
पञ्चहस्तं द्विहस्तं वा गोमयेनोपलिप्य च ॥

धातुपिष्टेन सम्पूज्य रङ्गमालिकया तथा ।
अश्वत्थेशानदिग्भागे कृत्वा पुण्याहवाचनम् ॥

आचार्यं वरयेत् पश्चाद् ब्राह्मणं वेदपारगम् ।
आचारवन्तं धर्मज्ञं कुलीनं च कुटुम्बिनम् ॥

सर्वावयवसम्पूर्णं रागदोषविवर्जितम् ।
शान्तं तपस्विनं दान्तं सर्वप्राणिहिते रतम् ॥

वस्त्रोपवीतगन्धाद्यैरङ्गुलीयककुण्डलैः ।
[1]कर्ता तं पूजयेद् भक्त्या वित्तशाठ्यं न कारयेत् ॥

---

1. कर्तारं D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तेनैव कारयेद् विद्वानश्वत्थस्योपनायनम् ।
कुर्यात् पञ्चामृतैः स्नानं तत्तन्मन्त्रैः पृथक् पृथक् ॥

अश्वत्थपूर्वदिग्भागे होमं कुर्यात् स्वशाखया ।
उपलेपादिकं तत्र चक्षुष्यं तं प्रकल्प्य च ॥

वस्त्रयुग्मं ततो दद्याद् युवं वस्त्राणि मन्त्रतः ।
यज्ञोपवीतं दद्यात्तु यज्ञोपवीतमित्यपि ॥

मेखलां च त्रिरावेष्ट्य प्रावेपामेति मन्त्रतः ।
तूष्णीं कृत्वाऽजिनं दण्डं [1]प्रदद्याद्धि यथाक्रमम् ॥

गन्धपुष्पाक्षतैः पुष्पैरश्वत्थस्य च पश्चिमे ।
अश्वत्थे वो निषदनम् इत्यृचा पूजयेत् सुधीः ॥

ॐ भूर्भुवः स्वःपूर्वां तु गायत्रीं त्रिर्जपेदथ ।
निरीक्षेताक्षयाश्वत्थं देवस्य त्वेति मन्त्रतः ॥

आत्वेति द्व्यृचसूक्तेन व्याहृतीभिस्तृचेन च ।
अश्वत्थनाम उच्चार्य विभक्त्या तु द्वितीयया ॥

शलाकया सुवर्णेन स्थापयामि पदं वदेत् ।
कृत्वा स्विष्टकृतं पश्चाद्धोमशेषं समापयेत् ॥

गन्धाक्षतैर्विष्णुपुष्पैर्धूपदीपोपहारकैः[2] ।
भक्त्याद्यैः फलताम्बूलैस्तथाश्वत्थं प्रपूजयेत् ॥

पुरस्तादुपरिष्टाच्च दत्त्वा व्याहृतिभिः क्रमात् ।
जुहुयादाज्यमग्नौ तु अग्न आयूंष्यनुक्रमात् ॥
समिद्भिश्चरुणा चैव पालाशीभिः पृथक् पृथक् ।
हुत्वा द्वादशभिः सम्यगेवं कृत्वा समाहितः ॥

---

1. प्रदध्याद्धि D. 2. °कारकैः D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अश्वत्थपश्चिमे देशे प्राङ्मुखश्चोपविश्य च ।
दक्षिणेनैव हस्तेन स्पृष्ट्वाऽश्वत्थं समाहितः ॥

धेनुं पयस्विनीं दद्यादाचार्याय सवत्सकाम् ।
अश्वत्थाच्छादनवस्त्रमाचार्याय प्रदापयेत् ॥

अन्येषामपि विप्राणां स्वशक्त्या पूजनं ततः ।
ब्राह्मणे दक्षिणां दद्याद्वित्तानुसारतः ॥

ब्राह्मणान् भोजयित्वाष्टौ भुञ्जीयाद् बन्धुभिः सह ।
एवं यः कुरुते भक्त्या अश्वत्थस्योपनायनम् ॥

कुलकोटिं समुद्धृत्य विष्णोः सायुज्यमाप्नुयात् ।

इति शौनकीये अश्वत्थोपनयनविधिः ।

——: o :——

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथाश्वत्थोपनयनप्रयोगः

यजमानः कृतावश्यकशौचाचमनादिः दन्तप्रकोष्ठेन

आयुर्बलं यशो वर्चः प्रजापशुवसूनि च ।
ब्रह्म प्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥

इति मन्त्रेण दन्तधावनं विधाय जिह्वां चोल्लिख्य सचैलं[1] नद्यादौ स्नात्वा शुक्लाम्बरमाल्यादिधरः कृतनित्यक्रियो देवपूजातः प्राङ्मुखः सपवित्रोपग्रहकरः शुद्धासने उपविश्य कुशजलतिलयवानादायाद्येत्यादिदेशकालकीर्तनान्ते सकलपापक्षयकुलकोटिसमुद्धरणपूर्वकविष्णुसायुज्यप्राप्तिकामोऽश्वत्थोपनयनमहं करिष्य[2] इति सङ्कल्प्याऽश्वत्थसूक्तेन व्याहृतित्रयेण च अश्वत्थं स्थापयामीति स्वर्णशलाकाश्वरुणा चेति क्रमेण वक्ष्यमाणैर्द्वादशमन्त्रैः प्रत्येकं द्वादशाहुतीर्जुहुयात् । मन्त्रास्तु ओं भूः स्वाहा । अग्नय इदम् । भुवः स्वाहा । वायव इदम् । स्वः स्वाहा । सूर्यायेदम् । अग्न आयूंषि पवस आसुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् (वा. सं. ३५. १६) स्वाहा । इदमग्नये पवमानाय । अग्निऋषिः । महागयं स्वाहा । इदमग्नये पवमानाय । अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधद्रयिं मयि पोषम् (वा. सं. ८. ३८) स्वाहा । इदमग्नये पवमानाय । ओषधयः समवदन्त सोमेन सह राज्ञा । यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि (वा. सं. १२. ९६) स्वाहा । इदमोषधीभ्यः । अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता । गोभाज इत्किलासथ यत्सनवथ पूरुषम् (वा. सं. ३५. ४) स्वाहा । इदमोषधीभ्यः । [3]इदं वनस्पतिभ्यः । द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते ।

---

१. सचेलं D. 2. कामोऽश्वतोपनयन D.

3. वनस्पते शतवल्शो विरोह सहस्रवल्शा वि वयं रुहेम ।
यं त्वामयं स्वधितिस्तेजमानः प्रणिनाय महते सौभगाय ॥ (दा.सं.१.३.५.७)

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तयोरेकः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति (अ. ९. ९. २७)। सुपर्णा स्वाहा। इदं पिप्पलाय। भूर्भुवः स्वः स्वाहा। इदं प्रजापतये। ततः स्विष्टकृदादिहोमशेषं गन्धाक्षतविष्णुपुष्पधूपदीपोपहारफलताम्बूलैः अश्वत्थे वो (वा. सं. ३५. ४) इति मन्त्रेण पूजयेत्। ततो यजमानोऽश्वत्थपश्चिमे भाग उपविश्य दक्षिणहस्तेनाश्वत्थं स्पृष्ट्वा स्वदक्षिणत उदङ्मुखाचार्याय गां दद्यात्। कुशयवतिलजलान्यादाय कृतैतदश्वत्थोपनयनप्रतिष्ठासिद्ध्यर्थं शक्त्यलङ्कृतां सवत्सां गां रुद्रदैवतां अमुकगोत्रायामुकशर्मणेऽमुकशाखाध्यायिने तुभ्यं सम्प्रददे इति पुच्छे सङ्कल्प्य दद्यात्। दक्षिणां दत्त्वाऽश्वत्थाच्छादनवासोद्वयं गुरवे दद्यात्। ततो ब्रह्मादिभ्यो दक्षिणां दत्त्वाऽग्न्यादिप्रीतयेऽष्टौ ब्राह्मणान् भोजयित्वा ततः पुनः पुण्याहवाचनं नान्दीश्राद्धं च स्वशाखोक्तेन विधाय वस्त्रदण्डाजिनयज्ञोपवीतमौञ्ज्यादिसर्वोपकरणान्यादाय मङ्गलगीतवाद्यादिपुरस्सरं विप्राशीर्भिरनुमोदितो वर्यैः पुण्यस्त्रीभिश्चोपविश्य ब्राह्मणैः पुण्याहं वाचयित्वोक्तलक्षणमाचार्यस्य दक्षिणभागे उदङ्मुखवासोमुद्रिकाकुण्डलादिभिर्भूषयित्वा एतदश्वत्थोपनयनकर्माङ्गं अमुकगोत्रममुकशर्माणममुकवेदाध्यायिनमेभिश्चन्दनवासोमुद्रिकाकुण्डलादिभिरभ्यर्च्याचार्यं त्वामहं वृणे इति तस्य दक्षिणं करं स्पृष्ट्वा वृणुयात्। स च वृतोस्मीत्युक्त्वाऽश्वत्थपश्चात् प्राङ्मुख उपविश्य पञ्चामृतैरश्वत्थं स्नापयित्वा शुद्धोदकेन सर्वौषधिजलैश्चाभिषिच्य पिष्टातकेन विभूष्य तत्पूर्वं होमार्थं स्थण्डिलं विधाय होमोपकरणानि सन्निधाप्य स्वशाखोक्त[1]विधिना लेखनादि कृत्वा अग्निवायुसूर्यादिवक्ष्यमाणदेवतोद्देशेन चरुं श्रपयित्वा ज्यभागान्तं कुर्यात्। ततोऽश्वत्थपश्चाद्भागे प्राङ्मुख उपविश्य युवं वस्त्राणि सचेथे इति मन्त्रेण वासोभ्यामावेष्ट्य यज्ञोपवीतं बलमस्तु तेज इति मन्त्रेण यज्ञोपवीतं प्रतिमुच्य प्रावेपामा मारिपामेति मेखलामन्त्रैर्मेखलां त्रिरावेष्ट्याजिनदण्डं च तूष्णीं दत्त्वाऽश्वत्थे वो पूरुषम् इति मन्त्रेण श्वेतगन्धपुष्पाक्षतैः स्रग्भिश्च पूजयेत्। ततो देवस्य त्वास्ताभ्यां हस्तं गृह्णाम्यश्व थ इति स्पृष्ट्वा निरीक्ष्य सप्रणवव्याहृतित्रयां गायत्रीं त्रिर्जपेत्। ततश्च यथापूर्वं होमं समापयेत्।

इत्यश्वत्थोपनयनप्रयोगः।

---

1. विधिनोपनोल्लेखनादि D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ [1]गलेतिकादानम्

भविष्योत्तरे —

वसन्तसमयं ज्ञात्वा गत्वा देवालयं परम् ।
यत्र स्वायम्भुवं लिङ्गमार्षं वा देवपूजितम् ॥

तस्य गर्भगृहान्तस्थं घटं तोयेन सम्भृतम् ।
कुर्यात् सुरभिगन्धैश्च वासितं वस्त्रगालितम् ॥

स्रवन्तं च [2]दिवारात्रं तज्जलं लिङ्गमूर्धनि ।

एवं यः कारयेत्कुम्भं श्रद्धाभक्तिसमन्वितः ।
शिवस्य विष्णोरर्कस्य इष्टदेवस्य वा पुनः ॥

स्रवन्तं कारयेत् कुम्भमच्छिन्नं देवमस्तके ।
अनेन विधिना दत्त्वा नरो मासचतुष्टयम् ॥

ततः कर्कटके प्राप्ते देवं पञ्चामृतेन तु ।
संस्नाप्य पूजयेद् गन्धैर्नैवेद्यैश्च मनोरमैः ॥

प्रणिपत्य महेशानं मन्त्रमेतमुदीरयेत् ।
ॐ नमः शङ्करः शम्भुर्भवो दाता[3] शिवो हरः ॥

प्रीयतां मे महादेवो[4] जलकुम्भप्रदानतः ।
एवं सङ्कल्प्य दाता तु पश्चादागत्य वेश्मनि ॥

---

1. गलन्तिका. D. 2. दिवारात्रौ दा. खं. 913. 3. महादेवे D.
4. धातादा. खं. 109.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वशक्त्या शिवभक्तांश्च विप्रमुख्यांश्च भोजयेत् ।
एवं यः कुरुते ग्रीष्मे जलदानक्रियां हरे ॥

यावद् बिन्दूनि लिङ्गस्य पतितानि न संशयः ।
स वसेच्छाङ्करे लोके तावत्कोटीर्नरेश्वर ॥

इति गलेतिकादानम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ मणिकदानम्

देवलः —

ग्रीष्मप्रवेशे मणिकं ददाति द्विजसद्मनि ।
योऽम्बुपूरितमाप्नोति स तडागकृतं फलम् ॥

इति मणिकदानम् ।

———(:o:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ प्रपादानम्

भविष्योत्तरे —

अतीते फाल्गुने मासि प्राप्ते [1]चैत्रमहोत्सवे ।
[2]पुण्येऽह्नि विप्रकथिते मण्डपं कारयेत्ततः ॥

[3]पुरस्य मध्ये पथि वा चैत्यवृक्षतलेऽथ वा ।
[4]सुशीतलजलं रम्यं विचित्रासनसंयुतम् ॥

[5]तन्मध्ये स्थापये[6]द्रम्यान् मणिकुम्भांश्च शोभनान् ।
आकालमूलान् करकान् वस्त्रैरावेष्टिताननान्[7] ॥

ब्राह्मणे शीलसम्पन्ने भृतिं दत्त्वा यथोचिताम् ।

प्रपापालः प्रकर्तव्यो बहुपुत्रपरिच्छदः ।
[8]पानीयपानमश्रान्तो यः कारयति मानवान् ॥

एवंविधां प्रपां कृत्वा शुभेऽह्नि विधिपूर्वकम् ।
यथाशक्त्या नरश्रेष्ठ प्रारम्भे भोजयेद् द्विजान् ॥

ततश्चोत्सर्जयेद्विप्रान् मन्त्रेणानेन मानवः ।
प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता ॥

---

1. चैत्रे भ. 2. पुण्येऽह्नि विप्रकथिते ग्रहचन्द्रबलान्विते । मण्डपं कारयेद्विद्वान् घनच्छायं मनोरमम् ॥ भ. 3. पुरस्य मध्ये पथि वा कान्तारे तोयवर्जिते । देवतायतने वाऽपि चैत्यवृक्षतलेऽपि वा ॥ भ. 4. सुशीतलं च रम्यं च D. 5. श्लोकार्धादस्मात्पूर्वं-कारयेन्मण्डपं भव्यं शीतवातसहं दृढम् भ. 6. द्रुमस्या भ. 7. तानथ भ. 8. पानीयपानेनाश्रान्तान् भ.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अस्याः प्रदानात् पितरस्तृ[1]प्यन्तु प्रपितामहाः ।
अनिवारितं ततो देयं जलं मासचतुष्टयम् ॥

त्रिपक्षं वा महाराज जीवानां जीवनं परम् ।
गन्धाढ्यं सुरसं शीतं शोभने [2]भाजने स्थितम् ॥

प्रदद्यादप्रतिहतं मुखं चानवलोकयन् ।
प्रत्यहं कारयेत्तस्यां [3]भोजनं शक्तितो द्विजान् ॥

अनेन विधिना यस्तु [4]ग्रीष्मे तापप्रणाशनम् ।
पानीयमुत्तमं दद्यात्तस्य पुण्यफलं शृणु ॥

[5]कपिलाशतदानस्य सम्यग्दत्तस्य यत् फलम् ।
तत् पुण्यफलमाप्नोति सर्वदेवैः सुपूजितः ॥

पूर्णचन्द्रप्रतीकाशं [6]विमानमधिरुह्य सः ।
याति [7]देवेन्द्रनगरं पूज्यमानोऽप्सरोगणैः ॥

[8]त्रिंशत्कोट्यो हि वर्षाणां यक्षगन्धर्वसेवितम्[9] ।

पुण्यक्षयादिहागत्य चतुर्वेदो द्विजो भवेत् ।
ततः परं पदं याति पुनरावृत्तिदुर्लभम् ॥

इति प्रपादानम् ।

———(:o:)———

1. स्तृप्यन्तु च पितामहाः भ. 2. राजते दा. खं ९१३. 3. शक्तितोद्विजभोजनम् भ. 4. ग्रीष्मोष्मशोषनाशनन् भ. 5. सर्वतीर्थेषु यत्पुण्यं सर्वदानेषु यत्फलम् भ. 6. विमानं सोऽधिरुह्य च भ. 7. देवेन्द्रनगरे भ. 8. विंशत् भ. 9. सेवितः भ.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ पान्थोपचारः

गरुडपुराणे —

पान्थं परिचरेद् यस्तु शयनासनभोजनैः ।
स स्वल्पेन प्रयासेन जयति क्रतुयाजिनम् ॥

प्रतिश्रयं सुनिर्वातं शुचि भूमितलं शुभम् ।
अध्वनीनाय सम्पाद्य सद्यः दहति पातकम् ॥

वर्षास्वनूष्मभवने हेमन्तशिशिरेषु च ।
ग्रीष्मे च शीतलतले पान्थं विश्राम्य नाकभाक् ॥

दत्त्वा वासो विवस्त्राय रोगिणे रुक्प्रतिक्रियाम् ।
तृषार्ताय जलं दत्त्वा मृष्टमन्नं बुभुक्षवे ॥

पथिकाय यथावित्तं सर्वं तरति दुष्कृतम् ।
अध्वन्यमनुमान्यापि शाकमूलफलैर्जलैः ॥

[1]सकृत् सत्कृत्य वाचाऽपि श्रेयसो भाजनं भवेत् ।

तथा,

अभावे तृणभूम्यम्बुपत्रेन्धनफलानि च ।
दत्त्वाऽगताय निर्विण्णः स्वर्गं याति प्रियेण वा ॥

---

1. सकृत्सकृत्य D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विष्णुधर्मोत्तरे —

उपानद्भ्यां च छत्रेण श्रान्तं संयोज्य मानवः ।
संस्थाप्य शुभदेशे तु क्षणाद् बहु फलं लभेत् ॥

तथा —

मूल्येन [1]वाहयित्वाऽपि परभारं विचक्षणः ।
[2]अश्वमेधस्य यज्ञस्य फलं दशगुणं लभेत् ॥

तथा —

[3]चोरेभ्यो रक्षणं कृत्वा शक्रलोके महीयते ।

अभ्यङ्गदानम् —

स्कन्दपुराणे —

यस्तु मार्गपरिश्रान्तं द्विजातिं यामकर्षितम् ।
तैलेनाभ्यञ्जयेत् प्राज्ञः स सुखी मोदते चिरम् ॥

सर्पिषा कपिलाधेनोरथ वान्येन सर्पिषा ।
उत्तरायणमासाद्य योऽभ्यञ्जयति धूर्जटिम् ॥

महापूजां घृतेनैव तस्मिन्नेव दिने शिवे ।
कृत्वा मनुष्यो लभते राज्यं निहतकण्टकम् ॥

सर्पिःपलसहस्रेण गोविन्दस्य शिवस्य च ।
महास्नानं नरः कृत्वा ब्रह्महत्यां तरिष्यति ॥

---

1. वासयित्वाऽपि D. 2. तस्यमूल्यस्य दानेन वि. 3. नास्ति. वि.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नन्दिपुराणे —

पादाभ्यङ्गं तु यो दद्यात् पान्थाय [1]परिवेदिने ।
स शुभाभरणैः पादैर्वन्दिभिर्नित्यवन्दितः ॥

भवेन्नृपो महाभागो मण्डले दशयोजने ।
संवाह्याध्वपरिश्रान्तं पादाभ्यङ्गादिना नरः ॥

धर्मस्य पुण्यमाप्नोति सर्वकामगुणोज्ज्वलः ।
दत्त्वा वारि सुसंस्पर्शं पादाभ्यङ्गं[2] द्विजातये ॥

उच्छिष्टमार्जनाच्चापि गोदानफलमश्नुते ।

भविष्यत्पुराणे —

ब्राह्मणस्य तु यो भक्त्या पादौ प्रक्षाल्य शक्तितः ।
घृतेनाभ्यज्य पादौ तु विष्णुलोके महीयते ॥

इति पान्थोपचारः ।

———(:०:)———

1. परिखेदिने D. E. 2. पादाभ्यां च E.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ गोपरिचर्या

विष्णुः —

गवां [1]कण्डूयनं चैव सर्वकल्मषनाशनम् ।
गवां ग्रासप्रदानेन [2]स्वर्गलोके महीयते ॥

आदित्यपुराणे —

लवणं च यथाशक्त्या गवां ये वै ददन्ति च ।
तेषां पुण्यकृतां लोका गवां लोकं व्रजन्ति ते ॥

महाभारते —

कृत्वा गवार्थे शरणं शीतवातक्षमं महत् ।
आसप्तमं तारयति कुलं भरतसत्तम ॥

हारीतः —

द्वौ मासौ पाययेद्वत्सं तृतीये द्विस्तनं दुहेत् ।
चतुर्थे त्रिस्तनं चैव यथान्यायं यथाबलम् ॥

ब्रह्मपुराणे —

आदौ विचार्य वयसः परिमाणं बलं रुचिम् ।
आकस्मिकं तु दातव्यं पुण्यार्थं तु गवाह्निकम् ॥

---

1. कण्डूयनान्मर्त्यः सर्वं पापं व्यपोहति वि. 2. महत्पुण्यमवाप्नुयात् बि.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विष्णुधर्मोत्तरे --

[1]गवां कण्डूयनं चैव सर्वकल्मषनाशनम् ।
तासां शृङ्गोदकं [2]नाम जाह्नवीजलसन्निभम् ॥

तथा —

दत्त्वा परगवे ग्रासं पुण्यं स महदाप्नुयात् ।
शिशिरं सकलं कालं ग्रासं परगवे तथा ॥

दत्त्वा स्वर्गमावाप्नोति संवत्सरशतानि षट् ।
अग्रभक्तं नरो दद्यान्नित्यमेव तथा गवाम् ॥

[3]मासाष्टकेन लभते नाकलोकं समायुतम् ।
सायं प्रातर्मनुष्याणामशनं श्रुतिनिर्मितम् ॥

तत्रैकमशनं दत्त्वा गवां नित्यमतन्द्रितः ।
द्वितीयं यः समश्नाति तेन संवत्सरं नरः ॥

गवां लोकमवाप्नोति यावन्मन्वन्तरं द्विजः ।
शीतत्राणं गवां कृत्वा गृहे पुरुषसत्तम ॥

गवां लोकमवाप्नोति यावदिन्द्राश्चतुर्दश ।
गवां प्रपाने पानीयं कृत्वा पुरुषसत्तम ॥

वारुणं लोकमाप्नोति क्रीडत्य[4]ब्दगणायुतम् ।

तथा --

सिंहव्याघ्रभयत्रस्तां पङ्कलग्नां जले गताम् ॥

1. गवां कण्डूयनान्मर्त्यः सर्व पापं व्यपोहति वि. 2. विप्रा जाह्नवीसलिलोपमम् वि. 3. समाष्टकेन दा.खं. 885. 4. क्रीडत्यप्सरसा गणै दा.खं. 885.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गामुद्धृत्य नरः स्वर्गे कल्पभोगानुपाश्नुते ।
तासां संस्पर्शनं धन्यं सर्वकल्मषनाशनम् ॥

दानेन च तथा तासां कुलान्यपि समुद्धरेत् ।
उदक्यासूतिकादोषो नैव तत्र गृहे भवेत् ॥

इति गोपरिचर्या ।

———(:o:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ यज्ञोपवीतदानम्

बौधायनः —

यज्ञोपवीतदानेन जायते ब्रह्मवर्चसी ।
तस्मात्तानि प्रदेयानि ब्राह्मणेभ्यो विपश्चिता ॥

अत्रिः —

क्षौमजं वाऽथ कार्पासं पट्टसूत्रमथापि वा ।
यज्ञोपवीतं यो दद्याद् घृतवर्णं सुशोभनम् ॥

यथाशक्त्या विधानेन अग्निष्टोमफलं लभेत् ।

नन्दिपुराणे —

यज्ञोपवीतदानेन सुरेभ्यो ब्राह्मणाय वा ।
भवेद्विप्रश्चतुर्वेदः शुद्धवीर्नात्र संशयः ॥

[2]विष्णुप्रोक्ते —

उपाकर्मणि विप्रेभ्यो दद्याद्यज्ञोपवीतकम् ।
आयुष्मान् जायते तेन कर्मणा मानवो भुवि ॥

[3]इति यज्ञोपवीतदानम् ।

———(०)———

1. ब्रह्मवर्चः प्रजायते E. 2. वायुप्रोक्ते दा. खं 3. इयनोपवीतं D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ यष्टि[1]दानम्

यष्टिं ये तु प्रयच्छन्ति नेत्रहीनेऽथ दुर्बले ।
तेषां सुविपुलः पन्थाः [2]फलमूलोपशोभितः ॥

ब्रह्मवैवर्ते —

ये पङ्गुभ्यश्च पान्थेभ्यो दीनेभ्योऽपि दयालवः ।
यष्टिदानं प्रकुर्वन्ति नरोगास्ते न संशयः ॥

नरोगाः अरोगाः । नञ्समासः ।

पङ्गोश्चरणकार्याणि यष्टिः प्रकुरुते सदा ।
गोसर्पादिनिवृत्तिश्च जायते यष्टिधारणात् ॥

भीतानां शरणं यष्टिर्गच्छतां निशि वा वने ।
शङ्कां पङ्गाहिवातोत्थां नियमेन निरस्यति ॥

स्कन्दपुराणे —

यतिभ्यो वैणवं दण्डं द्विजेभ्योऽपि खनित्रकम् ।
प्रदाय परलोकेऽसौ यमदण्डं न गच्छति ॥

प्रददाति यथावर्णं यो दण्डं ब्रह्मचारिणे ।
स महापुरुषो लोके[3] ब्रह्मवर्चसमश्नुते ॥

इति यष्टिदानम् ।

---

1. दापनं D. A. 2. पल D. 3. भूत्वा दा. खं. ८७९.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथेन्धनदानम्

वह्निपुराणे —

इन्धनानि च काष्ठानि ब्राह्मणेभ्यः प्रयच्छति ।
सर्वार्थास्तस्य सिध्यन्ति तेजस्वी चापि जायते ॥

महाभारते —

यश्चेन्धनार्थं काष्ठानि ब्राह्मणेभ्यः प्रयच्छति ।
प्रतापनार्थं राजेन्द्र प्रवृत्ते शिशिरे नरः ॥

सिध्यन्त्यर्थाः सदा तस्य कार्याणि त्रिविधानि च ।
उपर्युपरि शत्रूणां वपुषा दीप्यते नरः ॥

भगवांश्चास्य सुप्रीतो वह्निर्भवति नित्यशः ।
न तं त्यजन्ति पशवः सङ्ग्रामेषु जयत्यपि ॥

इतीन्धनदानम् ।

———(:o:)———

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथाग्नीष्टिकादानम्

भविष्योत्तरे — कृष्ण उवाच —

आदौ मार्गशिरे मासि शोभने दिवसे [1]शुभे ।
अग्नीष्टिकां कारयित्वा सुखासनवर्तीं [2]दृढाम् ॥

देवाङ्गणे मठे हट्टे विस्तीर्णे चत्वरे तथा ।
उभयोः सन्ध्ययोः कृत्वा [3]संशुद्धं काष्ठसञ्चयम् ॥

ततः प्रज्वालयेदग्निं हुत्वा व्याहृतिभिः क्रमात् ।
[4]ब्राह्मणान् भोजयेद्भक्त्या तेभ्यो दद्याच्च दक्षिणाम् ॥

अनेन विधिना [5]कृत्वा प्रत्यहं [6]ज्वालयेत्ततः ।
यदि कश्चित् [7]क्षुधार्तः स्याद् भोजनं तस्य कल्पयेत् ॥

इदमिह दानवाक्यम् —

अद्यादिहेमन्तशिशिराख्यमृतुद्वयं यावत् प्रत्यहं शीतार्तप्राणिप्रतापनार्थमिमामग्नीष्टिकां विष्णुदेवतां षष्टिसहस्रषष्टिशतावच्छिन्नब्रह्मलोकमहितत्वानन्तरसर्वार्थसम्पन्नचतुर्वेदित्वप्राप्तिकामोऽहमुत्सृजामि - इति । अस्य दानस्य फलमपि तत्रैव —

विमाने चार्कसङ्काशे [8]समारूढो महामते ।
षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च ॥

---

1. शुभाम् भ. 2. शुभाम् भ. 3. सशुद्धम् D. मशुष्कम् भ. 4. इयं पङ्क्तिर्नास्ति भ. 5. हुत्वा भ. 6. ज्वलयेत् D; A. 7. त्क्षुधार्त्तो स्याद्भोज्यं तस्मै प्रकल्पयेत् भ.दा.खं. 8. समारूढे महाघने भ.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

[1]अर्चितोऽत्यन्तसन्तुष्टो ब्रह्मलोके महीयते ।
इह लोकेऽवतीर्णश्च चतुर्वेदो [2]द्विजो भवेत् ॥

[3]नीरुजः सत्रयाजी च अग्नितेजःप्रभावतः ।

चैत्ये [4]सुरालयसभावसथेषु भव्यां
येऽग्नीष्टिकां प्रचुरकाष्ठवतीं प्रदद्युः ।
[5]हेमन्तशैशिरऋतौ [6]सुखदां जनानां
[7]कायाग्निदीप्तममलं [8]वपुरावहन्ति ॥

इत्यग्नीष्टिकादानम्

————(:०:)————

1. हर्षितोत्यन्तसुखितो भ. 2. द्वितो D. 3. नीरुजः सत्यवादीच् D; A. नीरुजः सत्रयाजी च अग्निवत्तेजसान्वितः भ. 4. सुरांगणसभावसथ सुभव्यां भ. 5. हेमन्त भ. 6. सुखदा भ. 7. कायाग्निदीपनमलं भ. 8. वपुराप्नुवन्ति भ. दा. खं. 860.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ दीपदानम्

संवर्तः —

देवागारे द्विजानां वा दीपं दत्त्वा चतुष्पथे ।
मेधावी ज्ञानसम्पन्नश्चक्षुष्मांश्च सदा भवेत् ॥

गरुडपुराणे —

नीलकण्ठस्य मोक्षेण गङ्गायां च तिलोदकैः ।
वर्षासु दीपदानेन पितॄणामनृणो भवेत् ॥

नीलकण्ठस्य मोक्षो नीलवृषोत्सर्गः ।

यस्तु ब्राह्मणगेहेषु दीपमालां प्रयच्छति ।
स [1]निर्जित्य तमो घोरं ज्योतिषां लोकमाप्नुयात् ॥

महाभारते — (अनु शा. १३०. १३३)

दीपप्रदानं वक्ष्यामि फलयोगमनुत्तमम् ।
यथा येन यदा चैव प्रदेया यादृशाश्च ये ॥

ज्योतिस्तेजःप्रकाशं वाऽप्यूर्ध्वगत्यापि वर्ण्यते[2] ।
प्रदानं तेजसां तस्मा[3]त्तेजो वर्धयते नृणाम् ॥

अन्धं तमस्तमिस्रं च दक्षिणायनमेव च ।
उत्तरायणमेतस्माद्दीपदानं प्रशस्यते ॥

---

1. निर्वर्त्य दा.खं. ८६३. 2. वर्णवे E; A. 3. त्तेतो D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यस्मादूर्ध्वगतेस्तत् तु तमसश्चैव भेषजम् ।
तस्मादूर्ध्वगतिर्दाता भवेत्तत्रेति नित्यशः ॥

विष्णुधर्मोत्तरे —

महावर्तिः सदा देया भूमिपाल महाफला ।
कृष्णपक्षे विशेषेण तत्रापि च विशेषतः ॥

अमावास्या विनिर्दिष्टा द्वादशी च महाफला ।
आश्वयुज्यामतीतायां कृष्णपक्षस्य या भवेत् ॥

अमावास्या तदा पुण्या द्वादशी च विशेषतः ।
देवस्य दक्षिणे पार्श्वे देया तैलतुला नृप ॥

पलाष्टकयुतां राजन् वर्तिं तत्रैव दापयेत् ।
वाससा तु समग्रेण सोपवासो जितेन्द्रियः ॥

महावर्तिद्वयमिदं सकृद् दत्त्वा महीयते ।

स्वर्लोकं सुचिरं भुक्त्वा जायते भूतले यदा ।
ख्यातिं याति सदा लोके सज्जनानां च सद्गुणैः ॥

एकामप्यथ यो दद्यादभीष्टमनयोर्द्वयोः ।
मानुष्ये सर्वमाप्नोति यदुक्तं ते मयाऽनघ ॥

स्वर्गे तथा समाप्नोति भोगं कालं च यादव ।
सामान्यस्य तु दीपस्य राजन् दानं महाफलम् ॥

किं पुनर्महतो यस्य फलस्यान्तो न विद्यते ।
दीपदानं परं पुण्यमन्यदेवेष्वपि ध्रुवम् ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किं पुनर्देवदेवस्य अनन्तस्य महात्मनः ।
गिरिशृङ्गेषु दातव्यं नदीनां पुलिनेषु च ॥

चतुष्पथेषु रथ्यासु ब्राह्मणानां [1]च वेश्मसु ।
वृक्षमूलेषु गोष्ठेषु कान्तारे गहनेषु च ॥

दीपदानेन सर्वत्र महाफलमुपाश्नुते ।
यावन्त्यक्षिनिमेषाणि [2]दीपे [3]प्रज्वलिते नृप ॥

तावन्त्येव स राजेन्द्र वर्षाणि दिवि मोदते ।
दीपदानेन राजेन्द्र चक्षुष्मानिह जायते ॥

रूपसौभाग्ययुक्तश्च[4] धनधान्यसमन्वितः ।

इति दीपदानम् ।

———(:०:)———

1. गृहेषु च वि. 2. दापः D. 3. प्रज्वलितो वि. 4. स्तु D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथाभयदानम्

संवर्तः —

भूताभयप्रदानेन सर्वान् कामानवाप्नुयात् ।
दीर्घमायुश्च लभते सदा च [1]सुखितो भवेत् ॥

रामायणे —

बद्धाञ्जलिपुटं दीनं याचन्तमपराधिनम् ।
न हन्याच्छरणं प्राप्तं सतां धर्ममनुस्मरन् ॥

महाभारते —

लोभाद् द्वेषाद्भयाद्वापि [2]यो हन्याच्छरणागतम् ।
ब्रह्महत्यासमं तस्य पापमाहुर्मनीषिणः ॥

इत्यभयदानम् ।

——:0:——

1. सुसुखी दा.सा. 562. 2. यस्त्यजेच्छरणागतम् D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ पात्रदानानि

यवपुष्पं च माधाजितस्तैस्तु ब्रह्मलोकान्न संशयः । (?)
उत्तमं पलषष्टिश्च चत्वारिंशत्तु मध्यमम् ॥

द्वादशाधमपात्रं तु ताम्रमत्रायसं स्मृतम् ।
वासांसि वरणे दद्यादुपवीतं समाल्यकम् ॥

आयसं लोहविकारः । लोहशब्दोऽत्र धातुमात्रपरः ।

[1]चन्दनैश्चैव ताम्बूलैर्विप्रं सम्पूजयेत्ततः ।
घृतादिद्रव्यसम्पूर्णं हेमगर्भं सवस्त्रकम् ॥

प्रतिष्ठाप्य तु तत् पात्रं ब्राह्मणाय निवेदयेत् ।
ततः पूर्णं सुवर्णैस्तु प्रतिष्ठार्थं द्विजाय वै ॥

सर्वेषां चैव दानानां सुवर्णं दानमिष्यते ।
चन्द्रलोके वसेत्तावद्यावदिन्द्राश्चतुर्दश ॥

त्रिदिवे देवताः सर्वास्तं नरं पूजयन्ति वै ।

तथा —

घृतं च नवनीतं च दधि दुग्धं तथैव च ॥

शर्करा घृततैलानि तिला मधु जलं तथा ।
लवणं यवपुष्पं च [2]फलं रत्नसमन्वितम् ॥

---

1. चन्दनं चैव ताम्बूलं D. A. 2. सफलं यावरत्नसमन्वितम् D. A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं चतुर्दशयुतं दातव्यं विधिना नृप ।

चतुर्दशयुतं चतुर्दश वृतादिभिः पूर्णानि पात्राणि दद्यादित्यर्थः । युतमिति जातावेकवचनम् ।

गुणाधिकाय विदुषे ब्राह्मणाय जगत्त्रये ।
उद्धरेद् दुर्गमाद् घोरात् दुःखसंसारसागरात् ॥

आत्मानं सकलं वशं नयेत् स ब्रह्मणोऽन्तिकम् ।

पद्मपुराणे —

सर्वेषामेव दानानामुत्तमं पात्रमिष्यते ।
[1]यथाविधि प्रदातव्यं वित्तशाठ्यविवर्जितम् ॥

अत्यन्तं निर्धनो योऽपि सोऽपि दद्याद्यथाविधि ।
चतुर्दशार्धमर्धं वा दद्यादन्नं फलेप्सया ॥

अयमत्र पात्रदानप्रयोगः —

स्वशक्त्यनुसारेण सम्पादितपात्रादिसकलसम्भारः शुद्धगोमयोपलिप्ते भूभागे उदग्रेषु दर्भेषु आज्यादिपात्राणि उदक्संस्थानि क्रमेण स्थापयित्वा उक्तफलसिद्धये एतावन्ति पात्राणि प्रतिपादयिष्य इति कृतसङ्कल्पः पात्राण्यासादनक्रमेण प्रतिष्ठापूर्वकं यथावदभ्यर्च्य पात्रप्रतिग्रहार्थं ब्राह्मणान् यथोक्तान् वस्त्रगन्धमाल्यादिभिरभ्यर्च्य तत्तत्पात्रप्रतिग्रहार्थं वृणुयात् । ततः आज्यादिपात्राणि दानमन्त्रैर्वाक्यप्रयोगपूर्वकं दत्त्वा सुवर्णं दक्षिणां दद्यात् ।

आज्यं तेजः समुद्दिष्टमाज्यं पापहरं स्मृतम् ।
आज्यं सुराणामाहारः सर्वमाज्ये प्रतिष्ठितम् ॥

---

1. तथाविधि D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आज्यं तेजोमयं चैव आज्यं वह्निप्रियं सदा ।
तस्मादाज्यप्रदानेन अतः शान्तिं प्रयच्छ मे ॥

इदं घृतपात्रं विष्णुदैवतं सर्वपापविनिर्मुक्तिकामः कल्पद्वयावच्छिन्न-विष्णुलोकप्राप्तिकामो वा तुभ्यममुकशर्मणेऽमुकवेदामुकशाखाध्यायिनेऽमुकगोत्राय सम्प्रददे । ततः प्रतिग्रहीता सावित्रेण यजुषा प्रतिगृह्णीयात् । ततो यजमानः कृतैतत्पात्रदानप्रतिष्ठार्थमिदं सुवर्णमग्निदैवतं दक्षिणां तुभ्यं सम्प्रदद इति दक्षिणां दद्यात् । एवं सर्वत्र कुर्यात् ।

[1]मन्थानदण्डकाघातैर्नवनीतं नवोद्धृतम् ॥

तस्य दानाच्छरीरं मे प्रातरस्तु नवं पुनः ।
नवनीतं पवित्रं हि सदा गोषु व्यवस्थितम् ॥

नवनीतप्रदानेन अतः शान्तिं प्रयच्छ मे ।

नवनीतपात्रं विष्णुदैवतं चन्द्रलोकप्राप्तिकाम इत्यादि पूर्ववत् ।

पवित्रं मङ्गलकरं कुन्देन्दुधवलं दधि ।
सर्वमङ्गलदं यस्मात् तस्माच्छान्तिं प्रयच्छ मे ॥

दधिपात्रं विष्णुदैवतं चन्द्रलोकप्राप्तिकाम इत्यादि पूर्ववत् ।

क्षीराज्जातस्तथा शङ्खः क्षीराज्जातो वनस्पतिः ।
क्षीरादमृतसम्भूतिः क्षीराज्जातः कलानिधिः ॥

क्षीरात् क्षीरोदकान्तिस्तु क्षीराद्विश्वस्य जीवनम् ।
तस्मात् क्षीरप्रदानेन अतः शान्तिं प्रयच्छ मे ॥

---

1. तन्थानदण्डकाद्यातैः D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

क्षीरपात्रमादित्यदैवतं ब्रह्मलोकप्राप्तिकाम इत्यादि पूर्ववत् ।

दर्पकामुकसम्भूता रसस्यास्ये विनिर्मिता ।
देहस्थपापनाशाय शर्करा पुष्टिदा स्मृता ॥

शर्करायास्तु दानेन मम सन्तु मनोरथाः ।

गुडपात्रं सोमदैवतं सर्वपापविनिर्मुक्तिकाम इत्यादि पूर्ववत् ।

तैलं रोगोपशमनं तैलमायुर्विवर्धनम् ।
सर्वदोषविनाशार्थं बहुजन्मफलप्रदम् ॥

तस्मात् तैलप्रदानेन अतः शान्तिं प्रयच्छ मे ।

तैलपात्रं विष्णुदैवतं विष्णुलोकप्राप्तिकाम इत्यादि पूर्ववत् ।

तिलाः पुण्याः पवित्राश्च सर्वपापहराः स्मृताः ।
शुक्लाश्चैव तथा कृष्णा विष्णुगात्रसमुद्भवाः ॥

यानि कानि च पापानि ब्रह्महत्यासमानि च ।
तिलपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥

तिलपात्रं यमदैवतं ब्रह्मलोक इत्यादि पूर्ववत् ।

[1]हेममाक्षिकमाध्वीकं सर्वपुष्परसोद्भृतम् ।
सौभाग्यदं भवास्माकमतः शान्तिं प्रयच्छ मे ॥

मधुपात्रं यमदैवतं स्वर्गप्राप्तिकामः इत्यादि पूर्ववत् ।

उदके संस्थिता देवास्तथा तेषां च जीवनम् ।
पानीयं जीवनं यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

---

1. हेमात्क्षीरमाध्वीकं D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जलपात्रं वरुणदैवतं वरुणलोकप्राप्तिकाम इत्यादि पूर्ववत् ।

लवणे वै रसाः सर्वे लवणे सर्वदेवताः ।
तदधीनानि चान्नानि रसाः स्वादुयुतास्तथा ॥

रूपलावण्ययुक्तास्तु सम्भवन्तु ममात्मजाः ।
तस्माल्लवणदानेन अतः शान्तिं प्रयच्छ मे ॥

लवणपात्रं सर्वदैवतं विष्णुलोकप्राप्तिकाम इत्यादि पूर्ववत् ।

फलेन देवास्तुष्यन्ति फलेन पितरस्तथा ।
फलेन यक्षगन्धर्वाः फलेन मुनिपुङ्गवाः ॥

तस्मात्फलप्रदानेन अतः शान्तिं प्रयच्छ मे ।

फलपात्रं सोमदैवतं सकलप्राप्तिकाम इत्यादि पूर्ववत् ।

रत्नानि सर्वदेवानां भूषणानि पराणि च ।
तस्माद्रत्नप्रदानेन अतः शान्तिं प्रयच्छ मे ॥

रत्नपात्रं विष्णुदैवतं रुद्रलोकप्राप्तिकाम इत्यादि पूर्ववत् ।

व्रीहयः सर्वजन्तूनां जीवितं च सुजीवितम् ।
तस्माद् व्रीहिप्रदानेन अतः शान्तिं प्रयच्छ मे ॥

व्रीहिपात्रं प्रजापतिदैवतं ब्रह्मलोकप्राप्तिकाम इत्यादि पूर्ववत् । वराह-पुराणे तु षोडश पात्राणि उक्तानि । यथा —

अथातः सम्प्रवक्ष्यामि पात्रदानमनुत्तमम् ।
कृत्वा ताम्रमयं पात्रं यथाविभवविस्तरम् ॥

उमया सहितं शम्भुं हरिं सश्रीकमेव च ।
कृत्वा तु काञ्चनीं दिव्यां सम्पूज्यावाहनादिभिः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रतिमां ब्राह्मणे दद्यात् पात्रभूते विचक्षणे ।
अप्यङ्गभूते वेदानां पारगे सारवर्तिनि ॥

सदाचारवते विद्वानल्पवित्तोऽपि भूपते ।
पात्राणि षोडशादाय ब्राह्मणाय निवेदयेत् ॥

एकं मधुमयं पात्रं द्वितीयं तु तिलस्य च ।
तृतीयं घृतपात्रं तु चतुर्थं गुडसंयुतम् ॥

पञ्चमं लवणैः पूर्णं षष्ठं गोक्षीरपूरितम् ।
सप्तमं रसपात्रं च नवनीतं तथाऽष्टमम् ॥

नवमं शर्करापात्रं दशमं दधिपूरितम् ।
एकादशं तैलपात्रं द्वादशं मधुपूरितम् ॥

त्रयोदशं रत्नपात्रमन्नपात्रं चतुर्दशम् ।
फलपात्रं पञ्चदशं कार्पासं षोडशं स्मृतम् ॥

एतानि दत्वा राजाऽसौ सप्तजन्मान्तरे भवेत् ।
सुभगो दर्शनीयश्च नारी वा पुरुषो भवेत् ॥

इति पात्रदानानि ।

————(:o:)————

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ कल्पदानानि

मत्स्यपुराणे मत्स्य उवाच —

कल्पानुकीर्तनं वक्ष्ये [1]सर्वकामफलप्रदम् ।
यस्यानुकीर्तनादेव वेदपुण्येन युज्यते ॥

प्रथमः श्वेतकल्पस्तु द्वितीयो नीललोहितः ।
वामदेवस्तृतीयस्तु ततो राथन्तरोऽपरः ॥

रौरवः पञ्चमः प्रोक्तः [2]षष्ठः प्राण इति स्मृतः ।
सप्तमोऽथ बृहत्कल्पः कन्दर्पोऽष्टम उच्यते ॥

सद्योऽथ नवमः प्रोक्त ईशानो दशमः स्मृतः ।
[3]व्यान एकादशः प्रोक्तस्तथा सारस्वतः परः ॥

त्रयोदश उदानस्तु गारुडोऽथ चतुर्दशः ।
कौर्मः पञ्चदशः प्रोक्तः [4]पौर्णमासः स्मृतो हि यः ॥

षोडशो नारसिंहस्तु समानस्तु ततोऽपरः ।
आग्नेयोऽष्टादशः प्रोक्तः सोमकल्पस्तथाऽपरः ॥

मानवो विंशतितमस्तत्पुमानिति चापरः ।
वैकुण्ठश्चापरस्तद्वल्लक्ष्मीकल्पस्तथाऽपरः ॥

---

1. महापातकनाशनम्–मत्स्य. 2. षष्ठो देवइति स्मृतः मत्स्य. 3. तम एकादशः मत्स्य. 4. पौर्णमास्यामजायत–मत्स्य.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चतुर्विंशतितमः प्रोक्तः [1]सावित्रः कल्पसंज्ञितः ।
पञ्चविंशस्ततो घोरो वाराहस्तु ततोऽपरः ॥

[2]सप्तविंशोऽथ वैराजो गौरीकल्पस्तथाऽपरः ।
[3]माहेश्वरस्ततः प्रोक्तस्त्रिपुरो यत्र घातितः ॥

पितृकल्पस्तथान्ते तु या कुहूर्ब्रह्मणः [4]स्मृता ।
इत्येवं ब्रह्मणो मासः सर्वपातकनाशनः ॥

आदावेव हि माहात्म्यं यस्मिन् यस्य विधीयते ।
तस्य कल्पस्य तन्नाम विहितं ब्रह्मणा पुरा ॥

यस्तु दद्यादिमान् कृत्वा हैमान् पर्वणि पर्वणि ।
ब्रह्मविष्णुपुरे [5]कल्पं मुनिभिः पूज्यते दिवि ॥

सर्वपापक्षयकरं कल्पदानं यतो भवेत् ।
मुनिरूपांस्ततः कृत्वा [6]सङ्कल्प्य तु विचक्षणः ॥

पुराणसंहिता चेयं तव भूप मयोदिता ।
सर्वपापहरा नित्यमारोग्यश्रीफलप्रदा ॥

अत्रापि मुनिरूपश्वेतादिसौवर्णकल्पस्य दानं तत्पूजनप्रतिगृहीतृवरणादि-कर्मकलापो दानान्तरवद् ज्ञेयः ।

इति कल्पदानानि ।

——(:o:)——

---

1. सावित्रीकल्पसंज्ञकः मत्स्य. 2. सदाविंशाथ D. 3. माहेश्वरस्तु स प्रोक्तः मत्स्यः. 4. परा. म. 5. कल्प्यं D. वासं म. 6. दद्यात्कल्पान्विचक्षणः म.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ नानादानानि

मनुः —

वारिदस्तृप्तिमाप्नोति सुखमक्षय्य[1]मन्नदः ।
तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ॥

भूमिदो [2]भूमिमाप्नोति दीर्घमायुर्हिरण्यदः ।
गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमम् ॥

वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः ।
अनडुदः श्रियं पुष्टां गोदो ब्रध्नस्य विष्टपम् ॥

यानशय्याप्रदो भार्यामैश्वर्यमभयप्रदः ।
धान्यदः शाश्वतं सौख्यं ब्रह्मदो [3]ब्रह्मसार्ष्टिताम् ॥

ऋष गताविति यस्मादाङ्पूर्वादार्षणमार्षिः, समान आर्षिर्यस्य सार्षिः । तद्भावः सार्ष्टिता । [4]समानगतित्वमित्यर्थः ॥

यमः —

दत्त्वा प्रतिश्रयं लोके तथा दत्त्वैव चाभयम् ।
तथा दत्त्वाऽभयं विप्रे ब्रह्मलोके महीयते ॥

प्रतिश्रयः प्रवासिनामाश्रयः ।

छत्रदो गृहमाप्नोति गृहदो नगरं तथा ।
उपानहोः प्रदानेन रथमाप्नोत्यनुत्तमम् ॥

---

1. मंदनः D. 2. स्वर्ग पा.कां. P. २५७. 3. ब्रह्मसाम्यताम् दा. कां. २५७. 4. ब्रह्मसामता दा.कां.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इन्धनानां प्रदानेन दीप्ताग्निर्भुवि जायते ।
गवां ग्रासप्रदानेन सर्वपापैः प्रमुच्यते ॥

संवर्तः —

नानाविधानि दानानि शुद्धानि विविधानि च ।
आयुःकामेन देयानि स्वर्गमक्षय्यमिच्छता ॥

[1]द्रव्याणि भक्ष्यभोज्यानि धनानि हिरण्यादीनि ।

वस्त्रदाता सुवेषः स्याद् रूप्यदो रूपमुत्तमम् ।
हिरण्यदो महावृद्धिं दीर्घमायुश्च विन्दति ॥

फलमूलानि पक्वानि शाकानि विविधानि च ।
पानानि दत्त्वा विप्रेभ्यो मुदा युक्तः सदा भवेत् ॥

ताम्बूलं च यो दद्याद् ब्राह्मणेभ्यो विचक्षणः ।
मेधावी सुभगः प्राज्ञो दर्शनीयश्च जायते ॥

गुडमिक्षुरसं चैव लवणं व्यञ्जनानि च ।
सुरभीणि च वस्तूनि दत्त्वाऽत्यन्तं सुखी भवेत् ॥

वायुपुराणे —

न्यायतो यानि प्राप्नोति शाकान्यपि नृपोत्तम ।
तानि देयानि देयास्तु कन्यका योषितस्तथा ॥

[2]आदित्यपुराणे —

अलङ्कारं तु यो दद्याद्विप्रायाथ सुराय च ।
स गच्छेद्वारुणं लोकं नानाभरणभूषितः ॥

---

1. द्रव्याणि भक्ष्यभोज्यादीनि दीमहार्घवृद्धिर्दीर्घमायुश्च विन्दति D. 2. नन्दिपुराणे दा.खं. २६७.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विष्णुपुराणे --

यद्यदिष्टतमं लोके यद्वास्य दयितं भवेत् ।
तत्तद् गुणवते देयं तदेवाक्षय्यमिच्छता ॥

नारसिंहपुराणे —

एकविंशत्यमी स्वर्गा निविष्टा मेरुमूर्धनि ।
अहिंसादानकर्तारो यज्ञानां तपसां तथा ॥

एतेषु निवसन्ति स्म नराः क्रोधविवर्जिताः ॥

एकविंशतिस्वर्गा [2]वक्ष्यमाणा आनन्दादयः ।

जलप्रवेशी चानन्दं प्रमोदं वह्निसाहसी ।
भृगुप्रपाती सौख्यं तु रणे चैवातिनिर्मलम् ॥

अनशनेन तु संन्यासे मृतो गच्छेत् त्रिविष्टपम् ।
[3]क्रतुयाजी नाकपृष्ठमग्निहोत्री च निर्वृतिम् ॥

तडागकूपकर्ता च लभते पौष्टिकं द्विजः ।
सुवर्णदायी सौभाग्यं लभते सुमहातपाः ॥

शीतकाले महावह्निं प्रज्वालयति यो नरः ।
सर्वसत्त्वहितार्थाय स्वर्गमप्सरसां लभेत् ॥

[4]हिरण्यगोप्रदानेन कन्यादानेन मङ्गलम् ।
द्विजेभ्यस्तर्पणं कृत्वा दत्त्वा वस्त्राणि [5]भक्तितः ॥

---

1. एकविंशतिरमी. 2. अनन्तरं दा.कां. २६८. 3. क्रतुयाजी सोमयागकर्ता दा. कां. २६९. 4. हिरण्यगोदानेन पुण्याहं D. अश्वदानेन दा. कां. 5. शक्तितः दा.कां. २७०.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्वेतं तु लभते स्वर्गं यत्र गत्वा न शोचति ।
कपिलागोप्रदानेन परमार्थं महीयते ॥

एकान्नभोजी यो मर्त्यो नक्तभोजी च नित्यशः ।
उपवासी त्रिरात्राद्यैः श्रान्तः स्वर्गं महीयते ॥

एकान्नभोजी एकभक्ती ।

[1]एकाहारी जितक्रोधो ब्रह्मचारी दृढव्रतः ।
निर्मलं स्वर्गमाप्नोति तथा भूतहिते रतः ॥

विद्यादानेन मेधावी निरहङ्कारमाप्नुयात् ।
येन येन हि भावेन यद्यद्दानं प्रयच्छति ॥

तत्तत् स्वर्गमवाप्नोति यद्यदिच्छति मानवः ।
यस्तु सर्वाणि दानानि ब्राह्मणेभ्यः प्रयच्छति ॥

संप्राप्य न निवर्तेत स्वर्गं शान्तमनामयम् ।

विष्णुधर्मोत्तरे ––

आयुधानां प्रदानेन [2]शत्रुनाशमवाप्नुयात् ।
राजलिङ्गप्रदानेन राजा भवति भूतले ॥

राजलिङ्गं राजचिह्नं [3]छत्रचामरादि ।

यमः ––

देवमाल्यापनयनं देवागारसमूहनम् ।
मार्जनं सर्वदेवानां गोप्रदानसमं स्मृतम् ॥

---

1. सरित्स्नायी दा.कां. 2. रिपु वि. 3. धत्रं D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

याज्ञवल्क्यः ––

श्रान्तसंवाहनं रोगिपरिचर्या सुरार्चनम् ।
पादशौचं द्विजोच्छिष्टं गोप्रदानसमं स्मृतम् ॥

इति नानादानानि ।

————(:o:)————

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ तत्तद्द्रव्याणां दानमन्त्राः

तत्र वस्त्रस्य —

शरण्यं सर्वलोकानां [1]लज्जाया रक्षणं परम् ।
सुवेषधारी त्वं यस्माद्वासः शान्तिं प्रयच्छ मे ॥

रक्तवस्त्रस्य —

रक्तवस्त्रयुगं यस्मादादित्यस्य प्रियं सदा ।
प्रदानादस्य मे सूर्य अतः शान्तिं प्रयच्छ मे ॥

अथान्नस्य —

अन्नमेव यतो लक्ष्मीरन्नमेव जनार्दनः ।
अन्नं ब्रह्माखिलत्राणमस्तु मे जन्मजन्मनि ॥

दध्यन्नस्य —

दध्यन्नं सोपदंशं च ब्रह्मविष्णुशिवात्मकम् ।
प्रीयतां धर्मराजो मे तद्दानान्मम सर्वदा ॥

चन्द्रमण्डलमध्यस्थं चन्द्राम्बुदसमप्रभम् ।
नित्यं दध्यन्नदानेन प्रीयतां वामनो मम ॥

कृशरान्नस्य —

सर्वात्मा सर्वलोकेशः सर्वव्यापी सनातनः ।
नारायणः प्रसन्नः स्यात् कृशरान्नप्रदानतः ॥

---

1. ज्जलया D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पायसान्नस्य —

पायसं परमान्नं वः सर्वदानोत्तमं मतम् ।
सर्वदैवतयोग्यं च श्रेयः पुष्टिं प्रयच्छ तु ॥

अपूपान्नस्य —

आदित्यतेजसा युक्तं ज्ञातिश्रैष्ठ्यकरं परम् ।
दत्तं ते मम विप्रत्वं प्रयच्छापूपमुत्तमम् ॥

सक्त्वन्नस्य —

प्राजापत्या यतः प्रोक्ताः सक्तवो यज्ञकर्मणि ।
तस्मात् सक्तून् प्रयच्छामि प्रीयतां मे प्रजापतिः ॥

हिरण्यस्य —

हिरण्यगर्भगर्भस्त्वं हेम बीजं विभावसोः ।
अनन्तपुण्यफलदामतः शान्तिं प्रयच्छ मे ॥

रजतस्य —

शिवनेत्रसमुद्भूतं रजतं पितृवल्लभम् ।
तस्मादस्य प्रदानेन रुद्रः सम्प्रीयतां मम ॥

ताम्रपात्रस्य —

परापवादपैशुन्यादभक्ष्यस्य च भक्षणात् ।
तत्रोक्तं च यत् पापं ताम्रपात्रात् प्रणश्यतु ॥

कांस्यपात्रस्य —

यानि पापानि काम्यानि कामोत्थानि कृतानि च ।
कांस्यपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तिलपात्रस्य —

देवदेव जगन्नाथ वाञ्छितार्थफलप्रद ।
तिलपात्रं प्रदास्यामि तवाङ्गे संस्थितस्पृहः ॥

दर्पणस्य —

दर्शनेन त्वमादर्श नृणां मङ्गलदायक ।
शौर्यसौभाग्यसत्कीर्तिनिर्मलज्ञानदो भव ॥

रत्नस्य —

यथा रत्नेषु सर्वेषु सर्वे देवा व्यवस्थिताः ।
तथा शान्तिं प्रयच्छन्तु रत्नदानेन मे सुराः ॥

मुक्ताफलस्य —

ताम्रपर्ण्यर्णवोत्पन्ना वर्णाद्याः कल्पवर्णिताः ।
मुक्ताः शुक्त्युद्भवाः सन्तु भुक्तिमुक्तिप्रदा मम ॥

सुवर्णपद्मस्य —

पद्मुद्भवो जगत्स्रष्टुर्वेधसो हेमपङ्कजम् ।
पद्मावासं हरेर्नाभिजातं मां पाहि सर्वदा ॥

सिंहस्य —

कान्तारवनदुर्गेषु चोरव्यालाकुले पथि ।
हिंसावन्तो न हिंसन्तु सिंहदानप्रभावतः ॥

अङ्गुलीयकस्य —

हिरण्यगर्भसम्भूतं सौवर्णं चाङ्गुलीयकम् ।
धर्मप्रदे प्रयच्छामि प्रीणातु कमलापतिः ॥

---

1. व्यालकले D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वलयस्य —

काञ्चनं हस्तवलयं रूपकान्तिसुखप्रदम् ।
विभूषणं प्रदास्यामि विभूषयतु मां सदा ॥

कुण्डलस्य —

क्षीरोदमथने पूर्वमुद्धृतं कुण्डलद्वयम् ।
श्रिया सह समुद्भूतं ददे श्रीः प्रीयतां मम ॥

[1]तुलस्याः —

मणिकाञ्चनपुष्पाणि मणिमुक्तामयानि च ।
तुलसीपत्रदानस्य कलां नार्हन्ति षोडशीम् ॥

सुवर्णतुलसीदानं [2]ब्रह्मणः कायसम्भवम् ।
पापं प्रशममायातु सर्वे सन्तु मनोरथाः ॥

क्षीरस्य —

अलक्ष्मीहरणं नित्यं सौभाग्यस्य च वर्धनम् ।
क्षीरं मङ्गलमायुष्यमतः शान्तिं प्रयच्छ मे ॥

नवनीतस्य —

कामधेनोः समुद्भूतं विष्णोस्तुष्टिकरं शुभम् ।
नवनीतं प्रदास्यामि धृतिं पुष्टिं च देहि मे ॥

आज्यस्य —

कामधेनोः समुद्भूतं देवानामुत्तमं हविः ।
आयुर्विवर्धनं दातुराज्यं पातु सदैव मे ॥

---

1. तुलसी D. 2. ब्राह्मणः कायसंभवः D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तैलस्य —

तैलं पुष्टिकरं नित्यमायुष्यं पापनाशनम् ।
अमाङ्गल्यहरं पुण्यमतः शान्तिं प्रयच्छ मे ॥

पादुकयोः —

कण्टकोच्छिष्टपाषाणवृश्चिकादिनिवारणे ।
पादुके सम्प्रदास्यामि विप्र प्रीत्या प्रगृह्यताम् ॥

चामरस्य —

शशाङ्ककरसङ्काशं हिमहिण्डीरपाण्डुरम् ।
प्रोत्सारयाशु दुरितं चामरामरवल्लभ ॥

छत्रस्य —

इहामुत्रातपत्राणे कुरु केशव मे प्रभो ।
छत्रं त्वत्प्रीतये दत्तं ब्राह्मणाय मया इह ॥

चन्दनस्य —

चन्दनावास मन्दारसख वृन्दारकार्चित ।
चन्दन त्वत्प्रदानान्मे सान्द्रानन्दप्रदो भव ॥

गन्धस्य —

श्रीखण्डागरुकर्पूरकस्तूरीकुङ्कुमान्वितम् ।
विलेपनं प्रयच्छामि सौख्यमस्तु सदा मम ॥

कस्तूर्याः —

समस्तेभ्योऽपि वस्तुभ्यः संस्तुतासि सुरासुरैः ।
विन्यस्ताङ्गेषु कस्तूरी सुखदाऽस्तु सदा मम ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कर्पूरस्य —

कन्दर्पदर्पदं यस्मात् कर्पूरं घ्राणतर्पणम् ।
अहर्पतिभवस्तापस्तद्दानादपसर्पतु[1] ॥

गोपीचन्दनस्य —

यदभूदङ्गसंलग्नं कुङ्कुमादिविलेपनम् ।
जलक्रीडासु गोपीनां द्वारवत्यां जलार्पितम् ॥

गोपीचन्दनमित्युक्तं मुनीन्द्रैः किल्बिषापहम् ।
तस्मादस्य प्रदानेन विष्णुर्दिशतु वाञ्छितम् ॥

शिवप्रतिमायाः —

त्वया सुराणाममृतं विधाय
हालाहलं संहृतमेव यस्मात् ।
तथाऽसुराणां त्रिपुरं च दग्धम्
एकेषुणा लोकहितार्थमीश ॥

त्वद्रूपदानादहमद्य दोषैर् –
विमुक्तकामस्तु गणान् प्रपद्ये ।
तथा कुरु त्वं शरणं प्रपन्ने
मयि प्रभो देववर प्रसीद ॥

उमामहेश्वरस्य —

प्रसीदतु भवो नित्यं कृत्तिवासा महेश्वरः ।
पार्वत्या सहितो देवो जगदुत्पत्तिकारकः ॥

---

1. दर्पसर्पतु D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लिङ्गस्य —

शिवशक्त्यात्मकं यस्माज् जगदेतच्चराचरम् ।
तस्मादनेन सर्वं मे करोतु भगवान् शिवः ॥

कैलासवासी गौरीशो भगवान् भगनेत्रभृत् ।
चराचरात्मको लिङ्गरूपी दिशतु वाञ्छितम् ॥

[1]मरकतलिङ्गस्य —

इदं मारकतं लिङ्गं रौप्यपीठसमन्वितम् ।
धान्यैर्द्वादशभिर्युक्तमेकादशफलान्वितम् ॥

सम्प्रदद्यां विधानेन यथोक्तं फलमस्तु मे ।

[2]कश्मीरलिङ्गस्य —

इदं काश्मीरजं लिङ्गं रौप्यपीठसमन्वितम् ।
धान्यैर्द्वादशभिर्युक्तमेकादशफलान्वितम् ॥

सम्प्रदद्यां विधानेन यथोक्तं फलमस्तु मे ॥

भूमेः —

सर्वभूताश्रया भूमिर्वराहेण समुद्धृता ।
अनन्तसस्यफलदा अतः शान्तिं प्रयच्छ मे ॥

ऊर्णायाः —

ऊर्णा मेषसमुत्पन्ना शीतवातभयापहा ।
यस्मात्तुषराहारी स्यादतः शान्तिं प्रयच्छ मे ॥

---

1. मरकतलिंगस्य–भूमेः om. A. 2. काश्मीरलिङ्गे तु इदं काश्मीरजमिति वदेत् D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

[1]ऊर्णापट्टस्य —

और्णपट्टमनुध्येयं स्वर्णबीजं तव प्रभो ।
दत्तं गृहाण देवेश पापं संहर सत्वरम् ॥

धान्यस्य —

धान्यं करोति दातारमिह लोके परत्र च ।
तस्मात् प्रदीयते [2]धान्यमतः शान्तिं प्रयच्छ मे ॥

मुद्गानां —

मुद्गबीजानि वै यस्मात् प्रियाणि परमेष्ठिनः ।
तस्मादेषां प्रदानेन प्रीतः सिध्यतु मे सदा ॥

चणकस्य —

पुरा गोवर्धनोद्धारसमये हरिभक्षिताः ।
चणकाः सर्वपापघ्ना अतः शान्तिं प्रयच्छ मे ॥

माषाणां —

यस्माम् मधुवधे काले विष्णुदेहसमुद्भवाः ।
पितृप्रीतिकरा माषा अतः शान्तिं प्रयच्छ मे ॥

---

1. om A. 2. सौम्यमतः D. A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लवणस्य —

रसानामग्रजं श्रेष्ठं लवणं बलवर्धनम् ।
ब्रह्मणा निर्मितं साक्षादतः शान्तिं प्रयच्छ मे ॥

यवानां —

धान्यराजो अथ माङ्गल्या द्विजप्रीतिकरा यवाः ।
तस्मादेषां प्रदानेन ममाऽस्त्वविकलं फलम्[1] ॥

तिलस्य —

तिलाः पापहरा नित्यं विष्णोर्देहसमुद्भवाः ।
तिलदानेन सर्वं मे पापं नाशय केशव ॥

शङ्खस्य —

पुण्यस्त्वं सर्वपुण्यानां मङ्गलानां च मङ्गलम् ।
विष्णुना विधृतो नित्यमतः शान्तिं प्रयच्छ मे ॥

गुडस्य —

अमृतस्य कुलोत्पन्ना इक्षुधारातिशर्करा ।
तस्मादस्य प्रदानेन मम सन्तु मनोरथाः ॥

[2]दास्याः —

इयं दासी मया तुभ्यं श्रीवत्सा प्रतिपादिता ।
सदा कर्मकरी भोज्या यथेष्टं भद्रमस्तु ते ॥

---

1. पलं D. 2. om A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मधुनः —

यस्मात् पितॄणां श्राद्धे त्वं प्रीतिदं चामृतोद्भवम् ।
तस्मात्तव प्रदानेन रक्ष मां दुःखसागरात् ॥

उदकुम्भस्य —

वारिपूर्णवटोपेतं देवत्रयमयं यतः ।
प्रीयतां धर्मराजस्तु दानेनानेन पुण्यदः ॥

उपानहोः —

उपानहौ प्रदास्यामि कण्टकादिनिवारणे ।
सर्वस्थानेषु सुखदे अतः शान्तिं प्रयच्छ मे ॥

व्यजनस्य —

त्रिकालं सर्वजन्तूनां शैत्यानन्दकरी शुभा ।
पितॄणां तृप्तिदा नित्यमतः शान्तिं प्रयच्छ मे ॥

शय्यायाः —

यस्मादशून्यं शयनं केशवस्य शिवस्य च ।
शय्या ममाप्यशून्या[1]ऽस्तु तथा जन्मनि जन्मनि ॥

शिबिकायाः —

देवदेव जगन्नाथ विश्वात्मन् दत्तयाऽनया ।
प्रभो शिबिकया देव प्रीतो भव जनार्दन ॥

---

1. °शून्या च भवेज्जन्मनि A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पानीयदध्योदनस्य ––

पानीयं वै सुगन्धं च सदध्योदनपात्रकम् ।
समानीतं तु सुफलं दक्षिणां च गृहाण मे ॥

गृहस्य ––

इदं गृहं गृहाण त्वं सर्वोपस्करसंयुतम् ।
तव विप्र प्रसादेन ममाऽस्त्वभिमतं फलम् ॥

शालग्रामस्य ––

महाकोशनिवासेन चक्राद्यैरुपशोभितम् ।
अस्य देव प्रदानात्तु मम सन्तु मनोरथाः ॥

शिवनाभस्य ––

महाकोशनिवासस्त्वं महादेवो महेश्वरः ।
प्रीयतां तव दानेन अतः शान्तिं प्रयच्छ ये ॥

कन्यायाः ––

कन्यां कनकसंयुक्तां कनकाभरणैर्युताम् ।
दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ॥

कपिलायाः ––

कपिले सर्वदेवानां पूजनीयाऽसि रोहिणी ।
तीर्थदेवमया यस्मादतः शान्तिं प्रयच्छ मे ॥

कृषिप्लवस्य ––

यस्मात् त्वं पृथिवी सर्वा धेनोर्वैकृष्ट्या सन्निभा ।
सर्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धेनोः —

धेनो त्वं पृथिवी सर्वा यस्मात् केशवसन्निभा ।
सर्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे ॥

गोः —

गवामङ्गेषु तिष्ठन्ति भवनानि चतुर्दश ।
यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च ॥

वैतरण्याः —

यमद्वारे महाघोरे या सा वैतरणी[2] नदी ।
तां तर्तुं गां प्रयच्छामि उत्ताराय सुखेन माम् ॥

उत्क्रान्तिगोः —

इत्युत्क्रान्तौ प्रवृत्तस्य सुखोत्क्रान्तिविवृत्तये ।
तुभ्यं सम्प्रददे नाम्ना गां समुत्क्रान्तिसंज्ञिकाम् ॥

वृषस्य —

धर्म त्व वृषरूपेण जगदानन्दकारक ।
अष्टमूर्तेरधिष्ठानमतः शान्तिं प्रयच्छ मे ॥

अश्वस्य —

विष्णुस्त्वमश्वरूपेण यस्मादमृतसम्भवम् ।
चन्द्रस्य वाहनं नित्यमतः शान्तिं प्रयच्छ मे ॥

रथस्य —

रथाय रथनाथाय नमस्ते विश्वगामिने[3] ।
विश्वभूताधिनाथाय अरुणाय नमो नमः ॥

---

1. धेन्वां D. A. 2. वैररिणी A. 3. विश्वकर्मणे दा. खं. ६१०.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महिष्याः ---

इन्द्रादिलोकपालानां या राज्यमहिषी सदा ।
महिषीदानमाहात्म्यादस्तु मे सर्वकामदा ॥

धर्मराजस्य साहाय्ये यस्याः पुत्रः प्रतिष्ठितः ।
महिषासुरस्य जननी साऽस्तु मे सर्वकामदा[1] ॥

मृत्युमहिष्याः —

महिषीं वत्ससंयुक्तां सुशीलां च पयस्विनीम् ।
रक्तवस्त्रेण पुष्पेण दत्त्वा मृत्युं जयेन्नरः ॥

छागस्य —

यस्मात् त्वं छाग यज्ञानामाहुतित्वे व्यवस्थितः ।
यानं विभावसोर्नित्यमतः शान्तिं प्रयच्छ मे ॥

मेष्याः —

रोमत्वङ्मासमज्जाद्यैः सर्वोपकरणैः शुभम् ।
जगतः संप्रवृत्ताऽसि त्वामतः प्रार्थये शिवम् ॥

[2]अजायाः —

त्वं पूर्वं ब्रह्मणा सृष्टा पवित्रा भवती परा ।
त्वत्प्रसूतौ[3] स्थिता यज्ञास्तस्माच्छान्तिकरी भव ॥

मेषस्य —

देवानां यो मुखं हव्यवाहनः सर्वपूजितः[4] ।
तस्य त्वं वाहनं पूज्यं देवैः सेन्द्रैर्महर्षिभिः ॥

---

1. वरदा मम दा. खं. ६७१. 2. अजामन्त्रः D. 3. त्वत्प्रसूतोत्थिता दा. खं. ६७८. 4. सर्वदेवताः A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अग्निमान्द्यं पूर्वकर्मविपाकोत्थं तु यन्मम ।
तत्सर्वं [1]विलयं यातु त्वद्दानेनोपसेवितम् ॥

शूलस्य —

भगवन् [2]शूलहस्तेश दक्षाध्वरविनाशन ।
तवायुधप्रदानेन [3]शूलं नश्यतु मे सदा ॥

लोहपात्रस्य —

यानि पापान्यनेकानि मया कामकृतानि च ।
लोहपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥

गुडस्य —

प्रणवः सर्वमन्त्राणां नारीणां पार्वती यथा ।
तथा रसानां प्रवरः सदैवेक्षुरसो मतः ॥

मम तस्मात् परां लक्ष्मीं ददस्व गुड सर्वदा ।

रौप्यपात्रस्य —

अगम्यागमनं चैव परदाराभिमर्शनम् ।
रौप्यपात्रप्रदानेन तानि नश्यन्तु सर्वदा ॥

सहिरण्यतिलानाम् —

तिलाः स्वर्णसमायुक्ता दुरितक्षयकारकाः ।
विष्णुप्रीतिकरा नित्यमतः शान्तिं प्रयच्छ मे ॥

---

1. नाशय क्षिप्रं जाठराग्निं विवर्धय इति वा पाठः D. 2. भगनेत्रघ्न दा. खं.
3. पापं नशा तु शंकर दा. खं. ७७९.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सहिरण्यतिलपात्रस्य —

[1]तिलाः पुण्याः पवित्राश्च सर्वकामकराः शुभाः ।
शुक्लाश्चैव तथा कृष्णा विष्णुगात्रसमुद्भवाः ॥

यानि कानि च पापानि ब्रह्महत्यासमानि च ।
तिलपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥

कूष्माण्डस्य —

ब्रह्महत्यादि[2]पापघ्नं ब्रह्मणा निर्मितं पुरा ।
कूष्माण्डं बहुबीजाढ्यमतः शान्तिं प्रयच्छ मे ॥

फलस्य —

इदं फलं मया विप्र स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

मण्डकानां —

आदित्यतेजसोत्पन्नाः सर्वमङ्गलकारकाः ।
मण्डकाः सर्वपापघ्ना अतः शान्तिं प्रयच्छ मे ॥

स्वर्णपात्रस्य —

जन्मजन्मसहस्रेषु सर्वपापविनाशकम् ।
स्वर्णपात्रप्रदानेन शान्तिरस्तु सदा मम ॥

व्यतीपातस्य —

शङ्कुकर्ण प्रलम्बोष्ठ लम्बभ्रूर्दीर्घनासिक ।
अष्टनेत्र चतुर्वक्त्र विस्तीर्ण शतयोजनम् ॥

---

1. तिलाः – मे सदा om A. 2. पापानां A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

व्यतीपात नमस्तेऽस्तु सोमसूर्यसुत प्रभो ।
यद्दानादिकृतं किञ्चित्तदक्षय्यमिहाऽस्तु मे ॥

आज्यस्य —

याऽलक्ष्मीर्यच्च मे दौस्थ्यं सर्वगात्रे व्यवस्थितम् ।
तत् सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्धय ॥

*पापक्षयार्थाज्यस्य —

आज्यं तेजः समुद्दिष्टमाज्यं पापहरं स्मृतम् ।
आज्यं सुराणामाहार आज्ये देवाः प्रतिष्ठिताः ॥

अयःपिण्डस्य —

यस्मादायस कर्माणि त्वदधीनानि सर्वदा ।
लाङ्गलाद्यायुधादीनि अतः शान्तिं प्रयच्छ मे ॥

आयुधस्य —

त्वं देवानां मनुष्याणां रक्षसामायुधमसि ।
तस्मात् सर्वप्रयत्नेन शान्तिर्भवतु मे सदा ॥

भक्ष्याणाम् —

केशवप्रीतिदा [1]भक्ताः शम्भुब्रह्मार्कपुष्टिदाः ।
पृथग्विधापूपकाद्या यच्छन्तु वलमौरसम् ॥

काष्ठस्य —

सोमोद्भवानि दारूणि जातवेदःप्रियाणि च ।
तस्मादेषां प्रदानेन श्रियं देहि विभावसो ॥

---

* om A. 1. भक्ष्याः E.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

[1]कुलित्थस्य —

अग्निवर्णोद्भवा नाम बलकीर्तिप्रवर्धनाः ।
कुलित्थाः सर्वपापघ्ना अतः शान्तिं प्रयच्छत ॥

कृष्टभुवः —

सदा रोहन्ति बीजानि काले कृष्टे महीतले ।
तव प्रदानात् सकला मम सन्तु मनोरथाः ॥

सङ्क्रान्तिशूलस्य —

सर्वग्रहर्क्षतारेश सर्वेश त्वं हि भास्कर ।
सङ्क्रान्तिशूलदोषं मे निवारय दिवाकर ॥

पुस्तकस्य —

सर्वविद्याश्रयं ज्ञानकारणं ललिताक्षरम् ।
पुस्तकं सम्प्रयच्छामि प्रिया भवतु भारती ॥

तण्डुलानम् —

अन्नेन जायते विश्वप्राणिनां प्राणरक्षणम् ।
तण्डुला वैश्वदेवत्याः पाकेनान्नं भवन्ति ये ॥

पावनाः सर्वयज्ञेषु प्रशस्ता होमकर्मणि ।
तस्मात्तण्डुलदानेन [2]प्रीयन्तां विश्वदेवताः ॥

---

1. कुलत्थस्य D. 2. प्रीयतां विश्वदेवता D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुमनसाम् —

ह्लादयन्ति मनो यस्मात्तस्मात् सुमनसः स्मृताः ।
दत्ता ददतु मे नित्यमत्याह्लादं सतीं श्रियम् ॥

जीरकस्य —

जरा नो जायते यस्मान्मण्डनं शुभकर्मसु ।
तस्माज्जीरकदानेन प्रीयतां गिरिजा मम ॥

ताम्बूलस्य —

ताम्बूलं श्रीकरं भद्रं ब्रह्मविष्णुशिवात्मकम् ।
अस्य प्रदानाद् ब्रह्माद्या श्रियं ददतु पुष्कलाम् ॥

ताम्बूलकरङ्कस्य —

पूरितं पूगपूगेन नागवल्लीदलान्वितम् ।
पूर्णेन चूर्णपात्रेण कर्पूरपिटिकेन च ॥

सपूगखण्डं दिव्यगं गन्धर्वाप्सरसां प्रियम् ।
करङ्क त्वं निरातङ्कं त्वत्प्रसादात् कुरुष्व माम् ॥

हरिद्रायाः —

लक्ष्मीप्रिया च लक्ष्मीदा लक्ष्मीव वसनाश्रया ।
सौभाग्यकृद्वरस्त्रीणां हरिद्रा श्रीप्रदाऽस्तु मे ॥

[1]हेमाद्रौ व्रतकाण्डेऽन्येपि —

---

1. हेमाद्रौ–°मभीष्टदम् (पृ. ३५५) इति भागः नास्ति A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सौभाग्यद्रव्यस्य —

कञ्चुकीवस्त्रयुग्मैश्च तथा कर्णावतंसकैः ।
कण्ठसूत्रैश्च भूषाभिः प्रीयतां निर्मिनन्दिनी ॥

शूर्पस्य —

रामपत्नि महाभागे पुण्यमूर्ते निराभये ।
गृहाणेमानि शूर्पाणि मया दत्तानि जानकि ॥

कमण्डलोः —

कमण्डलुर्जलैः पूर्णः स्वर्णाभैः सुलक्षणः ।
अर्पितस्ते महासेन प्रसन्नस्तेन मे भव ॥

यज्ञोपवीतस्य —

ब्रह्मसूत्रं महादिव्यं मया यत्नेन निर्मितम् ।
ब्राह्मं जन्माऽस्तु मे देव ब्रह्मसूत्रसमर्पणात् ॥

रुद्राक्षमालायाः —

अष्टाविंशतिसंख्याकै रुद्राक्षैर्योजिता मया ।
अर्पिता . . . णा सुर सैन्यप ॥

स्वर्णनागस्य —

विधुन्तुद नमस्तुभ्यं सिंहिकानन्दनाव्यय ।
दानेनानेन नागस्य रक्ष मां वेधजाद्भयात् ॥

इक्षोः —

इक्षु . . . . रसालं सर्वकामदम् ।
तुभ्यं दास्यामि तेनाशु प्रीयतां परमेश्वरः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूर्यमूर्तेः —

कर्पूरः कदलीभूतो देवदेवप्रियः सदा ।
भाग्योत्तमो नृपाणां च तद्दानात् सुखमस्तु मे ॥

ददामि सानुं भवते सर्वोपस्करसंयुतम् ।
मनोभिलषितावाप्तिं करोतु मम भास्करः ॥

गणेशमूर्तेः —

यमामनन्ति विश्वेशं विश्वनाथमुमापतिम् ।
विश्वेश्वरं क्षिप्रवरं तुभ्यं दास्याम्यभीष्टदम् ॥

इति श्रीकोदण्डपरशुरामेत्यादिविविधविरुदावलीविराजमानमानोन्नत–महाराजाधिराजश्रीमदनसिंहविरचिते मदनरत्नप्रदीपे दानविवेकोद्द्योते प्रकीर्णक–दानानि[1] ॥

———(:०:)———

1. रामार्पणमस्तु A.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ जलाशयोत्सर्गः

तत्र जलाशयप्रशंसा विष्णुधर्मोत्तरे --

उदकेन विना तृप्तिर्नास्ति लोकद्वये सदा ।
तस्माज्जलाशयाः कार्याः [1]पुरुषेण विपश्चिता ॥

[2]यमः —

तडागे यस्य पानीयं सततं खलु तिष्ठति ।
स्वर्गलोकगतिस्तस्य नात्र कार्या विचारणा ॥

तडागकर्ता वसति स्वर्गे युगचतुष्टयम् ।
यत्र विप्रोऽथ गौरेका [3]प्रीयते सलिले क्वचित् ॥

तडागं तादृशं कृत्वा स्वर्गे दशयुगं वसेत् ।

विष्णुधर्मोत्तरे --(३.२९६.६)·

अग्निष्टोमसमः [4]कूपसोऽश्वमेधसमो मरौ ।
कूपः प्रवृत्तपानीयः [5]सर्वं हरति दुष्कृतम् ॥

नन्दिपुराणे —

यो वापीमथ वा कूपं देशे तोयविवर्जिते ।
खानयेत् स नरो याति स्वर्गं [6]प्रेत्य शतं समाः ॥

---

1. विचारण A. 2. यमः -- नात्रकार्या विचारणा इति भागो नास्ति–A. 3. पायिनी सलिलं दा.का. २७८. 4. सोश्वमेघसमोपरौ D. 5. स्त्वर्धं हरति दुष्कृतम् वि.ध. 6. पेत्य D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देवैरैकत्वमतुलं तृष्णया[1] वर्जितस्तथा ।

आदित्यपुराणे —

सेतुबन्धरता ये च तीर्थशौचरताश्च ये ।
तडागकूपकर्तारो मुच्यन्ते ते तृषाभयात् ॥

विष्णुः —

कूपारामतडागेषु देवतायतनेषु च ।
पुनः संस्कारकर्ता च लभते मौलिकं फलम् ॥

अस्य विशेषलक्षणादिकमुक्तं देवीपुराणे —

तलखातं तडागं तु विपाली त्रेष्टिका[2] मता ।
शोभाढ्या दीर्घिका प्रोक्ता चतुरस्रा तु वापिका ॥

कूपाः पादविहीनाश्च सपादा[3]स्तोरणान्विताः ।
[4]संक्रमा बन्धवरणा सरन्ती मातृका मता ॥

गिरेरन्तर्गता द्वारी संस्पोट[5]मुदकं तथा ।
[6]चक्रमर्दः सचलको ह्यर्गला चेति चान्तिमा ॥

गर्गः —

कुर्यात् पञ्चकरादूर्ध्वं पञ्चविंशत्करावधि ।
कूपं वृत्तायतं प्राज्ञः सर्वभूतसुखावहम् ॥

देवीपुराणे —

कूपं पञ्चकरादूर्ध्वं यावद्व[7]र्गस्तदुद्भवः ।

---

1. तृष्णाक्षुद्° दा. कां. 2. विश्वकी दा.कां. P. २८९. 3. तोरणावित A. 4. शक्रसाबन्धकरणाज् जरन्ती हिटिकामती A. °झिरन्ती झिष्टिका मता दा.खं. P. ९१९. 5. संस्फोटं हरकं दा.कां. २८९. 6. चंकमंद सबालाको अर्गला चेति चन्तमः A. 7. यावद्वंशं तदुद्भवं दा.कां. २९७.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तदुद्भवः पञ्चसंख्योद्भवो वर्गो यावत्। मूलसंख्यैव स्वेन गुणिता वर्गः। स्वघ्नो वर्ग इत्युक्तेः। तथा च पञ्चकरपरिमाणयावच्छक्यं कूपः कार्य इत्यर्थः।

वापी दण्डत्रयादूर्ध्वं दशवर्गा नृपोत्तमैः।

दशवर्गेत्यनेन पूर्वोक्तप्रकारेण शतसंख्या लभ्यते।

कर्तव्या सर्वथोत्तारा द्वित्र्येकमथाऽपि वा।
विन्यासं भद्रकं चान्यैर्वृत्ता वा चायता तथा[1] ॥

त्र्यस्रा चार्धचन्द्रा वा धानु[2]श्चक्रसमाकृतिः।
कर्तव्या द्रव्यसारेण[3] गोपथा सर्वकामदा ॥

वेदाष्टमध्यगोत्सारा करसार्धा यथा भवेत्।
कूपो वा शैलयष्टीव[4] देया नेमी यथा दृढा ॥

भवनैः काष्ठपाषाणैरुच्चं[5] यावत्समुच्छ्रया।

तथा,

वृत्ता[6] वा चतुरस्रा वा वाप्यः साधारणा मताः ॥

शेषाः काम्याधिकारेण कूपो वृत्तः शुभावहः।

अत्र कालविशेषो वह्निपुराणे —

वापीकूपतडागानां कस्मिन् काले विधिः स्मृतः।
सुदिने शुभनक्षत्रे प्रतिष्ठा शुभदा स्मृता ॥

---

1. वापी तथाऽथवा A. 2. धनुषा च शिवाकृतिः दा. कां. 298. 3. द्रव्यकारा तु दा. कां p. 298 धुराकारा दा. खं. 976. 4. शैलनेष्टी A. 5. °पाषाणमृद्धपीठसमुच्छ्रयाः दा. खं. 298. 6. वृत्तायताश्चतुरस्राः दा. कां.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कर्कटे पुत्रलाभश्च सौख्यं तु मकरे भवेत् ।
मीने यशोऽर्थलाभश्च कुम्भे वसु बहूदकम् ॥

वृषे च मिथुने वृद्धिर्वृश्चिकेऽल्पजलं भवेत् ।
पितृतृप्तिस्तु कन्यायां तुलायां शाश्वती गतिः ॥

सिंहो मेषो धनुर्नाशं लक्ष्मीश्च द्विज यच्छति ।

भविष्योत्तरे (१२७. ६-७) —

तस्मिन् सलिलसम्पूर्णं कार्तिके च विशेषतः ।
तडागस्य विधिः कार्यः स्थिरनक्षत्रयोगतः ॥

मुनयः केचिदिच्छन्ति [1]ह्यतीते चोत्तरायणे ।
[2]न कालनियमस्तत्र [3]सलिलं तत्र कारणम् ॥

अत्र सलिलपूर्णसमयस्य प्राधान्यकथनं तु काले जलवृद्धिरहितक्षुद्रजलाशयविषयम् । अत्र ग्रन्थान्तरोक्ताः कालविशेषाः संक्षिप्य प्रदर्श्यन्ते ।

अनधिकालुप्तसंवत्सरे, सिंहमकरस्थगुरौ, अनस्तमितावालवृद्धगुरुशुक्रे, अवक्रानतिचारिगुरौ, अगुर्वादित्ये, अमलमासक्षयमासे, अलुप्तदिनद्वये पक्षे, अनवमदिनादौ, भूकम्पाशन्युल्काद्यद्भुतदोषरहिते काले, उत्तरायणे भाद्रफाल्गुनचैत्रवैशाखज्येष्ठाषाढाद्यन्यतममासे, रविशुद्धावयनद्वयविषुवद्वयकन्यामीनधनुरन्यत सङ्क्रान्तौ, शुक्लपक्षे द्वितीयानवमीसप्तमीदशमीपौर्णमासीनामन्यतमतिथौ, शनिभङ्गालान्यवारेषु भरणीकृत्तिकार्द्रापुनर्वस्वाश्लेषामघापूर्वाफाल्गुनीविशाखाव्यतिरिक्तेषु, विष्कम्भातिगण्डव्याघातवज्रव्यतीपातपरिघवैधृतिव्यतिरिक्तयोगकरणेषु यजमानस्य चन्द्रताराविशुद्धौ बुधशुक्रगुरुसितपक्षचन्द्रनिरीक्षिते लग्ने जलाशयोत्सर्गं कुर्यात् । तद्विधिस्तु मत्स्यपुराणे (५८. ४–६) —

---

1. व्यतीते विन्धः. 2. न कालनियमो ह्यत्र सलिलं कारणं यतः वि. ध. 3. सलिलं D. 4. योगेकरणेषु D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रृणु राजन् महाबाहो तडागादिषु यो विधिः ।
पुराणेष्वितिहासोऽयं पठ्यते च[1] तथा नृप ॥

प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे ।
पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम् ॥

प्रागुदक्प्रवणे देशे तडागस्य समीपतः ।
चतुर्हस्तां तथा वेदीं चतुरस्रां चतुर्मुखाम् ॥

अत्र समीपत इति जलाशयस्योत्तरदिगीशान्यतमदिशान्तसामीप्यं ग्राह्यम् । छन्दोगपरिशिष्टविश्वकर्मग्रन्थान्तरात् । चतुष्टयाभिप्रायां वेदीं कुर्यादिति शेषः ।

तथा षोडशहस्तः स्यान् मण्डपश्च चतुर्मुखः ।
वेद्याश्च परितो गर्तारत्निमात्रास्त्रिमेखलाः ॥

परितो यथासम्भवं दिक्षु विदिक्षु च ।

नव सप्ताथवा पञ्च योनिवक्त्रा नृपात्मज ।

गर्ताः कुण्डानि । योनिवक्त्रा योनिरूपमुखाः कर्तव्या इति शेषः ।

अत्र नवकुण्डीयपक्षे प्रतिवेदं गर्तद्वयम् । आचार्यस्यैकः । सप्तकुण्डीयपक्षे प्रथमोपस्थितयोः ऋग्यजुर्वेदयोरेव गर्तद्वैगुण्यम् । अवशिष्टवेदयोरेकैकः । आचार्यस्यैकः । पञ्चकुण्डीयपक्षे प्रतिवेदमेकैको गर्तः । आचार्यस्यैक इति व्यवस्था ।

वितस्तिमात्रा योनिः स्यात् षट्सप्ताङ्गुलविस्तृता ।
गर्ताश्च तत्र शस्ताः स्युस्त्रिपर्वोच्छ्रितमेखलाः ॥

---

1. वेदवादिभिः वा. पु.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

षट्सप्ताङ्गुलविस्तृता इति षडङ्गुलविस्तृता वा इत्यर्थः ।

सर्वतश्च सवर्णाः स्युः पताका ध्वजसंयुताः ॥

सर्वतः प्रागाद्यष्टदिक्षु दशसु वा । सवर्णा लोकपालसवर्णाः ।

अश्वत्थोदुम्बरप्लक्षवटशाखाभवानि तु ॥

मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत् ।

द्वाराणि द्वाराकाराकाराणि तोरणानि ।

शुभास्तत्राष्ट होतारो द्वारपालास्तथाष्ट वै ॥

अष्टौ तु जापकाः कार्या ब्राह्मणा वेदपारगाः ।
सर्वलक्षणसम्पूर्णा मन्त्रवन्तो जितेन्द्रियाः ॥

कुलशीलसमायुक्तः स्थापकः स्याद् द्विजोत्तमः ।

स्थापकः आचार्यः ।

प्रतिगर्तं तु कलशान् यज्ञोपकरणानि च ॥

व्यजनं चासनं शुभ्रं ताम्रपात्रे सुविस्तरे ।

अत्र कलशान् इति च कुत्वनिर्देशात् प्रतिकुण्डं त्रीन् त्रीन् स्थापयेत् इति केचित् । प्रतिकुण्डमेकैकः कलशः स्थाप्यः इति हेमाद्रिकाराणां मतम् । अस्मिन् पक्षे 'कलशान्' इति बहुवचनं प्रतिकुण्डं स्थापितकलशाभिप्रायम् । यज्ञोपकरणानि स्वस्वशाखानुसारेण । आसनं होत्रब्रह्मोपवेशनार्थम् ।

ततस्त्वनेकवर्णाः स्युर्वलयः प्रतिदेवतम् ॥

आचार्यः प्रक्षिपेद् वह्नावभिमन्त्र्य विचक्षणः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वक्ष्यमाणदेवतावलिदानार्थम् । तत्तद्वर्णबलयः संपादनीया इत्यर्थः । अभिमन्त्र्य तत्तन्मन्त्रैः ।

अरत्निमात्रो यूपः स्यात् क्षीरवृक्षविनिर्मितः ।
यजमानप्रमाणो वा संस्थाप्यो भूतिमिच्छता ॥

अत्र भूतिमिच्छता यजमानेन इत्यनेन पशुकामस्य प्रणयनवद् गुणफल-सम्बन्धः प्रतिपाद्यते ।

भविष्योत्तरे —

यूपविषयेऽश्वत्थपलाशवैकंकतमयाः शुभाः ।
शूद्रस्य यूपो निर्दिष्टः सारदारुमयोऽथवा ॥

हेमालङ्कारिणः कार्याः पञ्चविंशतिऋत्विजाः ।
कुण्डलानि च हैमानि केयूरकटकानि च ॥

तथाङ्गुलिपवित्राणि वासांसि विविधानि च ।
दक्षयेद्वै समं सर्वानाचार्ये द्विगुणं पुनः ॥

दद्याच्छयनसंयुक्तमात्मनश्चापि यत् प्रियम् ।
सौवर्णौ कूर्ममकरौ राजतौ मत्स्यडुण्डुभौ ॥

ताम्रौ कुलीरमण्डूकौ वायसः शिशुमारकः ।

डुण्डुभो राजिलः । एते च स्वर्णपात्र्यां कृत्वा स्थाप्याः । 'पात्रीमादाय सौवर्णीम्' इत्यादिना अग्रे तद्गतमकरादीनां जलाशये प्रक्षेपाभिधानात् ।

एवमासाद्य तान् सर्वानादावेव विशांपते ॥

आदावेव च कर्मोपक्रमात् । आसाद्य आसादनार्थं संनिधाप्य इति व्याख्येयम् । 'झषादीन् स्थापयेन्मध्ये' इत्यग्रे तदासादनाभिधानात् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः ।
सर्वौषध्युदकस्नानस्नापितो वेदपुङ्गवैः ॥

यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः ।
पश्चिमं द्वारमाश्रित्य प्रविशेद् यागमण्डपम् ॥

ततो मङ्गलशब्देन भेरीणां निस्वनेन च ।

सर्वौषधानि । सर्वौषध्युदकमेव स्नानं स्नानसाधनम् । करणे ल्युट् । मङ्गलशब्देन स्वस्तिमन्त्रपाठादिना यागमण्डपं प्रविशेत् इत्यन्वयः ।

रजसा मण्डलं कुर्यात् पञ्चवर्णेन तत्त्ववित् ॥

षोडशारं ततश्चक्रं पद्मगर्भं चतुर्मुखम् ।
चतुरस्रं च परितो वृत्तं मध्ये सुशोभनम् ॥

ततः पञ्चवर्णरजसा षोडशारं चक्रं कुर्यादिति सम्बन्धः ।

वेद्याश्चोपरि तत्कृत्वा ग्रहान् लोकपतींस्ततः ।
विन्यसेन् मन्त्रतः सर्वान् प्रतिदिक्षु विचक्षणः ॥
(म. पु. ९८. २३)

ततः षोडशारं चक्रं ग्रहपदमधिदेवताप्रत्यधिदेवताविनायकादिकोपलक्षणपरम् । महावेद्यां विरचितषोडशारचक्रमध्ये पद्मे ग्रहादीन् षट्त्रिंशतं सुरान् स्थापयित्वा मण्डपस्य प्रागादिदिक्षु इन्द्रादींन् लोकपालान् स्थापयेदित्यर्थः ।

[2]झषादीन् स्थापयेन् मध्ये [3]वारुणं मन्त्रमाश्रितः ।
ब्रह्माणं च शिवं विष्णुं तत्रैव स्थापयेद् बुधः ॥

---

1. कूर्मादि म. पु. 2. वारुण्यां म. पु.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विनायकं च विन्यस्य कमलामम्बिकां तथा ।
शान्त्यर्थं सर्वलोकानां भूतग्रामं न्यसेत्ततः ॥

(म. पु. ९८. २४-२९)

झषादीनिति पूर्वोक्तसौवर्णकूर्ममकरसहितां स्वर्णपात्रीं स्थापयेदित्यर्थः । तत्र षोडशारचक्र एव । एते च स्वस्वमन्त्रेण स्थापनीयाः ।

[1]पुष्पभक्ष्यफलैर्युक्तमेवं कृत्वाऽधिवासयेत् ॥

कुम्भांश्च रत्नगर्भांस्तान् [2]वासोभिरभिवेष्ट्य च ।

(म. पु. ९८. २६)

कुम्भांश्च अधिवासयेदिति सम्बन्धः ।

[3]गन्धपुष्पैरलङ्कृत्य द्वारपालान् समन्ततः ।
पठध्वमिति तान् ब्रूयादाचार्यस्त्वभिपूजयन्[4] ॥

[5]ऋग्वृचौ पूर्वतः स्थाप्यौ दक्षिणेन यजुर्विदौ ।
सामगौ[5] पश्चिमे स्थाप्यावुत्तरेण त्वथर्वणौ ॥

(म. पु. ९८. २७-२८)

पूर्वतः पूर्वस्मिन् कुण्डे । एवं दक्षिणादिशब्दो व्याख्येयः ।

[6]उदङ्मुखो दक्षिणतो यजमान उपाविशेत् ।
यजध्वमिति तान् ब्रूयाद्धोतृकान् [7]पुनरेव तु ॥

[8]उत्कृष्टमन्त्रजाप्येन तिष्ठध्वमिति जापकान् ।

(म. पु. ९८. २९-३०)

अत्र पूर्ववाक्यादाचार्योऽभिपूजयन्निति चानुवर्तनीयम् ।

---

1. भक्ष D. 2. वेष्टयेत् म. पु. 3. पुष्पगन्ध म. पु. 4. पूजयेत् म. पु. 5. पश्चिमे १द्वदूत्तरेण म. पु. 6. उदङ्मुखी म. पु. 7. हौत्रिकान् म. पु. 8. उत्कृष्टान् मन्त्रजापेन म. पु.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवमादिश्य तान् सर्वान् प्रयुज्याग्निं च मन्त्रवित् ॥
(म. पु. ५८. ३०)

प्रयुज्य प्रतिकर्म कुर्यादित्यर्थः ।

जुहुयाद्वारुणैर्मन्त्रैराज्यं च समिधस्तथा । (म. पु. ५८. ३१)

जुहुयादाचार्य इति शेषः ।

ऋत्विग्भिश्चैव[1] होतव्यं वारुणैरेव [2]सर्वशः ॥

ग्रहेभ्यो विधिवद्धुत्वा [3]तथेन्द्राय शिवाय च ।
मरुद्भ्यो लोकपालेभ्यो विधिवद्विश्वकर्मणे ॥
(म. नु. ५८. ३१-३३)

वारुणैः 'तत्त्वायामि ब्रह्मणा' इत्यादिभिः पञ्चभिः प्रयोगे वक्ष्यमाणैः ।

रात्रिसूक्तं च रौद्रं च पावमानं सुमङ्गलम् ।
[4]जपेरन् पौरुषं सूक्तं पूर्वतो बह्वृचाः पृथक् ॥

शाक्रं रौद्रं च सौम्यं च कौष्माण्डं[5] जातवेदसम् ।
सौरसूक्तं जपेरंस्ते दक्षिणेन यजुर्विदः ॥

[6]वैराजं पुरुषसूक्तं च सौवर्णं रुद्रसंहिताम् ।
शैशवं पञ्चनिधनं गायत्रं ज्येष्ठसाम च ॥

वामदेव्यं बृहत्सौम्यं रौरवं रथन्तरम् ।
गवां [7]व्रतं विकर्णं च रक्षोघ्नं च[8] यथाक्रमम् ॥

---

1. श्चाथ म. पु. 2. सर्वतः म. पु. 3. तथेन्द्रायश्वराय च म. पु. 4. जपेयुः म. पु. 5. कूष्माण्डं म. पु. 6. वैराज्यं पौरुषं सूक्तं म. पु. 7. बतं च काण्वं च म. पु. 8. वयसस्तथा म. पु.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गायन्ति सामगा राजन् [1]पश्चिमद्वारमाश्रिताः ।
[2]अथर्वणाश्चोत्तरतः शान्तिकं पौष्टिकं तथा ॥

[3]जपेरन् मनसा देव[4]माश्रिता वरुणं [5]सदा ।
(म. पु. ९८. ३३. ३८)

रात्रिसूक्तादीनां स्वरूपं प्रयोगे स्पष्टीभविष्यति ।

पूर्वेद्युरभितो रात्रावेवं कृत्वाधिवासनम् ॥

गजाश्वरथ्या[6]वल्मीकसङ्गमाद्भद्रगोकुलात् ।
मृदमानीय कुम्भेषु प्रक्षिपेच्चत्वरात्तथा ॥

रोचनां चैव सिद्धार्थान् [7]गन्धान् गुग्गुलमेव च ।
स्नपनं तस्य कर्तव्यं [8]पञ्चभङ्गसमन्वितैः ॥

[9]पूर्वककर्तुर्महामन्त्रैरेवं कृत्वा विधानतः ।
एवं क्षपामतीवाह्य[10] विधिदृष्टेन कर्मणा ॥
(म. पु. ९८. ३८-४०)

एवं क्षपामतीवाह्य मन्त्रैः पूर्वकर्तुः स्नपनं कर्तव्यमिति सम्बन्धः । सिद्धार्थाः श्वेतसर्षपाः । पञ्चभङ्गा अश्वत्थोदुम्बरप्लक्षवटवेतसपल्लवाः । स्नपनमन्त्राः प्रयोगे वक्ष्यन्ते ।

ततः प्रभाते विमले सञ्जातेऽथ [11]गवां शतम् ।
ब्राह्मणेभ्यः [12]प्रदातव्यमष्टषष्ट्यथ वा पुनः ॥

---

1. पश्चिमं म. पु. 2. अथर्वणः म. पु. 3. जपेयुः म. पु. 4. माश्रित्य म. पु. 5. प्रभुम् म. पु. 6. वल्मीकात् म. पु. 7. गन्धं म. पु. 8. समन्वितम् म. पु. 9. प्रत्येकस्तु महामन्त्रैः म. पु. 10. क्षपातिवाह्याथ म. पु. 11. शतं गवाम् म. पु. 12. मष्टवष्टिश्च वा पुनः म. पु.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पञ्चाशद्वाथ षट्त्रिंशत्पञ्च[3]विंशतिर्वा पुनः ।

(म. पु. ९८. ४१)

प्रदातव्यं दक्षिणार्थमिति शेषः ।

ततः [4]सांवत्सरैः प्रोक्ते शुद्धे लग्ने सुशोभने ॥

वेदशास्त्रैः[3] सगान्धर्वैर्वाद्यैश्च विविधैः[4] शुभैः ।
कनकालङ्कृतां कृत्वा [5]तत्र गामवतारयेत् ॥

सामगाय च सा देया ब्राह्मणाय विशाम्पते ।

(म. पु. ९८. ४१-४३)

सगान्धर्वैर्गीतसहितैः । अस्याश्च सामगाय दाने प्रतिपत्तिरूपमिति नात्र दक्षिणादानमित्याहुः ।

जलाशयं च त्रिवृता सूत्रेण परिवेष्टयेत् ।

त्रिवृता सूत्रेण तन्तुत्रयेण ॥

पात्रीमादाय सौवर्णीं पञ्चरत्नसमन्विताम् ।
ततो निक्षिप्य मकरं [7]मत्स्यादींश्चैव सर्वतः ॥

धृतां [8]चतुर्भिर्विप्रैस्तु वेदवेदाङ्गपारगैः ।
महानदीजलोपेतां दध्यक्षत[9]विभूषिताम् ॥

[10]उत्तराभिमुखो न्युब्जां जलमध्ये तु कारयेत् ।
आथर्वणेन साम्ना तु पुनर्मामित्यृचेति[11] वा ॥

आपो हिष्ठेति मन्त्रेण क्षिप्त्वाऽऽगत्य च [12]मण्डपम् ।

(म. पु. ९८. ४४-४६)

---

1. पञ्चविंशतिरप्यथ म. पु. 2. सांवत्सरप्रोक्ते म. पु. 3. शाब्दैः म. पु. 4. पुनः म. पु. 5. जले म. पु. 6. सौवर्णा D. 7. मत्स्यादीस्नाश्च सर्वतः D. मत्स्यादीश्चैव सर्वशः म. पु. 8. चतुर्विधैर्विप्रैः म. पु. 9. विभूषितैः D. 10. उत्तराभिमुखोन्युब्जा D. 11. मामित्यथेति च म. पु. 12. मण्डलम् म. पु.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निक्षिप्य वक्ष्यमाणप्रकारेण प्रक्षिप्य चतुर्भिर्होतृभिः । उत्तराभिमुख आचार्य इत्यर्थः । आथर्वणं साम 'शन्नो देवी' इत्यस्यभृतिगीतम् ।

अत्र भविष्योत्तरे विशेष उक्तः —

सामान्यं सर्वभूतेभ्यो मया दत्तमिदं जलम् ।
एवं [2]जलं जले क्षिप्त्वा पूजये[3]ज्जलमातरम् ॥

तोष्याः कर्मकराः सर्वे कुद्दालानि च पूजयेत् ।
(म. पु. १२७. ३५-३६)

इति ।

मत्स्यपुराणे —

पूजयित्वा [4]सदस्यांस्तु बलिं दद्यात् समन्ततः ।
(म. पु. ५८. ४७)

बलिं दद्यादिति मण्डपस्य प्राच्यादिदिक्षु इन्द्रादिभ्यो माषभक्तबलिं दद्यादित्यर्थः ।

पुनर्दिनानि होतव्यं चत्वारि मुनिसत्तमाः ॥
(म. पु. ५८. ४७)

अत्र होतव्यमिति सामान्येन विधानात् [5]पुनः शब्दस्वारस्यात् पूर्वोक्त एव वारुणहोमादिविश्वकर्मान्तो होमः प्रत्यहं कर्तव्य इति लभ्यते ।

चतुर्थीकर्म कर्तव्यं देया तत्रापि शक्तितः ।
दक्षिणा राजशार्दूल [6]वरुणं संस्मरंस्ततः ॥

---

1. अरण्यगेयं दा. खं. P. 932. 2. जलाञ्जलि भ. 3. जलामातरः भ. 4. सरस्तत्र म. पु. 5. पुनः शब्दः स्वरस्यात् D. 6. वरुणक्ष्मापनं ततः D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कृत्वा तु यज्ञपात्राणि यज्ञोपकरणानि च।
ऋत्विग्भ्यस्तु समं दत्त्वा मण्डपं विभजेत् पुनः॥
(म. पु. ९८. ४८-४९)

यज्ञपात्रादीनि समं कृत्वा ऋत्विग्भ्यः समं दत्त्वेत्यन्वयः। मण्डपं समं विभजेत्। गुर्वादिभ्यो दानमिति शेषः।

हेमपात्रीं च शय्यां च स्थापकाय निवेदयेत्।
(म. पु. ९८. ४९)

स्थापकाय गुरवे।

ततः सहस्रं विप्राणामथवाष्टशतं तथा॥

[1]भोजयेच्च यथाशक्त्या पञ्चाशतं वा [2]विंशतिम्।
(म. पु. ९८. ९०)

यथाशक्त्यष्टशतं सहस्रं [3]वाक्यात् शतादूर्ध्वं ब्राह्मणा भोजयितव्या इत्यर्थः।

[4]एवमेव पुराणेषु तडागविधिरुच्यते॥

कूपवापीषु सर्वासु तथा पुष्करिणीषु च।
एष एव विधिर्दृष्टः प्रतिष्ठासु तथैव च॥

मन्त्रतस्तु विशेषः स्यात् [5]प्रासादोद्यानभूमिषु।
(म. पु. ९८. ९०-९२)

तडागानां लक्षणानि प्रागुक्तानि। प्रतिष्ठासु देवानामिति शेषः।

---

1. भोजनीयं यथाशक्ति म. पु. 2. बिशतिः म. पु. 3. वाक्यं D. 4. एवमेषु म. पु. 5. प्रसादो म. पु.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अयं त्वशक्तावर्धेन विधिर्दृष्टः स्वयम्भुवा ।
[1]स्वल्पेष्वेकाग्निवत् कार्यं वित्तशाठ्यादृते [2]द्विज ॥
(म. पु. ९८. ९२)

अर्धेन गुरुणा सह त्रयोदश ऋत्विज इति पूर्वोक्तपक्षेण एकाग्निवदिति । गुरुमात्रकर्तृकैककुण्डस्तेन ग्रहपूजादिसहितमित्यर्थः ।

प्रावृट्काले स्थितं[3] तोयमग्निष्टोमसमं स्मृतम्[4] ।
[5]शरत्कालस्थिते यत् स्यात्तदुक्तफलदायकम् ॥

वाजपेयातिरात्राभ्यां [6]हेमन्तशिशिरे स्मृतम् ।
अश्वमेधसमं [7]प्राहुर्वसन्तसमये स्थितम् ॥

ग्रीष्मेऽपि [8]यत् स्थितं तोयं राजसूयाद्विशिष्यते ।
एतान्महाराज विशेषधर्मान्
करोति [9]योऽर्थानथ शुद्धबुद्धिः ।
[10]प्रयाति रुद्रालयमाशु पूतः
कल्पाननेकान् दिवि मोदते च ॥

अनेन लोकांश्च स [11]महस्तपादीन्
भुक्त्वा परार्धद्वयमङ्गनाभिः ।
सहैव विष्णोः परमं पदं यत्
[12]प्रयाति तद्योगबलेन भूयः ॥

———(:o:)———

1. स्नन्येष्वे म. पु. कल्पेष्वे म. पु. 2. नृणाम् म. पु. नृभिः दा. खं. P. 433. 3. स्थिते तोये म. पु. 4. फलं म. पु. 5. शरत्काले स्थितं म. पु. 6. हेमन्ते म. पु. 7. प्राह म. पु. 8. तन्थितं म. पु. 9. योऽप्योगमशुद्धबुद्धिः म. पु. 10. स याति म. पु. 11. महत्तमादीन् म. पु. 12. प्राप्नोति तथोगफलेन म. पु.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्र बह्वृचगृह्यपरिशिष्टम्

जलाशयोत्सर्गविधिः —

अथातो वारुणविधिः। वापीकूपतडागविधिं व्याख्यास्यामः। पुण्ये तिथिकरणे शुभे नक्षत्रे प्राचीदिशमास्थाय प्राक्प्रवणे उदक्प्रवणे उदकसमीपेऽग्निमुपसमाधाय वारुणं चरुं श्रपयित्वा आज्यभागं कृत्वा चतस्र आज्याहुतीर्जुहुयाद् 'समुद्र ज्येष्ठा' इति प्रत्यृचम्। ततो हविष्यमष्टभिर्जुहुयात् 'तत्त्वायामि ब्रह्मणा वन्दमानः' इति पञ्च 'त्वन्नो अग्ने वरुणस्य विद्वान्' इति च द्वे। 'इमं मे वरुण श्रुधी हवम्' इति च। तदा स्विष्टकृतं च नवमम्। नव वै प्राणाः प्राणा वै आपः तस्मादपो नवभिर्जुहोति। मार्जनान्ते धेनुमुत्तार्यमाणामनु मन्त्रयेत्।

इदं सलिलं पवित्रं कुरुष्व शुद्धाः पूता अमृताः सन्तु नित्यम्।
मां तारयन्ती कुरु तीर्थाभिषेकं लोकाल्लोकं तरते तीर्यते च॥

इत्यनेन। पुच्छाग्रे स्वयं लग्नो[1]ऽन्वारब्ध उत्तीर्य 'आपो अस्मान्मातरः शुन्धयन्तु' इत्यनयाऽपराजितायां दिश्युपस्थाययेत्'। 'सूयवसाद्भगवती भवतीह भूयाः इति' यदि सा हिंकरोति तदा 'हिंकृण्वती वसुपत्नी वसूनाम्' इति सचैलकण्ठां काञ्चनशृङ्गीं वृषप्रजां रौप्यखुरां कांस्यदोहनां विप्राय [1]दद्यादितरांश्च यथाशक्त्या दक्षिणाम्। तत उत्सर्गं कुर्यात् 'देवपितृमनुष्याः प्रीयन्ताम्' इति जलैश्चोत्सृज्यत इत्याह शौनकः। यजमानो ब्राह्मणान् भोजयित्वा स्वस्त्ययनं [2]वाचयेत्।

इति जलाशयोत्सर्गविधिः।

---

1. दद्यापितरावा D. 2. वाचयेत्म च D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ वापीकूपोत्सर्गविधिः

वापीकूपविधानं च कथयामि तथोपरि ।
कुण्डमण्डपसम्भारभूषणाच्छादनादिकम् ॥

तडागविधिवत् कुर्याद्यूपगोत्तरणादिकम् ।
अकालमूलान् कलशान् वापीमूलेषु दापयेत् ॥

तीर्थोदकसमायुक्तान् सितचन्दनचर्चितान् ।
सितवस्त्रयुगच्छन्नान् समाल्याननगर्भितान् ॥

श्रपयित्वा चरुं तत्र यावमग्नौ यथाविधि ।

यावं यवैर्विरचितम् । यथाविधि निर्वापप्रोक्षणादिकम् ।

चतस्रस्त्वाहुतीर्दद्याद् भूर्भुवस्वरिति क्रमात् ॥

चतस्रः व्यस्ताभिः समस्ताभिः समस्ताभिश्चैकमित्यर्थः ।

ग्रहहोमं प्रकुर्वीत शान्तिपुष्टिविवर्धनम् ।
वरुणाय बलिं दद्याल्लोकपालेभ्य एव च ॥

वारुणानि च सूक्तानि पठेयुर्द्विजसत्तमाः ।
वेदीमध्ये मण्डलं च पद्ममत्र प्रकल्पयेत् ॥

तन्मध्ये पूजयेच्छम्भुं ब्रह्माणं केशवं तथा ।
मत्स्यकच्छपमण्डूकान् [1]वेदिमध्येऽधिवासयेत् ॥

---

1. वेधिमध्ये D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मित्रोऽमित्राभिभूतानां धनदो धनकाङ्क्षिणाम् ।
वैद्यो रोगाभिभूतानां शरणं शरणार्थिनाम् ॥

अनेनैव च मन्त्रेण वरुणाय विसर्जयेत् ।
आदौ चावाहयेद्देवमनेनैव विशेषतः ॥

नमस्ते विश्वगुप्ताय नमो विष्णो अपांपते ।
सांनिध्यं कुरु देवेश समुद्रादिह चेत्य वै ॥

ततस्तु दक्षिणा देया ब्राह्मणानां विशेषतः ।
गौः स्थापकाय दातव्या भोजनं चानिवारितम् ॥

सर्वेषामेव दातव्यमेष पौराणिको विधिः ।
वापीकूपतडागेषु संस्थितं प्रथमं जलम् ॥

अपेयं तु भवेत् सर्वं तज्जलं सूतिकासमम् ।
यो न कामयते शान्तिं वापीकूपादिके त्विमाम् ॥

तस्य तन्निष्फलं तोयमुप्तं बीजमिवोषरे ।

अस्य प्रयोगस्तु —

सर्वोऽपि जलाशयोत्सर्गवदनुष्ठेयः । विशेषस्तु प्रतिकुण्डस्थापनावसरे उक्तलक्षणांस्तीर्थवारिपूरितानष्टमृद्घटानसिद्धार्थपञ्चरत्नसर्वौषध्यादिगर्भान् सित-वस्त्रयुगच्छन्नान् वाप्यादिचतुर्दिक्षूपरिविरचितमण्डले, धान्योपरि स्थापयित्वा तीर्थमावाह्य पूजयेत् ।

नमस्ते विष्णुगुप्ताय नमो विष्णो अपांपते ।
सान्निध्यं कुरु देवेश समुद्रादिह चेत्य वै ॥

इत्यनेन वारुणेन मन्त्रेणावाह्य पूजयेत् । महावेद्यां पूर्ववद्विरचिते षोडशारमण्डले ग्रहादिलोकपालावाहनस्थापनानन्तरं मध्ये शम्भुं ब्रह्माणं केशवं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चावाह्य स्थापयित्वा तत्रैव सौवर्णं कूर्मं रौप्यं [1]मत्स्यं ताम्रमयं मण्डूकं सपञ्चरत्न-ताम्रपात्रस्थतीर्थोदकसहितं 'नमस्ते विष्णुगुप्ताय' इत्यादिमन्त्रेण वारुणेन च वैदिकमन्त्रेणावाह्य 'एष वै प्रतिष्ठा नाम यज्ञः' इति मन्त्रेण प्रतिष्ठाप्य पूर्ववदेव सर्वेषामासनार्घ्यपाद्याद्युपचारसहितां पूजां कृत्वा तद्वदेव बलिं दद्यात्। ततो यूपं वैदिकमन्त्रैः स्नापयित्वा पूर्वोक्तप्रकारेण प्रतिष्ठाप्याज्यसंस्कारसमये यथास्वशाखं वरुणमुद्दिश्य निर्वापप्रोक्षणादिपूर्वकं यवैः सम्पाद्य इध्माऽधानाज्य-भागान्ते व्यस्तसमस्ताभिर्व्याहृतिभिश्चतस्रो घृताहुतीर्हुत्वा प्राग्वद्वारुणमन्त्रैर्यवचरू-दुम्बरसमिदाज्यानां प्रत्येकमष्टोत्तरशतमाहुतीर्हुत्वा प्रहादिविष्ण्वन्तानां समिद्भिराज्यैश्च प्रत्येकमष्टाविंशतिमाहुतीर्जुहुयात्। जलाशयोत्तरणार्थाय गोस्तूर्यरवैस्त्रिभिर्भ्रमणं कारयेत्। मन्त्राः – 'इदं सलिलं पवित्रं कुरुष्व,' 'आपो अस्मान्' 'सूयवसाद्भगवती' इत्येतैर्मन्त्रैः पूर्वोक्तैः। ततो मत्स्य-कच्छपमण्डूकां[2]स्ताम्रपात्रस्थानादाय गीतवाद्यादिघोषे प्रवर्तमाने 'त्वं वरुणं' इति मन्त्रेण जले प्रक्षिपेत्। अन्यः सर्वोऽपि विधिर्मत्स्यपुराणीयजलोत्सर्ग-विधिना समानः। ततो गुरुर्वेद्यां प्रहादिविसर्जनानन्तरम् –

मित्रोऽमित्राभिभूतानां धनदो धनकाङ्क्षिणाम्।
वैद्यो रोगाभिभूतानां शरणं शरणार्थिनाम्॥

इति [3]वरुणं विसर्जयेत्।

इति भविष्योत्तरोक्तो वापीकूपोत्सर्गविधिः सप्रयोगः।

———(:०:)———

1. मास्यं मत्स्यं तामयं D. 2. स्ताम्र D. 3. विरुणं D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथारामप्रतिष्ठाविधिः

मत्स्यपुराणे —

पादपानां विधिं वक्ष्ये तथैवोद्यानभूमिषु ।
तडागविधिवत् [1]सर्वमासाद्य जगदीश्वर ॥

ऋत्विङ्मण्डपसम्भार[2]माचार्यश्चाऽपि [3]तादृशः ।

ऋत्विङ्मण्डपसम्भारमासाद्य प्राप्येत्यर्थः । तादृशः कार्य इति शेषः ।

पूजयेद् ब्राह्मणांस्तद्वद्धेमवस्त्रानुलेपनैः ॥ (म. पु. ५९. २–३)

तद्वत् तडागोत्सर्गवत् ।

सर्वौषध्युदकैः सिक्तान् पिष्टातकविभूषितान् ।
वृक्षान् माल्यैरलङ्कृत्य वासोभिरभिवेष्टयेत् ॥

सूच्या सौवर्णया कार्यं सर्वेषां कर्णवेधनम् ।
अञ्जनं चापि दातव्यं तद्वद्धेमशलाकया ॥

फलानि सप्त चाष्टौ वा कालधौतानि कारयेत् ।
प्रत्येकं सर्ववृक्षाणां वेद्यां तानधिवासयेत् ॥

---

1. त्सर्गमासाद्य D. 2. सम्भारश्चाचार्यं म. पु. 3. तद्विध य. पु.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धूपोऽत्र गुग्गुलुः श्रेष्ठस्ताम्रपात्रैरधिष्ठितान् ।
[1]सप्तधान्ययुतान् कृत्वा वस्त्रगन्धानुलेपनैः ॥

कुम्भान् सर्वेषु वृक्षेषु स्थापयित्वा [2]नरेश्वर ।
सहिरण्यानशेषांस्तान् कृत्वा बलिनिवेदनम् ॥

[3]यथावल्लोकपालानामिन्द्रादीनां [4]विधानतः ।
वनस्पतेश्च विद्वद्भिर्होमः कार्यो द्विजातिभिः ॥

(म. पु. ५९. ४-९)

अत्र वारुणहोमस्थाने वनस्पतिहोमः कार्यः । चकारात्सूर्यादिविश्वकर्मान्त-देवतासमुच्चयः ।

ततः शुक्लाम्बरधरां [5]सुवर्णकृतभूषणाम् ॥

सकांस्यदोहां [6]सौवर्णशृङ्गाभ्यामतिशालिनीम् ।
पयस्विनीं वृक्षमध्यादुत्सृजेद् गामुदङ्मुखीम् ॥

(म. पु. ५९. १०)

उत्सृजेत् जलाशयोक्तप्रकारेणेति शेषः ।

ततोऽभिषेकमन्त्रेण वाद्यमङ्गलगीतकैः ।
[7]स्नातः शुक्लाम्बरधरो यजमानोऽभिपूजयेत्[8] ॥

गोभिर्विभवतः सर्वाम् [9]ऋत्विगाद्यान् समाहितः ।
हेमसूत्रैः सकटकै[10]रङ्गुलीयैः पवित्रकैः ॥

---

1. सर्वान् धान्यस्थितान् म. पु. २. नरेश्वरः D. 3. यथास्वंलोक म. पु. 4. विशेषतः म. पु. 5. सौवर्ण म. पु. 6. सौर्ण D. 7. ततः शुक्लाम्बरो यजमानोऽ 8. अर्धादस्मात्पूर्वं 'ऋग्यजुस्साममन्त्रैश्च वारुणैरभितस्तथा । तैरेव कुम्भैः स्नपनं कुर्याद् ब्राह्मणपुङ्गवाः' इति दृश्यते म. पु. 9. ऋत्विगाद्यात समाहितः D. ऋत्विजस्तान् समाहितः म. पु. 10. रङ्गुलीयपवित्रकं; म. पु.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वासोभिः शयनीयैश्च [1]तथोपस्करपादुकैः ।
[2]क्षीराभिषेचनं कुर्याद्यावद्दिनचतुष्टयम् ॥ (म. पु. ५९. ११-१३)

कुर्यात् [3]वृक्षमूल इति शेषः ।

होमस्तु सर्पिषा कार्यो यवैः कृष्णतिलैस्तथा ।

एतानि च द्रव्याणि चतुर्थीकर्मपर्यन्तस्य होमस्येति ज्ञेयम् ।

पलाशसमिधः शस्ताश्चतुर्थेऽह्नि तथोत्सवः ॥
(म. पु. ५९. १४)

पलाशसमिधः वनस्पतिहोमार्थमिति शेषः । तथा जलाशयोत्सर्गवत् ।

[4]दक्षिणाऽपि ततस्तद्वद्देया तत्रापि शक्तितः ।
यद्यदिष्टतमं [5]किञ्चित्तत्तद्दद्यादमत्सरः ॥

आचार्ये द्विगुणं [6]दत्त्वा प्रणिपत्य विसर्जयेत् ।

इत्यारामप्रतिष्ठाविधिः ।

———(:o:)———

1. ततो D. 2. क्षीरेण भोजनं दद्याप् म. पु. 3. मूलेति D. 4. दक्षिणा च पुनस्तद्वत् श. पु. 5. दमत्सरी म. पु. 6. दद्यात् म. पु.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथारामप्रतिष्ठाप्रयोगः

तत्रारामप्रतिष्ठां चिकीर्षुर्यजमानः शुद्धं कालं प्राप्याधिवासनदिनात् पूर्वेद्युरेकभुक्तादिनियमोऽधिवासनदिने प्रातः कृतनित्यक्रियः आरामस्यैशान्यप्राक्पश्चिमान्यतमदिशि गोमयेनोपलिप्तभूभागे विन्यस्तश्रीपर्ण्यादिप्रशस्तदारुमयपीठे प्रक्षालितकरचरणः स्वाचान्तः शुक्लमाल्यानुलेपनः सकुशोपग्रहः प्राग्ग्रेषु कुशेषु [1]प्राङ्मुख उपविश्य जलाशयोत्सर्गवदारामप्रतिष्ठाकर्मणो निर्विघ्नसमाप्त्यर्थं विनायकसूर्यादिग्रहपूजां विधाय कुशयवतिलजलान्यादायाद्येत्यादिदेशकालकीर्तनान्ते सर्वकामाप्तिसहितानन्दपदानुभवेन्द्रानुभवेन्द्रायुतत्रयावच्छिन्नसमयस्वर्लोकनिवास-स्वर्गोमसमसंख्यभूतभव्यस्वकुल्यपुरुषतारणपूर्वकपुनरावृत्तिदुर्लभपदप्राप्तिकाम एतदारामप्रतिष्ठाकर्म करिष्य इति कृतसङ्कल्पः जलाशयोत्सर्गप्रकारेण मातृपूजावृद्धिश्राद्धपुण्याहवाचनगुर्वृत्विग्जापकद्वारपालवरणपूर्वकं मधुपर्कदानानि कुर्यात्। तत आराममध्ये जलाशयोत्सर्गप्रकारेण प्रागेव विरचितवेदिकातोरणकुण्डद्वारध्वजपताकादियुते जलाशयप्रकरणोक्तान् सम्भारान सम्पादयेत्। कूर्ममकरादिसहितपात्रस्थाने प्रतिवृक्षं सप्ताष्ट वा सौवर्णरूप्यान्यतरफलानि स्वर्णसूचीस्वर्णशलाका च सम्पाद्यानि। उदुम्बरसमित्स्थाने पलाशसमिधः। वानस्पत्यहोमार्थं च यवाः कृष्णतिलाश्च प्रतिवृक्षस्थापनाय कलशाः पिष्टातकं मुरा मांसीवचाकुष्ठं शैलेयहरिद्राद्वयसटीचम्पकमुस्ताकसर्वौषधिपुष्पाणि गुग्गुलुर्वासः इत्येतान् सम्भारान् सम्भृत्य गुर्वादीन् कर्मसु नियुञ्ज्यात्। ततो गुरुश्चतुरस्रपिण्डिकामध्ये बद्धालवालान् वृक्षान् सर्वौषध्युदकैरासिच्य पिष्टातकैः पुष्पमालादि-[2]भिर्बृसीभिश्चालङ्कृत्य हेमसूच्या प्रतिवृक्षं स्कन्धसमीपपत्रादौ कर्णस्थानं परिकल्प्य तत्र हेमसूच्या कर्णवेधं, तदुपरिप्रदेशे [3]स्वर्णशलाकया नेत्राञ्जनं दत्त्वा सुरभि-

---

1. माङमुख D. 2. लिर्वृसोभिश्चा D. 3. शस्ताकया D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गुग्गुलुधूपं दद्यात्। अनन्तरं प्रतिवृक्षं मूलबद्धचतुरस्रपिण्डिकोपरि सप्तधान्यान्यष्टादशधान्यानि वा दत्त्वा तेषु तीर्थवारिपूरितानन्तक्षिप्तपञ्चरत्नादिकान् गन्धमाल्यालङ्कृतान् सताम्रपात्राभ्यां संवेष्टितग्रीवान् [1]कान्तमूलान् स्थापयेत्। एतेषां सेकादीनां प्रतिवृक्षं करणाशक्तौ वृक्षाष्टके कर्तव्यमित्याहुः। यवगोधूमपिष्टकाकङ्गुश्यामाकतिलचीनकाः सप्तधान्यानि। ततो यजमानो गुर्वृत्विग्भिः सर्वौषधिजलेन स्नापितः शुक्लमाल्याम्बरधरो शुक्लगन्धानुलेपनो मङ्गलगीतघोषादीन् यथाकर्म कुरुतेति विनियुज्य वाग्यतस्तिष्ठेत्। गुरुश्च पञ्चगव्येन वेदिकुण्डमण्डपादि प्रोक्ष्य रक्षोघ्नमन्त्रैः [2]सिद्धार्थान् विकीर्य प्राग्वत् पताकाध्वजद्वारकलशस्थापनवितानबन्धनषोडशारचक्रनिर्माणप्रतिकुण्डऋत्विग्विनियोगजापकद्वारपालविनियोगप्रतिकुण्डाग्निप्रतिष्ठादिग्रहादिलोकपालदशकस्थापनानि जलाशयोत्सर्गप्रकारेण कृत्वा सर्वसम्पादितानि हैमानि फलानि 'वनस्पते वीड्वङ्ग' इति मन्त्रेण वेदिमध्ये आसादयेत्। ततो ब्रह्मादिसप्तकस्थापनं कृत्वा सूर्यादीन् भूतग्रामान्तान् स्थापनप्रकारेण पूजयित्वा पूर्वादीन् ब्रूयात्। गुर्वादिभिश्च स्वे स्वे कुण्डे आज्यसंस्कारादी[3]ध्माधानान्ते कर्मणि कृते यजमानः क्रमेण कुण्डेषु होतव्यद्रव्यजातं मनसा स्मृत्वा इदं तत्तद्देवतोद्देशेन मया त्यक्तमिति प्रतिकुण्डं यजमानेन द्रव्यत्यागः। ततो जापकेषु द्वारपालेषु प्रागेवारभ्य जपत्सु आज्यभागान्ते वानस्पत्यमन्त्रेणाष्टोत्तरशतमाज्याहुतीः पलाशसमिदाहुतीः कृष्णतिलाहुतीश्च जुहुयुः। 'वनस्पते' इति मन्त्रस्य प्रजापतिः ऋषिः। त्रिष्टुप् च्छन्दो वनस्पतिर्देवता। आज्यादिहोमे विनियोगः।

[5]वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः।
गोभिः सनद्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि॥
(अ. ६. १२९. १)

इति वनस्पतिमन्त्रः सर्वशाखासु समानः। ततोऽग्निसमीपे[4] प्राग्वद् ग्रहादिविश्वकर्मान्तेभ्यो होमः अर्कादिसमिद्भिर्यवैः कृष्णतिलैश्च प्रत्येकमष्टाविंशतिसंख्यः कार्यः। ततः स्विष्टकृद्धोमः। अत्र वा कुण्डसमीपस्थापितकलशेषु सर्वौषध्यादिप्रयोगः। एवमधिवासनान्ते प्रातः कृतनित्यक्रिया

1. तकानं A. D. 2. सिद्धार्थ्यान् D. 3. ध्माधानान्ते D. 4. सनीपे D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गुर्वादयः कुण्डसमीपस्थकलशजलैः जलाशयोत्सर्गवद्यजमानमभिषिच्य स्नपयेयुः। ततो यजमानः शुक्लमाल्यगन्धादिधरो वन्दिगीतवाद्यमङ्गलघोषैः सह सुलग्ने स्वर्णशृङ्गादिभूषितां गामारामममध्यादुदङ्मुखीमुत्सृजेत्।

इदं वनं सुपवित्रं कुरुष्व शुद्धभूतममृतमस्तु नित्यम्।
तारयन्ती सर्वतीर्थाभिषिक्तं लोकाल्लोकं तरते तीर्यते च॥

इति मन्त्रेण।

एकवृक्षप्रतिष्ठायां तु इमं वृक्षम् इति मन्त्रमूहेत्। वनस्पतिसमीपस्थितयजमानं सपत्नीकं ऋत्विजो वृक्षमूलस्थापितकलशोदकैः सुरास्त्वाम् इत्यादिकैर्वारुणैश्च वैदिकैरभिषिच्य स्नापयेयुः। यजमानः शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः प्राङ्मुखः स्वाचान्त उपविश्याद्येत्यादिकृतैतदारामप्रतिष्ठाकर्मषाङ्गुण्यार्थममुकामुकगोत्रेभ्योऽमुकामुकशर्मभ्योऽमुकामुकवेदाध्यायिभ्य एताः शतं गाः अष्टषष्टिपंचाशत् षट्त्रिंशत् – पञ्चविंशतिसंख्याविशेषाभिलाषपूर्वकं रुद्रदेवतादक्षिणां युष्मभ्यं सम्प्रदद इति दत्त्वा एतानि हिरण्याङ्गुलीयकहेमसूत्रवासःशयनीयपादुकोपस्करादीनि तुभ्यं गुरवे दक्षिणां सम्प्रदद इति दत्त्वा कर्माङ्गदेवताः प्रीयन्तामिति वाचयित्वा सभासदः पूजयेत्। ततो गुरुरिन्द्रादिभ्यः प्राग्वद्बलिं दत्त्वा दिनचतुष्टयं वृक्षमूलेषु क्षीराभिषेचनं प्रहादिपूजनं ततो वानस्पत्यहोमाद्यावश्यककर्मान्तैर्होमं वेद्यधिवासितदेवपञ्चोपचारपूर्वकं कुर्यात्। चतुर्थेऽहनि होमसमापनान्ते चतुर्थीकर्म जलोत्सर्गोक्तविधिना कुर्यात्। अत्र वानस्पत्योऽग्निर्वनस्पतिमन्त्रेण पूर्णाहुतिरिति विशेषः। ततो दक्षिणादानादि सर्वं जलाशयोत्सर्गवत् कुर्यात्॥

इत्यारामप्रतिष्ठाप्रयोगः।

इति श्रीकोदण्डपरशुरामेत्यादिविविधबिरुदावलीविराजमानोन्नतमहाराजाधिराजश्रीशक्तिसिंहात्मजमहाराजाधिराजश्रीमदनसिंहविरचिते मदनरत्नप्रदीपे दानविवेकोद्द्योतो ग्रन्थः समाप्तः।

रामार्पणमस्तु। ग्रन्थसङ्ख्या ९०००६॥

1. मदनरत्नाकरदानखण्डः D.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

Appendix

Authors and works quoted in the Danoddyota by Madanasimhadeva.

(The first figure after the name represents the volume and the Arabic figures refer to the pages therein)

अङ्गिराः – १. ६०, ६५, ९६.

अग्निपुराणम् – १. ९, ५०, ५५, ६१, ७१, २०३. २०४. ३. २, ५, ६, ७, ८, ११-१४; ४८, ४९, ५२, ५३, ६५, ७८. ११९, १५३. १५५, १५६, १६७, १६८, १८१, २४६, ३१६, ३५८.

अत्रिः – ३. ३१४.

अथर्ववेदः – १. २३२, २३३, २३४, २३५, २३६, २६१. २. २, ४, ५, १५, १६, २८, ४१, ४८, ४९, ५०, ५१, ५३, ५७, ५८, ५९, ६०, ६१, ६२, ६३, ६४-१०७, १५६-१५९, १६२, १६६, २३१.

अपरार्कः – १. ५६.

आत्रेयः – ३. ८४.

आदित्यपुराणम् – १. ३३, ७०, ९४, ९५, १०४, १२१, १२२, १२४, १२५, १२६. २. १७०. ३. २७, २८, २९, ३०, ३१, ४७, ८०, १२९, १३२, १३३, २३९, २४०, २६८, २८९, ३११, ३२२, ३५७.

आपस्तम्बः – १. ८८, ९३.

आम्नायरहस्यम् – १. १४३.

आश्वलायनगृह्यसूत्रम् – १. २२४. २. ४८, ५६.

आश्वलायनश्रौतसूत्रम् – १. २२४. २. १३८-१४१, १४५, १४६.

ऋग्वेदः – १. १७२, १७३, २०४, २११-२१४, २१६, २१९-२२१, २२८, २३१, २३४-२४०, २४५-२७१. २. १-१५, १८-२०, २२-४५, ४७, ५०, ५१, १३१, १३८. ३. १०५.

कात्यायनः – १. ५७, ६२, ६४, ९१, १०६, १०९, ११०. ३. १६५.

काटकसंहिता – २. २१६, २६३.

कामिकम् – १. १४४, १४७-१५२. २. ६७-६९.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कालिकापुराणम् – ३. २३९.

कालोत्तरम् – १. १५४, १५५.

कुर्मपुराणम् – १. ८, २३, ३२, ३३, ४७. २. १, ४, २५, २६, ४४, ४८, ५१, ५५, ५८, ८१, १७८, १७९, १८०.

कृत्यकल्पतरुः – १. १९५.

कौशिकगृह्यसूत्रम् – १. २३३, २३५. २. ४९, ५१, ५२, ५४, ५५, ५६, ५७, ६१, ६५, १०१, १०५.

गन्धयुक्तिः – १. १०९.

गरुडपुराणम् – १. २५, ६८, ८७, ८८, १०६, ११७, १२६, १४२, २. १२२, १२३, १२४, १२५. ३, ४५, ४६, ५०, ५८, १६१-१६३, २८८, ३०८, ३१९.

गर्गः – ३. ३५७.

गृह्यपरिशिष्टम् – १. ९९, ११०, ११२, ११३, ११५.

गोपथबाह्मणम् – १. १२४. २. ५३.

गोभिलगृह्यसूत्रम् – १. १७४, १८८. २. २२, ४६, २१२.

गौतमः – १. ३९, ५४, ९१.

चिन्तामणिः – १. २०३, २०५.

छान्दोग्यम् – १. १८, २०३.

छन्दोगपरिशिष्टम् – १. १०६, ११०, ११२. २. ४७.

जातुकर्ण्यः – १. १२, ९३.

जावालिः – ३. ८४.

ज्योतिःपराशरः – १. ८३.

ज्योतिःशास्त्रम् – ८१.

ज्ञानरत्नावली -- १. १३१, १४३.

ताण्ड्यबाह्मणम् -- १. २१२, २२१, २२२, २२९.

तैत्तिरीयबाह्मणम् -- १. २४२, २४८. २. ५३.

तैत्तिरीयसंहिता – १. ७, ९६, २२६, २३७, २६७. २. २१, ३९, ४६, ५४, ५५, १५१, १६७.

तैत्तिरीयारण्यकम् – १. ९६, ९७. २. १५०.

त्रैलोक्यसारः -- १. १५८, १५९.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दक्षः – ३७, ३८, ४९, ६३. ३. ७९.

दानबृहस्पतिः – ३. ५५.

दानव्यासः – १. ६१.

देवलः – १. ११, १३, १४, १५-२०, २७, ३४, ३५, ४५, ५१, ६२, ६६, ८२. ३. ८४, १०३, ११२, २७८, २८५, २८८, ३०५.

देवीपुराणम् – १. २७, ७६, १०४. २. १२३, १२४, १७१, ३१७, ३१८, ३. २.

धौम्यः – १. ९२.

नन्दिपुराणम् -- १. २, ६०, ६१, ८७. ३. ४, १९, ८६, ९१, १५८, १५९, १६०, १६४, १६६, १६७, १६९, १७०, १७१, १८६, १८७, १८८, २६३, २६७, २६८, २६९, २७७, २८८, २९२, ३००, ३१४, ३५६.

नारदपुराणम् – १. ९२.

नारदसंहिता -- १. ५४-५६, ६२, ६३, ६४, १२१, १२९, १४४, १९१, २. १, १७१, १७४, १८२. ३. ३३, ७७, २२५, २२६, २२७, २६९.

नारसिंहपुराणम् – ३. ३५३.

पंचरात्रम् – १. १०८, १३४, १३७. २. १७१, १७३, २१८,

पद्मपुराणम् – १. ७१, ७५, १०७, २००, २७५. ३. २४३, २४४, ३२४, ३२५, ३२६, ३२७, ३२८.

पराशरः -- २. १२९, २५०.

पाणिनिः -- ३. १३५.

पापस्करगृह्यसूत्रम् – १. २२६, २२७. २. १४४, १४५, १४६.

पिंगलः -- १. १४०, १५५.

पैठीनसिः – १. ३३, ११४. ३. १६४, १६५.

प्रचेताः – १. ९६.

प्रतिष्ठादीपकम् – १. १३४.

प्रतिष्ठासारः – १. १५४.

प्रपंचसारः – १. १३०-१३३.

प्रभासखण्डः – १. ३०, ६५.

बृहत्पराशर :– १. ११८.

बृहस्पतिः – १. ५२, ६३, ६७, १२१, १२६, ३. ५५, ७५, १५७, २७८.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

बोधायन: – १. ३२, ३६, ८९, ११०, ११४, २१८. ३. २५, ३१४.

ब्रह्मपुराणम -- १. ३१, ४२, ७६, ११३. ३. ८४, ८५, १८१, २७९, ३११.

ब्रह्मथामल: – १. १६७, १७२.

ब्रह्मवैवर्तम् -- १. २८, ५१, ६८, ७६, ११४. ३. ६५, ६६, १०७, १०८, २१०, २६६, २८३, ३१५.

ब्रह्माण्डपुराणन् – १. ६७, ७१, ८८, १०५, १८६-१८८. २. १८२, २३४, २३५. ३. १६, १७, २१, ३८, ३९, ४०, ४१, १८९-१९१, २२१, २२२, २७७, २८४.

भविष्यत्पुराणम् – १. २७, ३२, ४०, ४२, ४४, ५१, ५२, ५८, ७५, ८०, ८१, ८४, १०३, १०७, ११५-११७, १२३, १४३, १४५. २. ११८, २२७, २६१. ३. ७४, ७५, ७६, ८२, १००-१०२, १११, ११२, १३०, १४८, १४९, २०७–२०९, २१५-२१७, २२४, २२५, २३०-२३२, २४६, २५०, २६८, २७०-२७२, २८०-२८३. २८८, २९०, २९१, २९२, ३०३-३०७, ३१०, ३१७, ३१८.

मत्स्यपुराणम् – ८, २४, ३२, ७६, ८५, ११७, १२६, १३०, १३१, १३९, १४१-१४३, १६१-१६९, १७१, १७५, १७६, १७८, १७९, १८१, १८२, १९१-२०३, २०५-२०७. २. १०८, १०९, ११२-११४, १३०-१३७, १६७, १६९, १७२-१९६, १९८, २००, २०१, २०३, २०५, २०६, २०७, २१०, २११, २१३, २१५, २१७-२२०, २२२, २२४-२२८, २३२, २३३, २३७, २३९, २४३-२५३, २५९-२६७, २६९, २७१-२७५, २७७-२९१, २९८-३०२, ३०४, ३०६-३१५. ३. २०, २१, २५, ५५, ५६, ५७, ५९, ६०-६४, ६६, ६७, ७२, ७३, ८०, ९१, १०३-१०५, ११३, ११४, ११६-११८. १२१, १७३-१८१, १९४-२०३, २३४–२३८, ३२३, ३२९, ३३०.

मनु: – १. ११, २१, २४, ३६, ३८, ४३, ४५, ४७, ४८, ५०, ५३, ६५, ७०, ७२, ८६, १०१, १११, ११८-१२०. ३. ३३१.

मरीचि: – १. १०९.

महाभारतम् – १. ९, १०, २३, २४, ३४, ३७, ३८, ४१, ४२, ५१, ५३, ६१, ८२, ३. २१, ३४-३७, ५७, ८३-८६, ९३, ९५, ९६, ११२, १२३, १२४, १८२-१८५, २७०, २७४, २७८, २८९, ३११, ३१६, ३१९, ३२२.

मानवसंहिता – १. ७६, १७७.

मार्कण्डेयपुराणम् – १. ९, २५, १०७. २. १७३, २२४, २२५. ३. ७४.

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
CC-0. Jangamwadi Math Collection. Digitized by eGangotri
LIBRARY
Jangamwadi Math, Varanasi

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संस्कृतपरिषद्ग्रन्थावली

A–General Series

१.१	ज्ञानचतुर्विंशी	...	...	१.५०
२.२	पण्डितराजकाव्यसंग्रहः	...	...	६.००
४.३	ऋगर्थसारः	...	...	२.५०
६.४	संकृतकविजीवितम्	...	...	४.००
७.५	क्षेमेन्द्रलघुकाव्यसंग्रहः	...	...	१५.००
८.६	नरकासुरविजयव्यायोगः	...	...	३.००
९.७	सीतारामविहारकाव्यम्	...	...	६.००
१०.८	दानोद्द्योतः प्रथमो भागः	...	...	६.००
११.९	Descriptive Catalogue of sk. mss.		...	३०.००
१३.१०	आर्यासप्तशती स्वोपज्ञटीकायुता	...	...	८.५०
१४.११	विक्रमोर्वशीयम् - टीकात्रयोपेतम्	...	...	८.००
१५.१२	दानोद्द्योतः द्वितीयो भागः	...	...	८.५०
१६.१३	दानोद्द्योतः तृतीयो भागः	...	...	१२.५०

B–Popular Series

३.१	Stories from Kathāsaritsāgara–Part I	२.००
५.२	Gems from Sanskrit Literature	१.५०
१२.३	Stories from Kathāsaritsāgara–Part II	५.००

THE SANSKRIT ACADEMY
OSMANIA UNIVERSITY,
HYDERABAD-A. P.

* * *

CC-0. Jangamwadi Math Collection. Digitized by eGangotri